धादित्यौषष्ठेराहुर्धरासुतौ ॥ राजयोगोत्रयोजातःसपुमान्नायकोभवेत् ॥ ७५ ॥ चतुर्गृहेरेकगृहेनसंस्थैर्धीधर्मदुश्चिक्यतनुस्थितैर्वा ॥ दास
श्चजातःक्षितिपालतुल्योभवेन्नरेंद्रोथसमुद्रपारगः ॥ ७६ ॥ सुरगुरुशशियुक्तेकर्कटेलग्नसंस्थेभृगुतनयबलिष्ठःकेंद्रजातोथशेषैः ॥ शिव
सहजरिपुस्थैर्यस्यजन्मात्रयोगेनियतमितियदायुश्चक्रवर्तीधनेशः ॥ ७७ ॥ तुलेमीनमेषेवृषेदैत्यपुत्रोभवेद्राजमानीकलाकौतुकीच ॥ त्र
यंपुत्रजातंचिरंजीवितंचभवेद्वत्सरेवह्नियुग्मे२३चभुंक्ते ॥ ७८ ॥ लग्नाधिपतिःकेंद्रेबलपरिपूर्णःकरोतिपरमर्द्धिम् ॥ गोपालकुलेपिजातंकिं
पुनरिहनृपतिसंभूतं ॥ ७९ ॥ रविस्तृतीयेभृगुनंदनःसुखेबुधद्वितीयेयदिपंचमेस्थितः ॥ ननीचराशौनचखांतवेश्मगोभवेन्नरेंद्रस्त्रिसमुद्र-
पालकः ॥ ८० ॥ यदिभवतिचकेंद्रेधर्मगेस्वोच्चसंस्थेसुतभवनगतश्चेद्वाक्पतिर्जन्मकाले ॥ सभवतिनरनाथःसार्वभौमोजितारिः शशिबु-
धभृगुपुत्रैरन्वितोवीक्षितोवा ॥ ८१ ॥ विलग्ननाथःखलजाश्चसंस्थाःसुहृद्गृहेमित्रदशापतिःस्थितः ॥ करोतिसार्वंपृथिवीतलस्यदुर्वारवै-
रिघ्नमहोदयंशुभं ॥ ८२ ॥ लग्नंविहायकेंद्रेसकलकलापूरितोनिशानाथः ॥ विदधातिमहीपालंविक्रमबलवाहनोपेतम् ॥ ८३ ॥ स्वोच्चैः

॥५३॥ धनेचंद्रश्चशुक्रश्चमेषोजीवोयदाभवेत्॥ दशमेराहुशुक्रौचराजयोगोभिधीयते॥ ५४॥ सिंहेजीवोथकन्यायांभार्गवोमिथुनेश-
निः॥ स्वक्षेत्रेहिबुकेभौमःसप्तमान्नायकोभवेत्॥ ५५॥ शनिचंद्रौचकन्यायांसिंहेजीवोघटेतमः॥ मकरेचकुजस्तत्रजातःस्याद्विश्वपा-
लकः॥ ५६॥ शुक्रोजीवोरविर्भौमश्चापेमकरकुंभयोः॥ मीनेचवत्सरेत्रिंशेसमर्थःसर्वकर्मसु ॥५७॥ कर्मलग्नेजीवशुक्रौलाभेचंद्रज
भार्गवौ॥ मेषेभानुश्चजातोयोयोगेस्मिन्नृपतिर्भवेत् ॥५८॥ कर्मस्थानेयदाजीवोबुधःशुक्रस्तथाशशी॥ सर्वकर्माणिसिद्ध्यंतिराज-
मान्योभवेन्नरः ॥५९॥ षष्ठेष्टमेपंचमेवानवमेद्वादशेतथा॥ सौम्यक्रूरग्रहैर्योगेराजमान्योनसंशयः ॥६०॥ पंचमेचयदाषष्ठेचाष्टमेनव
मेक्रमात्॥ भौमराहुसितार्काः स्युर्जातकःकुलपालकः॥ ६१॥ लग्नेसौरिस्तथाचंद्रश्चाष्टमेभार्गवोयदा॥ जायतेत्रनृपोयोगेमानीभूरि
प्रियःसदा ॥६२॥ मिथुनस्थोयदाराहुःसिंहस्थोभूमिनंदनः॥ अत्रयोगेनरोजातोनृपोश्वगजनायकः ॥६३॥ चापार्द्धेशशिनायुक्तोयदिसू-
र्यःप्रजायते॥ लग्नेचसबलोमंदोमकरेचकुजोभवेत्॥६४॥ अत्रयोगेसमुत्पन्नोमहाराजोभवेन्नरः॥ दूरादेवनमंत्यस्यप्रतापैश्चरणौनृपाः॥
॥६५॥ उच्चाभिलाषकःसूर्यस्त्रिकोणस्थोयदाभवेत्॥ अपिनीचकुलेजातोराजास्याद्धनपूरितः॥६६॥ धनस्थानेयदाशुक्रोदशमेचबृह-
स्पतिः॥ षष्ठेचसिंहिकापुत्रोराजाभवतिविक्रमे॥६७॥ चतुर्ग्रहायदैकत्रयदिसौम्याभवंतिहि॥ भ्रातृधीधर्मलग्नाद्यैराजयोगोभवेदयं॥६८
सर्वैर्ग्रहैर्यदाचंद्रोविनाहेलिंनिरीक्ष्यते॥ षष्ठाष्टमेसंस्थितश्चसदीर्घायुर्नराधिपः॥ ६९॥ नवमेपंचमेस्थानेचतुर्थेचयदाग्रहाः॥ आदौजातश्चन

ताः सौम्याः केंद्रस्थानेभवंतिचेत् ॥ ध्रुवंराज्यंभवेत्तस्ययदिनीचसुतोभवेत् ॥ ३८॥ स्वक्षेत्रस्थोयदाजीवोबुधः सौरिश्चचेद्भवेत् ॥ तस्यजा
तस्यजातस्यदीर्घायुः संपत्तिश्चपदेपदे ॥३९॥ मीनेबृहस्पतिः शुक्रश्चंद्रमाश्चयदाभवेत् ॥ तस्यजातस्यराज्यंस्यात्पत्नीचबहुपुत्रिणी
॥४०॥ पंचमस्थेयदाजीवोदशमस्थश्चचंद्रमाः ॥ सराजवान्महाबुद्धिस्तपस्वीचजितेंद्रियः ॥ ४१ ॥ सिंहेजीवस्तुलाकूटश्चापेषुमकरेपि
च ॥ ग्रहायदातदाजातोदेशभोगीभवेन्नरः ॥ ४२ ॥ तुलाकोदंडमीनस्थोलग्नसंस्थोपिचेच्छनिः ॥ करोतिभूपतेर्जन्ममहापुण्यानुभावतः
॥ ४३ ॥ विद्यास्थानेयदासौम्याः कर्कस्थानेचचंद्रमाः ॥ धर्मस्थानेयदासौम्याराजयोगस्तदाभवेत् ॥ ४४॥ मकरेचघटेमीनेवृषेमिथु-
नमेषयोः ॥ ग्रहास्तदाचविख्यातोराजाभवतिमानवः ॥ ४५॥ बुधभार्गवजीवार्कियुक्तोराहुश्चतुष्टये ॥ कुरुतेकमलारोग्यपुत्रमाना-
दिकंफलम् ॥ ४६॥ चतुर्थेभुवनेशुक्रोगुरुचंद्रधरासुताः ॥ रविसौरियुताः संतिराजाभवतिनिश्चितम् ॥ ४७ ॥ अष्टमेचव्ययेक्रूरोम
ध्येचक्रूरसौम्यकौ ॥ राजयोगोत्रयोजातोमहाभूपोभविष्यति ॥ ४८॥ लग्नेसौरिस्तथाचंद्रस्त्रिकोणेजीवभास्करौ ॥ कर्मस्थानेभवे-
द्भौमोराजयोगोभिधीयते ॥ ४९ ॥ नवमेचयदासूर्यः स्वगृहस्थोभवेत्तदा ॥ तस्यजीवतिनोभ्राातास्यादेकोपिनृपैः समः ॥ ५० ॥ द्वित्रितु
र्येसितेषष्ठेकर्मण्यपियदाग्रहाः ॥ राजयोगंविजानीयाज्जातस्तुच्छकुलेपिचेत् ॥ ५१ ॥ लग्नेक्रूरेव्ययेसौम्योधनेक्रूरश्चजायते ॥ रा-
जयोगोत्रयोजातोभूपतिर्भवतिस्फुटम् ॥५२॥ लग्नेक्रूरोव्ययेक्रूरोधनेसौम्योयदाभवेत् ॥ सप्तमेभवतिक्रूरः परिवारक्षयंकरः ॥

भवंतिसौम्यादुश्चिक्यलाभारिगताश्चपापाः॥ यस्यप्रयाणेप्यथजन्मकालेध्रुवंभवेत्तस्यमहीपतित्वं॥२२॥ लाभेत्रिकोणेयदिशीतरश्मिः करो
त्यवश्यंक्षितिपालतुल्यम्॥ कुलद्वयानंदकरंनरेंद्रंज्योत्स्नाहिदीपस्तमनाशकारी॥२३॥ शत्रुस्थानेयदाजीवोलाभस्थानेशशीभवेत्॥ गृहम
ध्येसजातश्चविख्यातंकुलदीपकम्॥२४॥ लग्नाधिपोवाजीवोवाशुक्रोवायत्रकेंद्रगः॥ तस्यपुंसश्चदीर्घायुःसभवेद्राजवल्लभः॥२५॥ दशमेबुध
सूर्यौचभौमराहूचषष्टगौ॥ राजयोगोत्रयोजातःसपुमान्नायकोभवेत्॥२६॥ आदौजीवःशनिश्चांतेगृहमध्येनिरंतरम्॥ राजयोगंविजानीयात्कु
टुंबबलमुत्तमम्॥२७॥ सहजस्थोयदाजीवोमृत्युःस्थानेयदासितः॥ निरंतरंगृहंमध्येराजाभवतिनिश्चितम्॥२८॥ जीवोवृषेस्कधाराश्मिर्मिथु
नेमकरेकुजः॥ सिंहेभवतिसौरिश्चकन्यायांबुधभास्करौ॥२९॥ तुलायामस्फुराचार्योराजयोगोभवेदयं॥ अत्रयोगेसमुत्पन्नोमहाराजोभवे
न्नरः॥३०॥ अष्टमेद्वादशेवर्षेयदिजीवतिमानवः॥ सार्वभौमस्तदाराजाजायतेविश्वपालकः॥३१॥ एकोजीवोयदालग्नेसर्वेयोगास्तदाशु
भाः॥ दीर्घजीवीमहाप्राणोजातकोनायकोभवेत्॥३२॥ धेनुशुक्रोथभौमश्चमीनेजीवस्तुलाबुधः॥ नीचस्थौशनिचंद्रौचराजयोगस्तदा
ध्रुवम्॥३३॥ अस्मिन्योगेचयोजातःसराजाधनवर्जितः॥ दाताभोक्ताचविख्यातोमान्योमंडलनायकः॥३४॥ मीनेशुक्रोबुधश्चां
तेधनेराहुस्तनोरविः॥ सहजेचभवेद्भौमोराजयोगोभिधीयते॥३५॥ सहजेचयदाजीवोलाभस्थानेचचंद्रमाः॥ सराजागृहमध्यस्थोवि·
ख्यातःकुलदीपकः॥३६॥ शुभग्रहाःशुभक्षेत्रेभवंतियदिकेंद्रगाः॥ तदाशुभानिकर्माणिसकरोतिहिजातकः॥३७॥ उच्चस्थानग-

चैरं खलैः किं ॥१०॥ भवतिवदनमूर्तिर्वल्लभः कामिनीनांसकलजनसमर्थोदीर्घजन्माविहाय ॥ ध्वजविषयगुणज्ञोद्रव्यमुख्यः प्रधानःसधनकनक-
पूर्णोदैत्यपोयस्यकेंद्रे ॥११॥ धनवान्प्राज्ञःशूरोमंत्रीवादंडनायकःपुरुषः॥ दशमस्थेरवितनयेवृंदपुरग्रामनेतावा ॥१२॥ तुलाकोदंडमीनस्थोलग्न-
स्थोपिशनैश्चरः॥ करोतिभूपतेर्जन्मवंशेचनृपतिर्भवेत् ॥१३॥ दिव्यस्त्रीवरकांचनांबरगतामाधारलक्ष्मीमयःशास्त्रंकौतुकगीतनृत्यरसताव्या-
पारदीक्षागुरुः॥ पुत्रभ्रातृजनान्वितःस्थिरमतिःकर्तातिप्रीत्यन्वितोजीवःकेंद्रेयदाभवेन्निजसुखीसत्कर्मकारीनरः ॥१४॥आकाशमंदि
रगतःस्वनुपःस्वगेहेकुर्यान्नृपंनृपतिचक्रवरैःससेव्यः॥ सैन्यंप्रतापहतनाहतशत्रुपक्षंशक्रोयथासुरगुणैश्चविराजमानः ॥१५॥उपचयगृहसं-
स्थो ३।६।१०।११ जन्मदोयस्यचंद्रःस्वगृहमथनवांशेकेंद्रजातश्चसौम्याः॥ सकलबलवियुक्तश्चैवपापाभिधानंसभवतिनरनाथःशक्रतुल्योबलेन
॥१६॥ विद्याकलागुणविराजितकामधेनुर्भोगैःपरंवरयुवतिजितकामराजः॥ देशाधिपत्यपुरपत्तनगजश्रियांतोमीनेसतोसकलमंडलदीप्तदी-
प्तैः॥१७॥ कामेचकन्येरिपुरंध्रसंस्थेकेंद्रत्रिकोणेव्ययगेचराहुः॥ कामीचशूरोबलवान्सभोगीगजाश्वछत्रंबहुपुत्रताच ॥१८॥ मृगपतिवृषकन्या
कर्कटस्थेचराहुर्भवतिविपुललक्ष्मीराजराज्याधिपोवा ॥ हयगजनरनौकामेदिनीपंडितश्चसभवतिकुलदीपोराहुतुंगोनराणां॥ १९॥ केंद्रत्रिकोणे
बुधजीवशुक्राद्दृक्स्थानराणांयदिजन्मकाले ॥ धर्मार्थविद्यायशकीर्तिलाभःशांतःसुशीलःसनराधिपःस्यात् ॥२०॥ भृगुसुरपूज्योचंद्रमाकेंद्र
वर्तीबहुसुखधनवृद्धिःकर्मसाध्यंनराणाम्॥ रविसुतशशिपुत्रेभानुजीवेत्रिकोणेक्षितिसुतदशमेषुराजयोगावदंति ॥२१॥ केंद्रत्रिकोणेषु-

लग्नात्सप्तमशीतांशुः पापांशे शुभलग्नगः॥ लग्नस्थितो यदा भानुः समांते म्रियते शिशुः ॥१२१॥ इति मातृपितृहा योगः॥ इति चतुराशीति योगाः
शास्त्रांतरादवलोक्य लिखिताः॥ ॥अथाग्रे राजयोगप्रकरणं लिख्यते॥ ॥लग्नं लग्नपतिर्बलान्वितवपुः केंद्रत्रिकोणे शिवे पुच्छा जन्मविवाहयाः
न तिलके कुर्यात्तं नृपतिर्ध्रुवं॥ सच्छीलं विभवान्वितं गजरुजं मुक्तातपत्रान्वितं जातो निम्नकुलेविभूतिपुरुषं शंसंति गर्गादयः ॥१॥ एकश्चेच्छुक्रो ज
ननसमये लाभसंस्थे च केंद्रे जातो वै जन्मराशौ यदि सहजगते प्राप्यते वै त्रिकोणे ॥ विद्याविज्ञानयुक्तो भवति नरपतिर्विश्वविख्यातकीर्तिर्दानीमा
नी चशूरो हयगुणसहितः सद्गजैः सेव्यमानः ॥२॥ दशमभुवननाथः केंद्रकोणे धनस्थे बलियति बलयाने भस्त्रसिंहासनेषु ॥ स भवति नरनाथो वि
श्वविख्यातकीर्तिर्मदगलितकपोलैः सद्गजैः सेव्यमानः ॥३॥ एकोपि केंद्रभुवने नवपंचमे वा भास्वान्मयूखविमलीकृतदिग्विभागः ॥ निःशेषदो
षमपहत्य शुभप्रसूतं दीर्घायुषं विगतरोगभयं करोति॥४॥ चंद्रः पश्येद्यदादित्यं बुधः पश्येन्निशापतिं॥ अस्मिन्योगे तु यो जातः स भवेद्वसुधाधिपः
॥५॥ यदि भवति च केंद्रे यामिनीनाथ एव ददति प्रियभार्यापुत्रिणी वा सुरूपा ॥ धनकनकसमृद्धिं माणिकं हीररत्नं रचयति मृगयाभिश्चंदनैश्चर्चि-
तांगं ॥६॥ शुक्रो यस्य बुधो यस्य यस्य केंद्रे बृहस्पतिः ॥ दशमोंगारको यस्य स जातः कुलदीपकः ॥७॥ हयरथनरनागैरत्नसम्यक्फलानां जलधि
तटनिवासी रत्नतुल्यं च धान्यं॥ बहुजनकिल इष्टा सत्यवादी प्रसूतो भवति यदि च केंद्रे दैत्यकोणे बुधस्य ॥८॥ किं कुर्वंति ग्रहाः सर्वे यस्य केंद्रे बृह
स्पतिः ॥ मत्तमातंगयूथानां भिनत्त्येकोपि केसरी ॥९॥ एक एव सुरराजपुरोधाः केंद्रगो थ नवपंचमगो वा ॥ लाभगो भवति यत्र विलग्ने तत्र शेषरव-

॥७९॥ षष्ठस्थानगतेशुक्रेतनुस्थानगतेकुजे ॥ नासाच्छेदकरोयोगोवदामिमुनिरुत्तमः ॥१०८॥ इतिनासाच्छेदयोगः ॥ ८०॥ मंदेचदृश्यतेचंद्रोलग्ने
चरविभार्गवौ ॥ शुभग्रहानपश्यंतिकर्णच्छेदोनसंशयः ॥१०९॥ इतिकर्णच्छेदयोगः ॥ ८१॥ कविनासहितोमंदोगुरुणासहितः कविः ॥ शुभग्रहानप
श्यंतिपादखंजोभवेन्नरः ॥११०॥ इतिपादखंजयोगः ॥८२॥ लग्नाच्चसप्तमस्थानेशन्यर्केराहुसंस्थिते ॥ सर्पेणपीडितस्योक्ताशय्यायांस्वपतोपिच ॥
॥१११॥ इतिसर्प्पहंतायोगः ॥८३ ॥ गुरुस्थानेगतेसौम्येशनिस्थानगतेकुजे ॥ पंचविंशतिवर्षेचवनेव्याघ्रेणहन्यते ॥११२॥ इतिव्याघ्रहंतायोगः ॥ ८४
शुक्रस्थानेगतेचंद्रेशुक्रस्थानेगतेशनौ ॥ अष्टाविंशतिवर्षेचअसिघातेनमृत्युदः ॥११३॥ इतिअसिघातयोगः ॥ ८५॥ धर्मस्थानगतेभौमेशन्यर्करा
हुसंयुते ॥ शुभग्रहानपश्यंतिशरक्षेपेणहन्यते ॥११४ ॥ इतिशरक्षेपहंतायोगः ॥८६॥ रविणासहितोभौमःशनिर्वाजीवसंयुतः ॥ अष्टाविंशतिवर्षेच
ब्रह्मघातीनसंशयः ॥ ११५ ॥ इतिब्रह्मघातीयोगः ॥८७॥ रविस्थानगतेचंद्रेगुरुस्थानसमायुतः ॥ सागरेचस्थितेलग्नेपंचापत्यविनाशकृत् ॥११६ ॥
॥ इतिपंचापत्यविनाशयोगः ॥८८॥ अथदोलायोगः ॥ मीनेमेषेचचापेचस्थितेस्थानत्रयेगृहे ॥ दोलासंज्ञकयोगःस्याद्राज्यदोयमुदाहृतः ॥११७॥
सन्मानदानगुणपात्रपरीक्षितोवाकलानिधिःकौशलगीतनृत्यः ॥ मंत्रीश्वरोराजसभाविवेकीकेंद्रस्थितेपापविवर्जितेगुरौ ॥११८॥ ॥ इतिदोला
योगः ॥ ८९॥ अथपदकविच्छेदयोगः ॥ ॥ लग्नस्थानगतेभौमःशन्यर्कराहुवीक्षितः ॥ योगःपदकविच्छेदोयदिशुक्रसमोभवेत् ॥ ११९॥ इतिपदक
विच्छेदयोगः ॥९०॥ केंद्रस्थानगतेभौमेसैंहिकेयेचसप्तमे ॥ तदानित्यंविजानीयादस्मान्मृत्युस्तदाभवेत् ॥२०॥ इतिइच्छतोमृत्यकयोगः ॥ ९१ ॥

योचिरायुश्चसुखप्रदः ॥९३॥ इतिनंदायोगः ॥७१॥ लग्नेचजीवोयुगगेभृगुश्चद्यूनेचसौम्योदशमेमहीजः ॥ केंद्रेत्वमीचारुफलप्रदाः स्युःसवार्थदा·
तारइतिप्रसिद्धः ॥९४॥ इतिदातारयोगः ॥७२॥ घटेमेषेनरे३चापेतुलायांसिंहगेगृहे ॥ राजहंसोभवेद्योगोराज्यास्पदसुखप्रदः ॥९५॥ इतिराजहंस
योगः ॥ ७३॥ सिंहासनेचहंसेचदंडेयोगेमरुक्ध्वजे ॥ चतुःसागरयोगेचचिल्हिपुच्छोमहाफलं ॥९६॥ तुलामकरमेषाब्जलग्नेवाह्यथवाक्वचित् ॥
सिंहासनेचडमरोचिल्हिपुच्छःसशस्यते ॥९७॥ मृगेकर्केचपुच्छःस्याद्राजहंसोसुखप्रदः ॥ कुंभेचमन्मथेचैवचिल्हिपुच्छोभिधीयते ॥९८॥ मृ
गेकर्कध्वजेपुच्छः कन्यालोवृषभेझषः ॥ चिल्हिपुच्छोभवेद्योगश्चतुःसागरगोचरे ॥९९॥ योगोदितफलंपुच्छःकरोतिद्विगुणंफलं ॥ तेनयोगाधि-
योगोयंलग्नेपिकस्यचिन्मते ॥१००॥ घटशून्येनृपसचिवोगोमहिषीहयगजैर्युक्तः ॥ नीतिज्ञोबहुपुत्रोलग्नेपिचसम्मतंकेषु ॥१०१॥ इतिचिल्हिपुच्छ·
योगः ॥७४॥ चंद्राष्टमेचक्रसंज्ञार्किर्किशुक्रागृहेविधौ ॥ केमद्रुमेचसंपूर्णेयोगोलालाटिकामतः ॥१०२॥ आजन्मतोभवतिकारगृहेःप्रसिद्धःशि-
ल्पादिकर्मकुशलामुशलाकृतिश्च ॥ भूर्यात्मजोपिलभतेविविधामलब्धींजन्मांतरेपिनजहातिललाटयोगे ॥१०३॥ इतिललाटीयोगः ॥ ७५॥ रा
हुणासहितश्चंद्रःसपापोगुरुवीक्षितः ॥ महापातकयोगोयंयदिशुक्रसमोभवेत् ॥१०४॥ इतिमहापातकयोगः ॥ ७६॥ भौमेनदृश्यतेलग्नंलग्नंपश्यतिभा
स्करः ॥ गुरुशुक्रौनदृश्येतेबलीवर्दनहन्यते ॥१०५॥ इतिबलीवर्दहंतायोगः ॥ ७७॥ आयस्थानगतेचंद्रेचंद्रस्थानेगतेरवौ ॥ हठेननागेविज्ञेयःपंचरात्रो· ५५
विशेषतः ॥१०६॥ इतिहठदंतायोगः ॥ ७८॥ मदनयोर्यदायोगोलग्नेचराहुदर्शने ॥ वृक्षस्थंमरणंतस्ययदिशुक्रसमोभवेत् ॥१०७॥ इतिवृक्षहंतायोगः

उत्पातकेकृशतनुर्निशिवादृश्येदृश्येदिवासिरिगर्भयदोकश्च ॥ एवंस्थितःसमफलःपृथिवीपतित्वंजातोन्ययायःकुरुतेपरिपूर्णमूर्तिः ॥१॥
॥इतिचंद्रयोगः॥ ॥इतिश्रीजातकाभरणोक्तनाभसयोगाःप्रोक्ताः॥ वामवामेग्रहाः सर्वेसूर्यादीनांमुनिस्तथा ॥ दरिद्रयोगंविजानीयान्नात्र
कार्याविचारणा ॥८४॥ इतिदरिद्रयोगाः ॥५६॥ ऋतुरेतश्चसंपर्काज्जायतेविषमागतिः ॥ करसंपुटमादायबंध्याभवतिनिश्चितम् ॥८५॥
॥इतिकरसंपुटयोगः॥५७॥इतिश्रीपंचमहापुरुषादियोगमिलित्वा अष्टषष्टि ६८ योगाउक्ताः अग्रेअन्येपि॥ मूलत्रिकोणस्वगृहोच्चसंस्था-
नभश्चराः केंद्रगतामिथःस्युः॥ तेकारकाख्याःकथितामुनींद्रैर्विज्ञेयप्राज्ञाभुवनेविशेषाः॥८६॥प्रालेयरश्मिर्यदिमूर्तिवर्तीस्वमंदिरेस्योनि
जतुंगजातः॥कुजार्कजार्कामरराजपूज्याःपरस्परंकारकसंज्ञिताश्च ॥८७॥ शुभग्रहेलग्नगतेंबुरांबु१०।४स्थितोग्रहःकारकसंज्ञकःस्या-
त्॥ तुंगत्रिकोणस्वगृहांशयातास्तेपोहमानेतपनोविशेषात् ॥८८॥ नीचान्वयेयद्यपिजातजन्मामंत्रीभवेत्कारकखेचराढ्यैः॥राजान्व
येयस्ययदिप्रसूतिर्भूमीपतित्वंसकथंनयाति॥८९॥ वेशिस्थितोयस्यशुभोनवेगोलग्नंविलग्नंचलवेस्वकीये॥ केंद्राणिसर्वाणिचसंग्रहा-
णितस्यालयेश्रीकुरुतेविलासं॥९०॥ केंद्रस्थितागुरुविलग्नकजन्मनाथामध्येचयस्यनितरांवितरंतिभाग्यं॥ शीर्षोदयोष्युदयभेषुगताभ
वेयुरारंतमध्यमविरामफलप्रदास्ते॥९१॥ इतिकारकयोगः॥६९॥ संस्थाविलग्नेप्यथसप्तमेचपतंगमुख्याशुभग्रहानितांतं॥ वदंतियो
गंशकटाख्यसंज्ञंजातोनरःस्याच्छकटोपजीवी ॥९२॥इतिशकटयोगः॥७०॥युग्मेयुग्मेभवेत्त्रीणिएकैकंचत्रिषुस्थितं॥ नंदायोगःसविज्ञे

अथसटीकविवाहवृंदावनप्रारम्भः॥

वि॰टी॰ १

श्रीगणेशाय नमः॥ अथ विवाहवृंदावनव्याख्यानं लिख्यते तीर्थानामधिपः कुंभक्षितपदो संत्यक्तवेलास्थितिर्यत्पर्याप्तकलद्विजाधिपसमीक्षाप्तोरु
मुत्सूरभूत् लक्ष्मीशोखिलदानवारिसततप्रस्निग्धसद्मक्षितिर्घोषध्वस्तमलोजयत्युरुकृपासिंधुर्गुरुः केशवः १ अर्थचतुष्टयवाची तत्र प्रथमं गुरुपक्षे के
शवो गुरुर्जयति सर्वोत्कर्षेण वर्तते गृणात्युपदिशति शास्त्राणीति गुरुः तमेव सर्वोत्कर्षं द्योतयति तीर्थानामधिप इत्यादिविशेषणैः तीर्थो ध्वरे गुरौ मार्ग इत्य
भिधानात् तीर्थानां गुरूणामधिपः महागुरुरित्यर्थः तल्लक्षणमाह स्मृतिः पिता पुत्रमुत्पाद्य संस्कृत्य वेदान्वेदार्थांश्च ग्राहयिता वृत्तिं कल्पयति स महागुरुर्भवतीति
यद्वा तीर्थानां गंगादीनामधिपः सर्वतीर्थमयो गुरुरिति स्मृतेः कुंभक्षितपदः कुंभतो राजानः तैः श्रितं सेवितं पदं यस्य सो तथा असंत्यक्तवेलास्थितिः न संत्यक्ता
वेलासु पूर्वाह्णादिकालेषु स्थितिर्विहिताचारो येनासौ तथा यत्पर्याप्तकलद्विजाधिपसमीक्षाप्तोरुमुत्सूरभूत् यस्मात्पर्याप्ताः प्राप्ताः कलाः पठनादयो येस्ते य
त्पर्याप्तकलाः ते च ते द्विजाधिपा विप्रश्रेष्ठास्तेषां समीक्षा सद्दर्शनं तया आप्ता प्राप्ता उरुः अधिका मुद्धर्षः तस्य पूरस्तं विभर्तीति तथा लक्ष्मीशः पशुधान्यादि
धनवान् यद्वा लक्ष्मीनाम्नी मम जननी तस्या ईशः पतिः अखिलदानवारिसतत प्रस्निग्धसद्मक्षितिः अखिलानि अनेकानि च तानि दानानि च तेषां वारि उद
कं तेन सततमनवरतं प्रस्निग्धा प्रकर्षेणार्द्रा सद्मक्षितिर्गृहभूमिर्यस्यासौ तथा घोषध्वस्तमलः घोषेण अध्ययनादिघोषश्रवणेन ध्वस्तो मलः पापं येन स तथा
जनानामिति शेषः उरुकृपासिंधुः उरुः पृथुर्या कृपा तस्याः सिंधुः कृपासागरः अथ समुद्रपक्षे कथंभूतः सिंधुः तीर्थानामधिपस्तीर्थराजः कुंभक्षितपदः कुंभ
तः पर्वताः मैनाकादयः तैः श्रितमाश्रितं पदं स्थानं यस्यासौ तथा पदंव्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यभिधानात् असंत्यक्तवेलास्थितिः वेला
समुद्रतीरं तस्याः स्थितिर्मर्यादा असंत्यक्ता वेलास्थितिर्येन स तथा यदित्यव्ययं यत् यदा काले पर्याप्तकालः परिपूर्णकलो द्विजाधिपश्चंद्रस्तस्य स
मीक्षा समुदयः तेन आप्ता प्राप्ता उरुरधिकतरा मुद्धर्षो येन स तथा तदा पूरभृत् जलपूरभृत्स्यात् चंद्रोदये हि समुद्रस्य जलभरः अत्रापि पूर्णचंद्रोदये रामः
अधिकपूर इति भावः लक्ष्मीशः लक्ष्म्या ईशः पिता अखिलदानवारिसततप्रस्निग्धसद्मक्षितिः अखिला दानवारयो देवाः तैः सततं प्रस्निग्धा शोभमाना १

सद्मस्थितिः स्थानभूमिर्यस्यासौ तया यत्स्थाने विष्ण्वादिदेवा निवसंतीत्यर्थः घोषध्वस्तमलः घोषेण गर्जनेन ध्वस्तः मलः पातकं येन स तया सुग्रीवसफ
लं जन्म येव संतिमहोदधौ अहनि घोषेण ब्रह्महत्या विलीयत इति पुराणात् अथ विष्णुपक्षे केशवो नारायणो जयति गुरुः उद्धवार्जुनादीनां ज्ञानोपदेष्टा
तीर्थानामधिपः गंगादीनां तत्पादजन्यत्वात् कुम्भक्षितपदः कुम्भः हरणीधरः शेषः तत्राश्रितं पदं यस्य स तया शेषशायीत्यर्थः असंत्यक्तवेलास्थितिः असं
त्यक्ता वेलायां समुद्रतीरे द्वारकादौ स्थितिर्निवसतिर्येनासौ तया यत्पर्याप्तकलद्विजाधिपसमीक्षाप्ताप्तोरुमुत्पूरभृत् यस्मात्पर्याप्ताः शौर्यादिकला येन सः यस
र्याप्तकलः द्विजाः पक्षिणस्तेषां अधिपो गरुडः यत्पर्याप्तकलश्चासौ द्विजाधिपश्च तस्य समीक्षा संदर्शनं तया आप्ता उरुमहती मुद् हर्षस्तस्याः पूरस्तं बिभर्तीति
तया लक्ष्मीशो लक्ष्मीपतिः अखिलदानवारिसततप्रस्निग्धसद्मस्थितिः दानवारि इति नाम दजलं तेन सततप्रस्निग्धा आर्द्रीकृता अखिला समग्रा दा
नवारिसततप्रस्निग्धा सद्मस्थितिर्गृहांगणभूमिर्यस्यासौ तया कृष्णरामावतारे यस्य गृहांगणभूमिरेवंविधेति पुराणप्रसिद्धा घोषध्वस्तमलः घोषाणां व्रज
स्थितगोपादीनां ध्वस्तः मलो येनासौ तया कृष्णावतारे प्रसिद्धमिदं उरुकृपासिंधुः महासत्वगुणत्वात् अथ सूर्यपक्षे केशवः सूर्यः केशा रश्मयः प्रशस्ताः
केशा यस्यासौ केशवः केशाद्वोऽन्यतरस्यामिति प्रशंसायां मतुबर्थे वः कथंभूतः केशवः गुरुः रोमकमयासुरादीनां ज्योतिःशास्त्रादिज्ञानोपदेष्टा अत एव ती
र्थानामधीपः तीर्थानां ज्योतिःशास्त्रादीनां अधिपः प्रवर्तकः तीर्थं शास्त्राध्वरक्षेत्रेष्वित्यभिधानात् कुम्भक्षितपदः कुम्भः उदयाचलः तत्राश्रितं पदं येन तथा
उदयशिखरिशृंगस्वर्णसिंहासनस्थ इत्युक्तः असंत्यक्तवेलास्थितिः वेला कालः तस्य स्थितिर्वत्सरः दिनादिनियमः असंत्यक्ता वेलास्थितिर्येनासौ तया य
त्पर्याप्तकलद्विजाधिपसमीक्षाकर्त्री आप्तोरुमुत्पूरभृत्स्यात् यस्मात्सूर्यात्पर्याप्ताः प्राप्ताः कला येनासौ पर्याप्तकलः स चासौ द्विजाधिपश्चंद्रस्तस्य समी
क्षा संदर्शनं चंद्रस्य प्रतिदिनं कलावृद्धिः सपक्षसूर्यकिरणसंसर्गाद्भवतीति ग्रहगणितेवासना प्रसिद्धा आप्तास्तद्दर्शनलालसाः तेषां उरुमुत्पूरः महाहर्ष
भरस्तं बिभर्ति पुष्णातीति तया लक्ष्मीशः लक्ष्म्यादीप्तयः तासामीशः अखिलतेजसाधीशः दानवारिसततप्रस्निसद्मस्थितिः अखिलाश्च ते दानवारयश्च इं

इ्रादिदेवाः तैः सततंप्रस्निग्धाशोभमानासद्मक्षितिः स्थानभूमिर्यस्यासौतथा इंद्रादिदेवैः सेवितइतितात्पर्यार्थः घोषध्वस्तमलः घोषेणनामगर्जनेनध्वस्तोमलः येनासौतथा उरुरूपासिंधुः महारूपासागरः स्थावरजंगमजगतइतिशेषः आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजा इत्याद्युक्तेः इत्येतेमदुदितश्लोकस्यार्थः अथप्रकृतंबध्नातिस्मविवाहपूर्वकपदंवृंदावनंकेशवादित्योयत्कुटिलोक्तियुक्तिबहुलंबहुर्थगूढंपदैः हेलागम्यमनल्पहृष्टसुधियांतन्नतरेषातयातस्मात्तद्विवृत्तिविशेषसहितामारब्धुमस्युत्सुकः रत्नानाकुलागमपटुर्भुविगीतकीर्तिः श्रीकेशवस्यतनयः कुरुतेगणेशः टीकांभ्रमांधतमसापहरांविवाहवृंदावनस्यकरपीडनदीपिकाख्यां उव्याख्यामात्रेणतुष्यंतुयेकेचोच्चावचाइह मतिमंतस्तुसद्युक्तिविशेषरचनैरपि ४कृत्वादोग्रहलाघवाख्यकरणांतिथ्यादिसिद्धिदयंश्लोकैः श्राद्धविधिंसवासनतयालीलावतीव्याकृतिं सप्रक्षेपमुहूर्ततत्वनिवृतिंपर्वादिसत्निर्णयंतस्मात्मंगलनिर्णयाद्ययकृतावैवाह

श्रीशार्ङ्गिणोः सृजतुवोनवसन्निवेशः क्लेशाव्ययंचलवलन्नयनांचलश्रीः यत्रांचलग्रथनमंगलमाचचारश्रृंगारहारमणिकौस्तुभरश्मिगुंफः १॥

सद्दीपिका ५ श्रीभरद्वाजमुनिश्रेष्ठवंशोद्भवऔदीच्यज्ञातिमंडनः सकलागमाचार्यवर्योज्योतिर्विकुलावतंसोनेककलाकलापचतुरः श्रीदैवज्ञराणगतनयः श्रीकेशवार्कः करणः कंठीरवाद्युत्क्वानिजांसत्कविताविशेषरचनासमेतांवाक्यविचारचातुरीं दर्शयन्संहितास्कंधैकदेशभूतंविवाहपटलंचिकीर्षुर्जन्मजन्मांतरार्जितदुरितोत्सन्नप्रत्यूहनिरासेनग्रंथसमाप्त्यर्थंसमाप्तेपिग्रंथतत्परिचयार्थंशिष्टाचारपरिपालनेनशिष्यशिक्षार्थंच आशीर्लक्षणंमंगलमाचरन् श्रीलक्ष्मीनारायणयोर्विवाहलक्षणंप्रथमसंनिवेशनंवसंततिलकवृत्तेनवर्णयति श्रीशार्ङ्गिणोरिति श्रयतेविश्वमेतांसाश्रीः शार्ङ्गंयस्यास्तीतिशार्ङ्गीतयोर्लक्ष्मीनारायणयोः सनवसन्निवेशः नवसंगमः संनिवेशस्तुसंस्थायांप्रवेशसंगमेपिचत्यभि

धानात् वः युष्माकं क्लेशव्ययं संस्जतु करोत्वित्याशीः नवसंनिवेशजातिं विशेषणद्वारेणाह चलवलन्निति चलतस्तौ चलौ वलतस्तौ वलंतौ तस्यानांतर गमनं चलनं तस्मात्परावर्तनं वलनं चलाश्चवलंतश्च चलवलंतः नयनानाम चलाः प्रांतान यनांचलाः चलवलंतश्चते नयनांचलाश्च चवलंनयनांचला स्तेषां श्रीः शोभा यस्मिन्नवसंनिवेशस्तया समासांतविधेरनित्यत्वात्कप्रत्ययाभावः सानुरागपरस्परावलोकनेन नयनांचलौ चलौ वलंतौ चेति जातिः ल ज्जाकुलतया नयनांचलाभ्यामेवावलोकनं युक्तं सकः यत्र नवसंनिवेशे शृंगारहारमणिकौस्तुभरश्मिगुंफः अंचलग्रथनमंगलमाचचार आचीर्णवान् शृंगा रस्य हारः शृंगारहारः तस्य मणिः शृंगारहारमणिः स च कौस्तुभश्च शृंगारहारमणिकौस्तुभौ तयोः रश्मयस्तेषां गुंफः गुंफनं ग्रथनं गुंफनं गुंफः ग्रथनमिति या वत् अंचलयोर्ग्रथनं तदेव मंगलं अंचलग्रथनमंगलं श्रियः शृंगारहारमणिः शार्ङ्गिणस्तु कौस्तुभः तद्रश्मीनां परस्परं ग्रथनं अंचलग्रथनभावं प्रापेत्यर्थः

संवर्ग्यैर्गर्गभृगुभागुरिरैभ्यगीर्भ्यः सारं वराहमिहिरादिमतानुसारं

विवाहसमये वधूवरप्रावृतवस्त्रांचलग्रथनमंगलत्वेन क्रियत इति शिष्टसमाचारः स तु प्रागेव शृंगारहारमणिकौस्तुभरश्मिगुंफनेनैव निष्पन्न इति भावः अत्र मंगलार्थं गणादिदोषनिरासार्थं वादौ श्रीशब्दप्रयोगः तदुक्तं देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ते सर्वे नैव निंद्याः स्युर्लिपितो गणतोपि वेति यथा श्रियः कुरूणामधिपस्येत्यादौ अयास्य ग्रंथस्य आर्षमूलत्वेन प्रामाण्यं तथा प्राचीनग्रंथेभ्यो वैशिष्ट्यं द्योतयन् संबंधादिचतु ष्टयगर्भं तदारंभहेतुं वसंततिलकेनाह संवर्ग्येति अहं विवाहवृंदावनं नाम ग्रंथं विरचयामि अन्वर्थनाम विवाह इव विवाहः स्त्रीपुरुषसमाग मलक्षणः तदर्थं वृंदावनमिव वृंदावनं विवाहवृंदावनं कृष्णो हि तत्र गोपीभिः सह परस्परपाणिधारणपूर्वकं रासक्रीडादिकं कृतवान् अन्येपि सूरसेनसु

षणाद्यः वृंदावनंनामवनंयमुनातीरे प्रसिद्धं यद्वाविवाहानांवृंदंविवाहवृंदंनद्वतीतिविवाहवृंदावनं अत्रहिसम्यक्सदसत्फलनिरूपणेन असत्समयपरित्या
गात्समयविवाहकरणेनपुत्राद्यभिवृद्धिद्वाराविवाहावनत्वंयुक्तमस्यग्रंथस्यकथंभूतंविवाहवृंदावनंस्फारत्स्फुरत्परिमलाढ्यफलंस्फारंतितानिस्फारंतिविस्त
तानिस्फुरस्फूर्तौस्फुरंतितानिस्फुरंतिविकसमानानिपरिगतोमलःपरिमलःदोषाभावःकुगतिप्रादयश्चेतितत्पुरुषःतेनाढ्यानिपरिमलाढ्यानिस्फारंतिस्फुरं
निपरिमलाढ्यानिफलानिनक्षत्रफलादीनियस्मिंस्तथापुनःकीदृशंविचाररम्यंनानाविधविरुद्धमुनिवाक्यानांपूर्वपक्षसिद्धांतरूपसारासारविचारेणरम्यं किंकृत्वा
गर्गादिगीर्भ्यःसारंसंवर्ग्यगर्गादयोयवनसितपुलस्त्यादीनामुपलक्षणंतेषामप्यत्रमतोपन्यासदर्शनात् गर्गादीनांगिरःवचनानितेभ्यःएकदेशीयादिवाक्यप
रित्यागेनबहुमतस्वीकारात्मकंसारंसंवर्ग्यमेलयित्वा नकेवलंसमत्वेनैवसारंसंवर्गितं किंतुवराहमिहिरादिमतानुसारं आदिशब्देनलल्लश्रीपतिश्रीधरादी

स्फारत्स्फुरत्परिमलाढ्यफलं विवाहवृंदावनं विरचयामि विचाररम्यं २

नांग्रहणं वराहमिहिरादीनांमतमनुसरतीतितथागर्गादिवाक्यानांसारासारपर्यालोचनयावराहादिमतानुसारंविचार्यविरचयामीत्यर्थः अत्रत्यानांमद्वच
नानामपिगर्गादिमुनिवाक्यमूलत्वेनप्रामाण्यमितिभावः स्फारदित्यादिविशेषणद्वयेनपूर्वग्रंथेभ्योस्यवैशिष्ट्यंद्योतितं अथसंबंधादिचतुष्टयकथनमंतरेण
शास्त्रारंभवैयर्थ्यप्रसंगः तदुक्तंसिद्धिःश्रोतृप्रवृत्तीनांसंबंधकथनाद्यतः तस्मात्सर्वेषुशास्त्रेषुसंबंधःपूर्वउच्यते किमेवात्राभिधेयंस्यादितिपृष्टस्तुकेनचित
यदिनप्रोच्यतेतस्मैफलशून्यंतुतद्भवेत् सर्वस्यैवहिशास्त्रस्यकर्मणोवापिकस्यचित् यावत्प्रयोजनंनोक्तंतावत्तत्केनगृह्यतइति एवंवृद्धोपदेशंहृदिमत्वाअ
नेनैवपद्येनसंबंधःसूचितः परिमलाढ्यफलमित्यनेन [illegible] प्रतिपादकत्वेनसंबंधोवाप्रयोजनंतुशुभाशुभफलादे

शः तज्जिज्ञासुरधिकारी एतदुक्तं भवति चतुराननमुखाद्विनिसृतस्यास्य शास्त्रस्य नारदवसिष्ठादिमुनिपरंपरयास्मिन्लोके प्रथितस्य ब्रह्मणा सह संबंधः उ
क्तं च नारदेन अस्य शास्त्रस्य संबंधो वेदांगमिति धात्रतः इति अस्य शास्त्रं वेदांगमिति कृत्वा धात्रतः संबंध इत्यन्वयः यद्वा वक्ष्यमाणाभिधेयस्य तत्प्रतिपादकशास्त्र
स्य च प्रतिपाद्यप्रतिपादकत्वेन संबंधः नक्षत्रशुद्धिकालमीमांसाराशिमेलकनवांशविचारग्रहहागुणचंद्रताराबलराहुलत्तातिथ्यादिलग्नशुद्धिगोधूलिकगोचरनि
र्णयशुभाशुभयोगभावफलयोगबलसामुद्रिकलक्षणादिमिश्रफलवधूवरप्रश्नादिकप्रतिपाद्यत्वादत्राभिधेयं प्रयोजनं तु जन्मजन्मांतरार्जितसदसत्कर्मवि
पाकरूपशुभाशुभफलसूचकनक्षत्रग्रहफलादिना जगतः शुभाशुभनिरूपणं तत्राशुभफलं ग्रहशांत्यादिना ग्रहबलाद्युपेतः सत्समये विवाहादिसंपादनेन वा
सक्कुननिमित्तादिना वंचयिष्यत इति कृत्वा तथा तत्प्रतीकारनिरूपणं च उक्तं च नारदेन प्रयोजनं तु जगतः शुभाशुभनिरूपणमिति तज्जिज्ञासुरधिकारी स
च द्विज एव न तु शूद्रादिः वेदांगत्वात् यतो द्विजैरेव सांगा वेदा ध्येतव्या ज्ञातव्याश्च उक्तं च तस्माद्द्विजैरध्ययनीयमेतत्पुण्यं रहस्यं परमं च तत्त्वमिति अध्यापने
तु ब्राह्मण एवाधिकारी क्षत्रियवैश्ययोरध्यापननिषेधात् महाप्रयोजनं तु वेदांगाध्ययनेन धर्मपरिपालनत्वात् जगतोऽशुभनिराकरणेन च सुकृतसंचयः यद्वा
त्रिकालदर्शित्वेन योगितुल्यावस्थां गतस्य योगिवन्निरतिशयानंदावाप्तिलक्षणमोक्षावाप्तिः उक्तं च श्रीमद्भागवते गर्गं प्रति नंदेन ज्योतिषामयनं साक्षा
द्यत्तत् ज्ञानमतींद्रियं प्रणीतं भवता येन पुमान्वेद परावरमिति सिद्धांतेऽपि यो ज्योतिषं वेत्ति नरः स सम्यक् धर्मार्थमोक्षान् लभते यशश्चेति गर्गोऽपि ग्रंथतश्चार्थ
तश्चैतत्कृत्स्नं जानाति यो द्विजः अग्रभुक् स भवेच्छ्राद्धे पूजितः पंक्तिपावनमिति अत्र सम्यक्पदग्रहणेन असम्यक्शास्त्रपरिज्ञानाद्यथाशास्त्रं विवाहादि
फलादेशकस्य पंक्तिदूषकत्वमस्तीति गम्यते यत उक्तं तेनैव अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः नक्षत्रसू
चकोद्दिष्टमुपवासं करोति यः स व्रजत्यंधतामिस्रं सार्द्धमृक्षविटं बिनेति ऋक्षविटं विना नक्षत्रसूचकेन अतश्चायथाशास्त्रमादेशक एव नक्षत्रसूचकः
नत्वकृत्स्नशास्त्रपरिज्ञातादैवज्ञत्वं प्रपद्यत इत्युक्तत्वात् पूर्वार्जितसदसत्कर्मविपाकादेवमित्युच्यते तज्जानातीति दैवज्ञः तस्य भावो दैवज्ञत्वं वृहस्प

तिरपि दैवज्ञैः शास्त्रतत्त्वज्ञैर्मुहूर्तोऽन्विष्यते यदि सन्मुहूर्तः समन्वेष्यो नान्यैर्नक्षत्रसूचकैः इति अत एव कश्यपेन वेदे पारगसाहित्ये नैव नक्षत्रसूचकस्य श्राद्धे पूज्यत्वं स्मर्यते अत्रिर्विश्वंभहंता च व्यंगो नक्षत्रसूचकः काणः कुंठश्च मंदश्च श्वित्री मूर्खः सुदत्तवान् सर्वश्राद्धे नियोक्तव्या मिश्रिता वेदपारगैरिति दे षोपि स्मर्यते प्रायश्चित्तं चिकित्सां च ज्योतिषं धर्मनिर्णयं विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकं इति अतो सम्यक् शास्त्रवेदनादयथाशास्त्रफलादेशको नक्षत्रसूचकः न तु शास्त्रैकदेशवेत्तेति सिद्धं अत एवोक्तं गर्गादिभिः वनं समाश्रिता येपि निर्ममा निःपरिग्रहाः अपि ते परिपृच्छंति ज्योतिषां गतिकोविदं मुहूर्ततिथिनक्षत्रमृतवश्चायने तथा सर्वाण्येवाकुलानि स्युर्न स्यात्सांवत्सरो यदि नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यत इत्यादि मुक्तावल्यादिष्वपि दशदिनकृतपापं हंति सिद्धांतवेत्ता त्रिदिनजनितमहस्तत्रवेत्ता निहंति करणभगणवेत्ता चैकरात्रोत्थपापं जनयति बहुपापं चै कनक्षत्रसूचीति एकः केवलः नक्षत्रसूचकः अतोस्य शास्त्रस्यैकदेशाध्ययनेपि त्रैवर्णिकस्यैवाधिकारोस्तीति सिद्धं तत्राप्यार्यवाक्यानां पाठमात्रेणापि फलमस्ति स्मृत्यादिपठनवदिति अथ विवाहादिसर्वकार्येषु नारदादिभिः प्रथममुद्दिष्टत्वात्संचांगशुद्धेः प्राधान्यं तत्रापि प्राधान्यं नक्षत्रशुद्धेः तथा चाहुः भावांशशुद्धोदयमप्यशुद्धं भशुद्धिहीनं प्रवदंति संतः तस्माद्विशेषेण भशुद्धिमादौ विचार्य कार्यं शुभमाहुरार्या इति अतः सैव प्रथममभिधीयते सा तु कृतनक्षत्राणामेव अतः प्रथमं शुभनक्षत्राण्युक्त्वा तत्प्रसंगेन शुभान्सौरमासांश्चाह २ वंशस्थवृत्तं ध्रुवाणि रोहिणीत्र्युत्तराणि अनुराधादीनि प्रसिद्धानि करो हस्तः तेषां समाहारे एकवद्भावः क्लीबत्वं च मघास्वात्योः प्रसिद्धे अयमेकादशनक्षत्रात्मको गणः चेद्दूषणैः वक्ष्यमाणपापवेधादिदोषरहिता तदा मृगीदृशां स्त्रीणां मृगजातिः स्त्री मृगी तस्या दृगिव दृग्यासां तासां करग्रहे विवाहे मंगलकृत्स्यात् वक्ष्यति च स्फूर्दद्दूषणभूषणेत्यादि क्रूरवेधादि दोषेत्वशुभफलं तत्र तत्र वक्ष्यति रवेरिति षण्णां गृहाणां समाहारः षड्गृही मकर आदिर्यस्याः सा मकरादिः सा चासौ षड्गृही च मकरादिषड्गृही अमीना मीनरहिता मकरकुंभमेषवृषमिथुनस्थोऽर्को विवाहे मंगलकृदित्यर्थः नन्वत्र नक्षत्रग्रहादीनां शुभफलकर्तृत्वं कथं युज्यते प्राचीनसदसत्कर्मविपाक

रूपस्य दैवस्यावश्यंभावित्वात् तथा च शौनकः येन तु यत्प्राप्तव्यं तस्य विधानं सुरेशसचिवोपि यः साक्षान्नियतिज्ञः सोपि न शक्तो न्यथाकर्तुं तद्विज्ञानोपा
यं लग्नविधानेन संप्रवक्ष्यामि जन्मन्यथवा प्रश्ने तत्सदृशफल विवाहेपीति अतो यथोक्ता विवाहादिसमया दैवपाकज्ञानोपायाः विवाहादिषु यादृशसमया
वाप्तिस्तादृशं दैवमस्तीति ज्ञेयं यत उक्तं तेनैव वरणप्रदानपरिणयशचीप्रपूजाभिषेककरणानि सुशुभेतिथौ विलग्नेन भवंति किलाल्पपुण्यानामिति अतो
विवाहादिशास्त्रं दैवज्ञापकमेवेति नैवं सद्युक्तमन्यसे विवाहादिषु विहितशुभकालस्य यंत्रादिना प्रयत्नेन पुरुषसाध्यत्वात् सत्युभययोगे कर्मसिद्धिर्न केवलं
दैवेनेति तथा च वक्ष्यति फलेद्यदि प्राक्तनमेव तत्किं कृष्याद्युपायेषु परः प्रयत्नः श्रुतिः स्मृतिश्चापि नृणां निषेधविध्यात्मके कर्मणि किं निषण्णेति यदि तु दैवमेव
फलेत्तदा सर्वोपि जनः कृष्याद्युपायेषु कथं प्रवर्तते किंच निषेधविध्यात्मकाः श्रुतिस्मृत्यादयोपि निरर्थकाः स्युः न ह्यसमारोहेन्न कूपमवेक्षेत न बाहुभ्यां नदीं तरेन्न

ध्रुवानुराधामृगमूलरेवतीकरंमघास्वातिरदूषणोगणः

मं शयमभ्यापद्यतेत्यादीनामाश्वलायनादिकल्पानां श्रीकामः पुष्टिकामो वा ग्रहयज्ञं समाचरेदित्यादियाज्ञवल्क्यादिवचनानां चिकित्सादिशास्त्रस्य च वैय
र्थ्यप्रसंगः स्यादित्यर्थः तथा च याज्ञवल्क्यः दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकमिति कर्मसिद्धिः फलावाप्तिरिष्टानिष्ट
प्राप्तिलक्षणा सा च केवलं दैवेन व्यवस्थिता अपि तु पुरुषकारेपि ———— पुरुषकारः प्रयत्नः अपि च पुरुषकाराभावे दैवमेव नास्तीत्याह तत्र दैवमि
ति पूर्वदेहार्जितं पौरुषमेव दैवमित्युच्यते तच्च अल्पपुरुषकारादनंतरं महाफलोदयेन अभिव्यक्तं भवत्येवाह वसंतराजः पूर्वजन्मजनितं पुराविदः क
र्म दैवमिति संप्रचक्षते उद्यमेन तदुपार्जितं तदा वांछितं फलति नैव केवलमिति तस्मात्प्रयत्नाभावे दैवं नास्तीत्यतो विवाहादिषु शुभकालावाप्तिलक्षणो यत्नो वि

॰टी॰ धातव्यः तथाचनारदः सर्वाश्रमाणामास्थेयं गृहस्थाश्रममुत्तमं यतस्तदपियोषायांशीलवत्यांस्थितंततः तस्याःसच्छीललब्धिस्तुसुलग्नवशतः खलुपिता
५ महोक्तांसंवीक्ष्यलग्नशुद्धिंप्रचक्ष्महे इति अतोदैवयत्नयोरन्यतरेणफलसिद्धिर्नभवतीत्यत्रदृष्टांतमाह याज्ञवल्क्यः यथाह्येकेन चक्रेणरथस्यनगतिर्भवेत्
तद्वत्पुरुषकारेणविनादैवंनसिध्यतीति अतएवग्रंथ— कारोपिवक्ष्यति प्राक्कर्मबीजंसलिलानलोर्वीसंस्कारवत्कर्मविधीयमानं शोषाय योषायचतस्यतस्मात्स
दासदाचारवतांनहानिरिति यस्मात्कर्मतस्यशोषाययोषायच अधुनाविधीयमानंकर्मभवति किंवत् बीजंसलिलानलोर्वीसंस्कारवत् यथासद्बीजंशुभैःसलिला
दिसंस्कारैःसंस्कृतंसदुदेतिवर्धतेच तद्वत्प्राक्कर्मा—पिसेहितेनसत्प्रयत्नेनवर्धते अन्यथाक्षीयतइत्यर्थः तस्मात्कारणाच्छास्त्रविहितविवाहादिशुभकालग्रहशां
तिचिकित्सादिसदाचारवतांपुरुषाणांसदानहानिःस्यात् अपिचदैवंकिलपुरुषनिष्ठंतद्देशकालवशतएवविपच्यतेदुष्टमपिदुष्टांतरसाहित्येनेवइष्टकारिय

रवेरमीनामकरादिषड्गृहीकुरग्रहेमंगलकृन्नगीदृशाम् ३

थादुर्जनोरंध्रान्वेषणेन अतएवोक्तंश्रीपतिना अकालचर्यामृगयाचसाहसंसुदूरयानंगजवाजिवाहनं गृहेपरेषांगमनंचवर्जयेद्दुहेषुराजाविषमस्थितेष्विहेति
वसंतराजोपिनैतदेवमिहयेनदेहिनांपूर्वकर्मविहितंकुतोपिहिदेशकालवशतोविपच्यतेयुज्यते व्यवहितंकथंतुतदितिएतदेवंप्रामाण्यशेषंस्पष्टं अतश्चदुष्टमपि
दैवफलंविवाहादिसत्समयावाप्तिरूपयत्नेननिवर्त्यतएव यथाहसएवसर्पवह्निविषकंटकादिकंयेनदैवशरणोपिमानवःदूरतस्त्यजतिपौरुषसदातेन नःस्फुरति
दैवताधिकंपौरुषेणहृदयेसितांगतिंप्राप्नुवंतिपुरुषाःसुमेधसःयांतिदैवशरणीलयंयथापादयोर्ज्वलतिदावपावकेइति अतःशकुनगोचरादिना आवेदितंअ ग॰
शुभंदैवफलंशुभेनप्रयत्नेनसंतोवंचयंत्येव तथाचसएवाह तन्निरूप्यशकुनेनदुःखदंवंचयतिनिपतंसमुद्यतंपौरुषेणपुरुषाःसुमेधसःसंश्रयंतिपुनरा ५

त्मनोहितमिति तद्दैव फलं दुःखदं समुद्यतं शकुनेन निरूप्य पुरुषाः पौरुषेण वंचयंतीत्यन्वयः अथानंतरोक्तेः सर्पवृक्षादिदृष्टांतः पौरुषमेव फलसाधनं कथं
नस्यात् उच्यते समानभूमिषु समानसलिलादिसंस्कारेपि फलवैचित्र्यदर्शनात्कारणांतरं कल्प्यते तद्दैवं दैवमिति अत उभययोगे सत्येव फलसिद्धिरिति अथ केचित्तु
द्धिः कर्मानुसारिणीति मन्यमानाः प्रयत्नोपि दैवानुरूप इति कृत्वा दैवमेव फलसिद्धेः कारणमिति मन्यंते तन्न चतुरस्रं अनवस्थादोषप्रसंगात् तथाहि प्राक्कर्मार्जितपौ
रुषमेव किल दैवमुच्यते अत्रत्यः प्रयत्नः प्राचीनपौरुषलक्षणेन दैवेन जन्यः तदपि पौरुषं तत्प्राचीनपौरुषजन्यं तदपि तत्प्राचीनपौरुषजन्यमित्यनवस्था अतः
प्रयत्नोपि दैवप्रेरित इत्यनुपपन्नं नैतन्मन्यामहे न खल्वियमनवस्था दूषणं अनादिसंसारे बीजांकुरन्यायदृष्टांतसद्भावात् न चैतद्युक्तं नहि बीजांकुरन्यायाद्दै
वमेव मूल इति निश्चीयते नापि प्रयत्नः अतः सत्युभययोगे फलसिद्धिरिति मतं चतुरस्रं एवं चेत्तर्हि शौनकोक्तवाक्यानां पूर्वोक्तानां का संगतिः उच्यते दैवं तु दृढक
र्मरूपमदृढकर्मरूपं चेति द्विविधं तत्र दृढकर्मरूपस्यावश्यंभावित्वाद्ग्रहशांत्यादिरूपेण संपूर्णप्रयत्नेनापि तन्निवारयितुं न शक्यते दृढमूलत्वात् खरतरवाता
घातेपि दृढमूलपादपवत् अदृढकर्मरूपं तु प्रयत्नेन निवार्यते प्रशिथिलमूलपादपवत् तथा च जातके येधर्मकर्मनिरता इत्यादि प्रयत्नाभावे तु विपच्यत इवत
था च तत्रैव पापिष्ठा ये दुराचारा देवब्राह्मणनिंदकाः अपथ्यभोजिनस्तेषामकालमरणं ध्रुवमिति अतएव चिकित्साशास्त्रेपि पूर्वजन्मकृतं पापं व्याधिरूपेण
बाध्यते इति सर्वव्याधीनां साधारण्येन कर्मजन्यत्वेपि साध्यासाध्यत्वेन द्वैविध्यमस्ति तत्रापि कृच्छ्रोपायः सुखोपायो द्विविधः साध्य उच्यते असाध्यो द्वि
धो ज्ञेयो साध्यो यश्चाप्रतिक्रियः साध्यासाध्यत्वमायाति साध्यश्चासाध्यतां तथा घ्नंति प्राणान्नसाध्यस्तु नराणामक्रियावतामित्यादिना अचिकित्सितव्याधे
र्दृढकर्ममूलत्वमन्येषामदृढकर्ममूलत्वं निश्चीयते अतो दैवस्येह द्वैविध्यमस्ति अतः शौनकादिवाक्यानां पूर्वपक्षरचितानामयमर्थः येन त्विति येन
पुरुषेण यस्मात्प्राप्तव्यं अवश्यं भोक्तव्यं दृढकर्मोपार्जितमिति यावत् तद्बृहस्पतिरप्यन्यथाकर्तुं न शक्तः अर्थादन्यददृढकर्मोपार्जितमन्यथाकर्तुं शक्त इ
त्यर्थः वरणप्रदानेति तद्विज्ञानोपायमिति अत्रायं भावः यस्य परिणयनादिकाले दुष्टबृहस्पति चंद्रादौ दृष्टे सति तद्दैवपाकस्य तादृशमशुभफलमिति ज्ञा

टी॰ ६

तं उक्तं च विवाहपटलांते तेनैव एवं बुध्वा मतिमान् भविष्यफलमादिशेत्समुद्वाहे इति अतो बौधायनादिविहितेन तच्छांतिरूपेण धर्मेण प्रयत्नात्मकेन तन्निवर्त्यते धर्मेण पापमपनुदतीतिश्रुतेः शुभकालेन तु अशुभदैवफलं निवर्त्यते शुभं तु वर्ध्यते अत एव तत्रैव तेनैवोक्तं सुपरीक्षितं विलग्नं धर्मार्थसुखाय भवतिदंपत्योः तद्विपरीतं निमेषादनागतातीतिकालेन अपरीक्षितं विलग्नं नहि देयं पंडितेन दैवविदा अयशो बुनिधौ मज्जति शास्त्रमविज्ञाय यो दद्यादिति ॥ बृहस्पतिरपि आह स्वभावाद्देवकालो यं शुभाशुभसमन्वितः अनादिनिधनः सर्वो न निर्दोषो न निर्गुणः तस्मान्निर्दोषकालार्थं मुहूर्तमधिगच्छतां कालः शुभागुणैर्युक्तो बलवद्भिः शुभप्रदः दोषैर्युक्तोपि च प्राणैर्बहुमिर्व्यत्ययं द्वयोरिति अतः शुभकालबलेन पूर्वकर्मोपार्जितमशुभमपि निवर्त्यत इति सर्वमनवद्यं अतो न सत्रादीनां कालावयवत्वात्सर्वकर्मसु शुभाशुभफलदातृत्वमस्तीति सिद्धं ३ अथ पूर्वाफल्गुनीपुष्यौ कैश्चिदुक्तौ तन्मतनिरासार्थमाह इदं वज्रो पंद्रं

प्राचेतसः प्राह शुभं भगर्क्षे सीता तदूढा न सुखं शिषेवे

ज्ञामिश्रणात्मिको पजातिकेयं प्रकृष्टं चेतो यस्यासौ प्रचेताः तस्यापत्यं प्राचेतसो मुनिविशेषः स भगर्क्षे पूर्वाफल्गुनीनक्षत्रं शिवं शुभमस्मिन्विवाहे यस्मात् ह तस्मिन्नक्षत्रे ऊढा परिणीता सीता सुखं न सिषेवे न सेवितवती वनवासरक्षोहरणादिकं दुःखमेवाप अतो गर्गशौनकनारदादिभिर्नोक्तमिति कृत्वा तन्नादरणीयमिति भावः ननु विवाहे भगर्क्षविधायकस्य मुनिवचनस्य कथमयं प्रत्यक्षबाधः उच्यते तस्य सीताविवाहात्प्राक्युगविशेषविषयत्वादिति योजनीयं पुष्यस्तु अतिक्रामपुष्यति वर्द्धयति एवं कारणादस्मिन्विवाहविषये स पुष्यः प्रजापतेर्ब्रह्मणः सकाशात् शापमाप्तवान् पुष्यातिकार्याणीति पु राम

ष्यः क्ववंतो निपातः ब्रह्मणः किल विवाहः पुष्ये भूत अनंतरं शंभविवाहसमये पार्वतीसौंदर्यदर्शनात्संचलितचेतसो ब्रह्मणः परिहितवस्त्रांतच्युतवीर्य ६

सहस्रद्वयेन परामृष्टस्य तंतुमध्यस्थितकणसहस्रेभ्यो निष्पन्ना अंगुष्ठप्रमाणा षष्टिसहस्रमितो वालखिल्या नाम मुनयो भूवन्निति ब्रह्मपुराणादौ प्रसिद्धं ततोनुतप्तो ब्रह्मा ज्ञानदृष्ट्यासम्यगवलोक्य पुष्यकृतविवाहनिमित्तमिदमिति कामोद्रेकरूपं वैकृतमिति निश्चित्य विवाहविषये पुष्यं शप्तवानिति कृत्वा गर्गा दिभिः स निषिद्ध इति भावः तथा च शौनकः अब्दचतुष्कात्कन्या गुरुकुलविद्वेषिणी भवति पुष्ये रूपणा पतिसंत्यक्ता वैधव्यं वा समाप्नोतीति अन्येपि ग्रहेणवि द्धोप्यशुभगान्वितोपीति अथ विवाहे प्रावृट्कालादिकं केश्चिदुक्तं तन्मतं निरस्यति ४ इद्द्वं शावृंशस्य मिश्रणात्मिकोपजातिका प्रावृट्वर्षाः वसंतः प्रसिद्धः ऊर्जः कार्तिकः सहा मार्गशीर्षः तेषु करग्रहः परैरन्यैर्वात्स्यपराशरादिभिः उदाहारि उदाहृतः तन्मतं हारि न हरतीति हारि मनोहारि न चाविस्तरार्थः तत्र हेतुमाह रवे

पुष्यस्तु पुष्यत्यतिकाममेव प्रजापतेरापस शापमस्मात् ४ प्रावृट्नभस्यतोर्जसहः करग्रहः परैरुदाहारि नहारि तन्मतं
रवेरवैसारिणमुत्तरायणं पुरंध्रिपाणिग्रहणे परायणं ५

रिति यतो रवेरुत्तरायणं मकरादिषट्कं अवैसारिणं मीनरहितं मीनो वैसारिणो
ऊजइत्यभिधानात् पुरंध्रीणां स्त्रीणां पाणिग्रहणे परायणं अतिश्रेष्टं अमीनोत्तरायणस्य गर्गादिबहुसंमतत्वाद्दक्षिणांतः पातिनां प्रावृडादीनां ग्रहणमे कदेशीयमतोनादरणीयमिति भावः तथा च ज्योतिःसारे वात्स्यो वर्षमनूनमिच्छति तया रैभ्यो यनं चोत्तरं स्त्रीनामा नमतुं विहाय मुनयो मांडव्य शिष्या जगुः चैत्रं प्रोह्य पराशरः परिणये पौषं चं द्रो भाग्यदं त्वाषाढादि चतुष्टयं न शुभदं केश्चिद्व्यदिष्टं बुधैरिति स्त्रीनामा ऋतुः प्रावृट् शरच्च शौनकस्तु वर्णविशेषेण ऋ तुविशेषमाह परिणयकालः शुभदः शरद्दिवसंते च विप्राणां राजन्यवैश्ययोरपि शुभदो ग्रीष्मः समुद्दिष्टः घनसमये शूद्राणां शिशिरे चान्यत्र संक रभवानामिति नारदस्तु अप्रबुद्धो हृषीकेशो यावत्तावन्न मंगलमिति शुक्लैकादश्युत्तरकार्तिकं मार्गशीर्षं च विधत्ते अन्येपि नाषाढप्रभृति चतुष्टं।

टी॰ येविवाहइत्यादिनानौविधत्ते शौनकस्तुतौनिषेधति कुलटावैकार्तिकेमासि सौम्येपरवेश्मरताकलहपरादुःखसंतप्तेति शार्ङ्गधरादिभिस्तुतौमध्य
७ मौउक्तौ सर्वंमतिदेशाचारतोत्रव्यवस्थाज्ञेया देशेदेशेयास्थितिःसैवकार्येतिवराहोक्तत्वात् दाक्षिणात्याहिमार्गशीर्षेविवाहंकुर्वंति केचित् गुर्जराःका
र्तिकेपीत्यादि अतोग्रंथकृतास्वदेशाभिप्रायेणेदमुक्तं इतिसर्वमनवद्यं ५ अथनक्षत्रदोषान्विवक्षुर्वेधदोषस्यमहादोषांतःपातित्वेनप्राधान्यात्तमु
पजातिकाहयेनतावदाह याम्योत्तराःप्रागपराश्चपंचरेखाविरचयेत् विदिक्षुकोणेषुद्वेद्वेरेखेरचयेत् इदंपंचशलाकाख्यंचक्रं तत्रचक्रेसहाभिजिद्द्वि
द्वितीयार्गलिताग्नितारःभवर्गःभवेत् अभिजितासहवर्ततेसौसहाभिजित् तेनसहेतितुल्ययोगइतिबहुव्रीहिःतत्रसहस्ससादेशस्यवैकल्पिकत्वंविदि

याम्योत्तराःप्रागपराश्चपंचद्वेद्वेचरेखेरचयेद्विदिक्षु विदिग्द्वितीयार्गलिताग्नितारःसहाभिजित्तत्रभवेद्भवर्गः ६ त
स्मिन्नभिन्नाग्रगतंभिनत्तिग्रहोविवाहर्क्षमशेषमेव स्त्रीपुंसयोरायुरसौम्यवेधःसौम्यव्यधोहंतिसुखानिशश्वत् ७ ॥

शिद्वितीयायारेखातयार्गलितासंबंधाअग्नितारःकृत्तिकायस्यसतथा कोणस्यद्वितीयरेखातःकृत्तिकादीनिसाभिजितिनक्षत्राणिसव्येनमार्गेणअपसव्ये
नवान्यसेदित्यर्थः अपसव्यमार्गस्यशिष्टगर्हितत्वात्सव्यमार्गोत्रश्रेयान् ६ तस्मिन्चक्रेअभिन्नाग्रगतंविवाहर्क्षंअशेषंसमस्तमेवग्रहोभिनति य
स्यांरेखायांग्रहस्तदग्रस्थनक्षत्रंवेदयतीत्यर्थः विवाहग्रहणंविवाहकृत्योपलक्षणं यथाहश्रीपतिः वधूप्रवेशेदानेचचरणेपाणिपीडनेवेधःपंच
शलाकाख्येन्यत्रसप्तशलाककेइति अशेषग्रहणंचरणवेधनिरासार्थंतद्विषयंवक्ष्यति वेधफलमाह स्त्रीपुंसयोरिति असौम्यवेधःपापग्रहवेधःस्त्री रा॰
पुंसयोरायुर्हंति स्त्रीचपुमांश्चस्त्रीपुंसौ अचतुरादित्वात्साधुःसौम्यव्यधःसौम्यग्रहवेधःशश्वदनवरतंसुखानिहंति ७ अत्रसहाभिजिदित्युक्तं ७

अतोभिजित्प्रमाणं तथा विवाहकृत्यादन्यत्र सप्तरेखाचक्रे वेध इत्याह रथोद्धताः वैश्वदैवतमुत्तराषाढाः तस्य चतुर्लवश्चतुर्थोंशः अंतिमः श्रवः श्रव
णस्तस्य पंचभूलवः पंचदशांश आदिमः इयं इह वेधादिविषये अभिजिन्मितिः स्यात् अयमनंतरोक्तो व्यधो वेधः विवाहात्कन्यावरणादिविवाहकृत्या
दन्यतः अन्यत्र सर्वत्र व्रतबंधवास्तुयात्रादिषु सप्तरेखवलये सप्तरेखचक्रे विलोक्यते तथा च श्रीपतिः वधूप्रवेशे दाने चेत्यादि अत्र विवाहपटले अन्य
कृत्योपयोगिवेधनिरूपणाद्वेधाद्यः सर्वे वक्ष्यमाणा दोषाः साधारण्येन सर्वशुभकृत्येषु ज्ञातव्या इति सूचितं तथा च वक्ष्यति तदखिलेपि खलं शुभक
र्मणीति ८ अथ पादवेधं तद्विषयं चाह द्रुतविलंबितं स अनंतरोक्तो वेधविधिर्द्वितृतीययोश्चरणयोस्तथा आदिचतुर्थयोश्चरणयोर्मिथः परस्प

वैश्वदैवतचतुर्लवः श्रवः पंचभूलव इहाभिजिन्मितिः अन्यतः परिणयाद्यं व्यधः सप्तरेखवलये विलोक्यते ८ स कि
ल वेधविधिर्द्वितृतीययोश्चरणयोर्मिथ आदिचतुर्थयोः अशुभविद्धमशेषमुडु त्यजेच्चरणगं शुभवेधमसंपदि ९ ॥ ॥

रं स्यात् द्वौ च त्रयश्च तेषां पूरणौ द्वितृतीयौ तयोर्द्वितीयतृतीययोरित्यर्थः आदिश्च चत्वारश्च आदिचत्वारः तेषां पूरणौ आदिमचतुर्थयोरित्यर्थः प्र
थमचरणस्थिते ग्रहे विद्धनक्षत्रस्य चतुर्थचरणो विद्धश्चतुर्थस्य प्रथम इत्यर्थः एवं द्वितीयतृतीयावपि किलेति प्रसिद्धार्थे न्यासक्रमेण प्रथमादि
चरणस्थिते ग्रहे तद्रेखाग्रनक्षत्रचतुर्थतृतीयद्वितीयप्रथमाश्चरणाः क्रमेण विद्धाः स्युरिति प्रसिद्धं पादवेधविषयमाह अशुभेति अशुभविद्धं
पापग्रहविद्धमुडु नक्षत्रमशेषं समस्तं त्यजेत् शुभस्य शुभग्रहस्य वेधं चरणस्थितं असंपदि असंपतौ अन्यनक्षत्रालाभे सति त्यजेत् अर्थादन्य
नक्षत्रसंभवे सति शुभविद्धमपि नक्षत्रमशेषमेव त्यजेदिति तथा च श्रीपतिः क्रूरसौम्यग्रहैर्विद्धं पादमात्रं परित्यजेत् क्रूरैस्तु सकलं त्याज्य

मु·टी·
८

मितिवेधविनिश्चय इति यत्तु क्रूरैरपि त्यजेत्पादं केचिदूचुर्मनीषिण इति केषांचिन्मतं यन्नारदादिबहुमतविरोधान्नादरणीयमिति भावः ९ एवं वेध दोषं निरूप्य दोषांतराण्याह द्रुतविलंबितं यन्नक्षत्रमशुभैः पापग्रहैर्गतगम्यं अधिष्ठितं च अशुभश्च अशुभौ च अशुभाश्च अशुभाः द्वंद्वैकशेषः एके न अशुभेन द्वाभ्यां त्रिभिर्वा गतं भुक्तं गम्यं भोग्यं अधिष्ठितं युक्तं यदपि च नक्षत्रं त्रिविधैर्भौमांतरिक्षैरद्भुतैः दूषितं दिव्याद्भुतानि ग्रहर्क्षजनितानि ग्रस्त कृद्दीनि भौमानि भूकंपादीनि आंतरिक्षाणि उल्कादीनि एषामन्यतमं मद्भुतं यस्मिन्दिनं नक्षत्रे जातं यदपि च तरणितारकतैः सूर्याधिष्ठितनक्षत्राच्चतुर्दशसंख्योदितमित्यर्थः तरणेस्तारकं नक्षत्रं तरणितारकं कनीनिकायां नक्षत्रे तारकं तारकेति चेति विश्वः कनीनिका नेत्रतारा तन्नक्षत्रमखिलेपि शुभकर्मणि

यदशुभैर्गतगम्यमधिष्ठितं यदपि च त्रिविधाद्भुतदूषितं तरणितारकतोपि चतुर्दशं तदखिलेपि खलं शुभकर्मणि १०
रविनखैर्मितमर्कविधुंतुदो मुनिभिरिंदुरखंडलमंडलः हुतवहाकृतिषड्जिनदंतिभिः क्षितिसुतादिमिलत्तयतिग्रहः ११

विवाहव्रतबंधयात्रादौ खलं पापं स्यादिति प्रत्येकं संबध्यते १० अथ लत्तादोषमाह द्रुतविलंबितं अर्कः सूर्यः विधुंतुद इति व्यथयतीति विधुंतुदो राहुः तौ रविनखैर्मितं स्वाधिष्ठितनक्षत्रात्क्रमेण द्वादशविंशतितमं अभिसंमुखं लत्तयतः खंडमेव खंडलं खंडलं भागः छेदश्चेति क्षीरस्वामी न खंडलमखंडलं तन्मंडलं यस्यासौ तथा संपूर्णमंडलश्चंद्रः मुनिभिः सप्तभिर्मितं अभिलत्तयति एतदुक्तं भवति संपूर्णमंडलश्चंद्रः किल पूर्णिमांते भवति तत्र यन्नक्षत्रं तस्मात्सप्तमं चंद्रोभिलत्तयति तच्च कृष्णाषष्ठ्यां सन्नं सदा स्यादिति हुतवहास्त्रयः आकृतिर्द्वाविंशतिः षट् प्रसिद्धाः जिनाश्चतुर्विंशतिः दंतिनोष्टौ तैस्तुल्यं नक्षत्रं स्वाधिष्ठितनक्षत्रात्क्रमेण क्षितिसुताद्भौममारभ्य ग्रहः अभिसंमुखं लत्तयति भौमाद्याः क्रमेण स्वाग्रादीनि लत्तयंतीत्यर्थः अत्र सर्वेषां संमुखलत्तनमेवोक्तं

पूर्वैस्तु चतुर्णां पृथग् लत्तनं चतुर्णामभिलत्तनं कथमुक्तं तत्र हेतुमाह ११ द्रुतविलंबितं इत्येवंविधेष्वसद्ग्रहाणां अभिलत्तने संमुखलत्तने सति यदनुल
त्तनं ऋषिव्रजैर्मुनिसंघैरुक्तं ऋजुमार्गेण सिध्यतोर्थस्य वक्रेण साधना योगादिति न्याये सत्यपि तत् उडुपश्चिमपूर्वविभागयोः नक्षत्रोत्तरपूर्वार्धयोः न्यू
नाधिकदोषविवक्षया हेतुना उक्तं एतदुक्तं भवति ग्रहनक्षत्राणि प्राङ्मुखानि संति तत्र पुरः प्रेरिता लत्ता अग्रस्यस्य पृष्ठे लगति पश्चात्प्रेरिता अग्रभागे अ
तः अग्रलत्तया लातितनक्षत्रस्य पूर्वार्धे अधिकदोषः उत्तरार्धे न्यूनः पृष्ठलत्तयातु पूर्वार्द्धे अल्पः उत्तरार्धे अधिकः स्यादिति अनेन हेतुना पृष्ठलत्तनं महर्षि
भिरुक्तमित्यर्थः ग्रंथकृतातु लत्तितनक्षत्रस्य अखिलस्यापि निषिद्धत्वाद् भिलत्तनमेवोक्तं १२ अथ लत्तायाः फलमाह द्रुतविलंबितं उडुनि नक्षत्रे शुभग्र

इतिसति द्युसदामभिलत्तने यदनुलत्तनमुक्तमृषिव्रजैः तदुडुपश्चिमपूर्वविभागयोरनधिकाधिकदोषविवक्षये १२
उडुनि निर्दलिते शुभलत्तया न फलमस्ति बलस्य गलत्तया अशुभलत्तितमनितदूढयोर्धनसुतानसुतं पकरं परम् १३

हलनया निर्दलिते सति तस्य नक्षत्रस्य यद्विहितं शुभफलं तन्नास्ति कया हेतुभूतया बलस्य गलत्तया गलतीति गलत्तस्य भावो गलत्ता तया निर्बलत्वेनेत्यर्थः
अशुभग्रहेण लत्तितं यदुडुं नक्षत्रं तत्र ऊढयोः परिणीतयोर्दंपत्योः परमत्यर्थं असुतापकरं प्राणतापदं मत् धनसुतानत्ति खादयति अशुभलत्तितनक्षत्रे उ
द्वाहितयोः प्राणतापो धनसुतानाशश्च नश्यंतीत्यर्थः १३ अथैकार्गलदोषमाह वसंततिलका ऊर्ध्वगताएकारेखा तिर्यक्स्थिताभिस्त्रयोदशरेखाभिर्विद्धा सती
खार्जूरिकं नाम चक्रं स्यात् इहास्मिन् चक्रे वक्ष्यमाणशीर्षनक्षत्रमारभ्य सहाभिजिति भचक्रे न्यस्ते सति सह अभिजिता वर्तमानं तत्तया त्रहुव्रीहिः प्राग्व
त् तारकराजभान्वोश्चंद्रसूर्ययोः कनीनिकायां नक्षत्रे तारकं तारकेति चेति विग्रहः तारकाणां राजा तारकराजः यद्वा ज्योपे संज्ञायामिति द्रूस्वः स्वस्वनक्षत्र

वि॰टी॰
७

स्थितयोश्चंद्रार्कयोरेकरेखागतयोरियं न यनार्गला स्यात् परस्पर दृष्टिपातलक्षणः एकार्गलः स्यादित्यर्थः कथंभूतयोः तुल्यर्क्षगम्यगतयोः ऋक्षयोर्गम्यगते ऋ
क्षगम्यगते तुल्ये ऋक्षगम्यगते ययोस्तौ तयोः एकतरस्य यावति नक्षत्रगते तावति अन्यस्य गम्ये सतीत्यर्थः अनेन पादवेधः सूचितः तद्यथा प्रथमचतु
र्थचरणयोरन्योन्यं किल वेधः तत्रैकतरस्य प्रथमचरणस्थस्य पादमात्रं गतमन्यस्य चतुर्थचरणस्य पादमात्रं गम्यं स्यात् एवं द्वितीयतृतीययोरपि तथाच
नारदेन महादोषेषु प्रविष्टं त्वं खार्जूरिकसमाह्वयमेति १४ अत्र शीर्षभतोन्यास उक्तस्तच्छीर्षभं तथैकार्गलफलं चाह रयोद्धता दुष्टयोगे सति तस्य दुष्टयोगस्य ।
मितिः रूपसंयुतार्धिता सती शीर्षभं भवति शेषमस्याः सा शेषिणी यदि सा शेषिणी भवति तदा सार्धविश्व १३।३० युक्शीर्षभं स्यात् दुष्टयोगाः व्याघातशूल

विद्धात्रयोदशभिरूर्ध्वगतैकरेखा खार्जूरिकं तदिह शीर्षभतोभचक्रे न्यस्ते सहाभिजिति तारकराजभान्वोस्तुल्यर्क्षग
म्यगतयोर्नयनार्गलेयं १४ शीर्षभं भवति रूपसंयुता दुष्टयोगमितिरर्धिता सती शेषिणी यदि च सार्द्धविश्वयुङ्मंगल
गलति सार्गले विधौ १५ त्यक्तागतेष्यस्य परंतु हेतुमुज्झंति नक्षत्रमशेषमेव एकार्गलस्यैव हि सा च भंगी संध्यागतं य
द्दलहस्तयंति १६ ॥

परिघव्यतिपातविष्कंभगंडातिगंडवज्रवैधृताः तत्र व्याघातसंख्या १३ रूपसंयुता १४ अर्धिता जातं ७ शीर्षभं ए
वं शूलादिषु तथा गंडो दुष्टयोगस्तस्य संख्या १० रूपसंयुता ११ अर्धिता ५।३० इयं शेषिणी जाता अतः सार्धत्रयोदशयुता १९ जातं शीर्षभं मूलः ए
वमतिगंडेपि १७ मंगलमिति सार्गले विधौ सति मंगलं गलति अर्गलया वर्तमानः सार्गलः एकार्गलतयोश्चंद्रार्कयोः सतोर्मंगलं नश्यतीत्यर्थः १५ अत्रै
कार्गलविषये परमतमाह इंद्रवज्रा परे श्रीपत्याद्यः तुल्यर्क्षगम्यगतयोरिति संगतैषम्यादेतं त्यक्त्वा एकार्गलविद्धनक्षत्रमशेषमेवोज्झंतित्यजंति

तेषामयमाशयः हि यस्मात्कारणात्संध्यागतं संध्योदितं नक्षत्रं सर्वमेव गलहस्तयंति परिवर्जयंति सैव भंगीरचनायुक्तिः एकार्गलस्य गलेहस्तेननो
दयंतीति गलहस्तयंति कल्यादिलाणि च यद्दृक्संध्यागतं रविणा पादविद्धमपि सर्वमेव त्यज्यते तेन हृदे कार्गलस्य म ‾ पीत्यर्थः तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वं द्व
त्वत्र इतरेतरयोगेपि पृथक्त्वज्ञापकात्सर्वोपि द्वंद्वो विभाषया एकवत्स्यात् अतो गतेष्यस्येत्येकत्वं अथ केश्चित्क्रूरषड्भांतरितमृक्षमनिष्टमिति विशे
षितश्चांद्रजामित्रे परिणतमित्याह १६ उपजातिका भार्धमंतरं यस्य तत्तया क्रूरस्य षड्भांतरमृक्षमनिष्टमेवमिति मे न केषांचिद्विशेषवादः विशेषो
क्तिः असौ यस्मात्पापाद्भार्धांतरमृक्षं अस्मात्पापाच्चतुःपंचलवेषु चतुःपंचाशदंशेषु चांद्रंजामित्रं पर्याणंशीत् परिणमतिस्म चंद्रजामित्रेण परिणतः

क्रूरस्य भार्धांतरमृक्षमेव मनिष्टमित्येष विशेषवादः पापाच्चतुःपंचलवेषु चांद्रं जामित्रमस्मात्खलु पर्यणंसीत्
१७ सताहते दिग्धशरादितस्य शस्तं मृगस्यामिषमेवमन्ये क्रूरांघ्रिवेधाय पदं वदंति तेनैव तेषां निजपक्षहानिः १८ ॥

नक्षत्रं हि चंद्रनिष्टं प्रतिराशौ नव नवमांशाः तस्माद्भार्धांतरे स्थितः क्रूरस्त्वंशाच्चतुःपंचाशदंशएव भवति अतः परिणामे चांद्रजामित्रमेवेदमिति कृत्वा।
नायं विशेषइति भावः यस्मिन्नस्मिन्नप्यनाशंकेतिइष्ट सगागमश्च १७ अथ केश्चित्पादवेधे युक्तिरुक्ता तामनूद्य दूषयति उपजातिका विषादिनादि
ग्धेन परामृष्टेन शरेण अर्दितस्य विद्धस्य मृगस्य आमिषं मांसं सताहते सतादन्यत्र शस्तं तद्वदत्र पादे वेधः सएव पापो शुभइति एवमन्ये केचित्क्रू
रांघ्रिवेधाय पदं विषयं वद———तितेनैव पदेन तेषां स्वपक्षहानिः स्यात् १८ एतदेव स्पष्टं वक्ति उपजातिका यथैकदिग्धेएकस्मिन्प्रवेशशरेण
सतो विद्धापि एणः मृगः स्वैः असुभिः प्राणैर्विश्लेषं वियोगमायाति प्राणवियोगं प्राप्नोतीत्यर्थः तथा क्रूरस्यांघ्रिवेधात्तारकाणां वलरूपयोः संपन्न।

टी०
१०

रयेत् एतदुक्तंभवति यथाविषप्रदिग्धशरेणविद्धमृगस्यमांसंक्षतव्यतिरिक्तंशस्तंतद्वद्यस्मिन्यादेपापवेधःसएवदुष्टइत्यन्येवदंति तदयुक्तं यद्य
पिविद्धमृगस्यक्षतव्यतिरिक्तंमांसंशस्तंतथापितस्यमृगस्यगतासुत्वमापन्नस्यवलरूपसंपल्लष्टा एवंतस्यपापवेधनक्षत्रस्यापि एवंगलेपादुका।
न्यायेनतेषांस्वपक्षस्यापकपदेनैवंस्य हानिरिति अतोयदुक्तं अशुभःविद्धमशेषमुत्सृजेदितितत्सम्यक् १९ अथचंडायुधदोषमाह उपजाति
काहर्षणादीनांषण्णांयोगानांअवसानस्थंयन्नक्षत्रंतस्मिन्नेवनक्षत्रे येशंईषस्येदमैशंचंडमुग्रंअस्त्रंपतेत् चंडीशचंडास्त्रपातःस्यादित्यर्थःतत्फ
लमाह मंगलेति मंगलानांभंगस्तद्वलक्षयस्यततया मंगलभंजकमित्यर्थः २० अथचंडायुधसंभवार्थयोगनिर्देशानन्साहचर्येणदुष्टयोगानां

विश्लेषमायातियथासुभिःस्वैरणःशरेणैकदिशिक्षतोपि तथांघ्रिवेधादपितारकाणांक्रूरस्यनश्येद्बलरूपसंपत् १९
यदंतगंहर्षणसाध्यशूलगंडव्यतीपातकवैधृतानां तत्रैवचंद्रोडुनिचंडमैशमस्त्रंपतेन्मंगलभंगलक्ष्म २० गंशूवि
वव्यातिषुषट्शरत्रित्रिनंदषट्काघटिकाःक्रमेण ह्यमांत्यजेत्यारिघमिंदुभान्वोःपर्वण्यतीतेदिनसप्तकंच २१ ॥ ॥

वर्ज्यविभागान्तत्संगेनग्रहणदुष्टकालंचाह उपजातिका गंगंडःशूशूलःविविष्कंभःववज्रव्याव्याघातःअति अतिगंडः एतेषुयोगेषुतेषा।
मादिमाःक्रमेणषट्शरत्रित्रिनंदषट्का६।५।३।३।९।६ घटिकास्त्यजेत् अत्राद्यक्षरग्रहणेनैवनामग्रहणं यथाबृहज्जातके शकुबुकुगुचरा
द्याद्दिनोवीर्यवंतइतिप्पाःस्येदंपारिघंआदिमंद्व्यंशंअर्धंत्यजेत्कुत्रचित्त्र्यंशमितिपाठःसत्तुबहुवाक्यविरोधान्नादरणीयःइंदुभान्वोःपर्वण्य
तीतेसतिचंद्रार्कग्रहणानंतरंदिनसप्तकंत्यजेत् २१ ॥ ॥ ॥ ॥

रा
१

अथ ग्रहणादिसंबंधि नक्षत्रदोषमाह शालिनी यस्मिन्नृक्षे न क्षत्रे सैंहिकेयो राहुर्दृश्यते ग्रहणं भवेदित्यर्थः ग्रहणं सर्वोत्पातानामुपलक्षणं यदपि च त्रि
विधोद्भूतदोषितमित्युक्तत्वात् वा इत्यथवा तारखेटयोर्भौमादिष्वन्यतमखेटयोर्भेदयोगः स्यात् तत्र नक्षत्रे आ षण्मासं षण्मासपर्यंतं लग्नेंदुभाजि लग्नेंदू भ
जतीति लग्नेंदुभाक् तस्मिन् लग्नेंदुभाजि लग्नस्थे चंद्रे वा सतीत्यर्थः किंचिच्छुभं कर्म भ्राजिष्णु भ्राजते तत् भ्राजिष्णु शोभमानं न स्यात् तद्यथा अश्विन्यां ग्रहणे जा
ते सत्यंशत्रयोदशभागांतः मेषलग्ने सति अश्विनी लग्नस्य स्यात् एवं भरण्यादिष्वपि चंद्रस्य नक्षत्रमिति प्रसिद्धं उक्तं च व्यवहारतत्त्वे उत्पातैस्त्रिविधैर्दृ
तं ग्रहणगं चा मासषट्कं त्यजेति २२ अथोत्पातादिदोषमुक्तनक्षत्रस्य शुद्धिमाह उपजातिका उत्पातास्त्रिविधाः पापग्रहारविभौमादयस्तैर्मुक्तं तदुत्पन्नदो

यस्मिन्नृक्षे वीक्ष्यते सैंहिकेयो भेदस्ताराखेटयोर्यत्र वा स्यात् आ षण्मासं तत्र लग्नेंदुभाजि भ्राजिष्णु स्यान्नो शुभं कर्म किं
चित् २२ उत्पातपापग्रहमुक्तमृक्षं पदा दुराक्रम्य पुनर्भुनक्ति तदा तदर्हं सकलेषु कर्मसु त्यजेत्समक्रांतितनू रवींद्वोः २३
त्रिभागशेषध्रुवनाम्नि चंद्रे त्र्यंशगते संप्रति संभवोऽस्य मानार्धयोगाधिकमिंदुभान्वोः क्रांत्यंतरं चेन्नतदेष दोषः २४ ॥

षेऽस्य कं यन्नक्षत्रं तन्नक्षत्रं सकलेषु शुभेषु कर्मसु अर्हं योग्यं स्यात् तदा कदा यदि इंदुः आक्रम्य पुनर्भुनक्ति दोषत्यागानंतरं चंद्रभोगे जाते सति द्वि
तीयचंद्रभोगे शुद्धं भवतीत्यर्थः अथैतत्प्रसंगेन पातदोषमाह त्यजेदिति रवींद्वोः समक्रांतितनू सकले शुभकर्मसु त्यजेत् क्रांत्योस्तनू स्वरूपे समे च
ते क्रांतितनू च समक्रांतितनू चंद्रार्कयोः तुल्यावाद्ये क्रांती यावत्समे तावत्समे तावदित्यर्थः २३ अथ तत्संभवकालमाह उपजातिका ध्रुवनामा द्वादशो योगःत
स्मिंस्त्रिभागशेषे तृतीयांशावशिष्टे सति ऐंद्रे षड्विंशे योगे त्र्यंशगते च सति चकारो वार्थे अस्य क्रांतिसाम्यलक्षणस्य संप्रति इदानीं संभवः स्यात् तदा सन्ने

कालेभवेदित्यर्थः ध्रुवेव्यतीपाताख्यः ऐंद्रे वैधृताख्य इतिग्रंथनिर्माणकालेद्वादश अयनांशा आसन् तदभिप्रायेणेदमुक्तं ततोपथायथा अयनांशा
अधिकास्तथा तथा तयोर्योगयोर्न्यूनताचिंत्या तदानयनं श्रीगुरुणा केशवेनोक्तं त्रिघ्नायनांशा नखभाजितास्तद्धीनाश्च सार्धत्रिभुवोद्विपस्राः ततुल्ययुतोर्भा
तयोर्विलोक्यः पातोव्यतीपातकृद्वैधृताख्य इति चेदिंदुभान्वोः क्रांत्यंतरमानार्धयोगाधिकं तदा एषदोषो नस्यात् चंद्रार्कयोः क्रांत्यंतरं यावन्मानैक्या
र्धान्न्यूनतावदेव चायंदोष इत्यर्थः तदानयनं ग्रंथकृता करणकंठीरवे प्रतिपादितं दिङ्मात्रमत्रोक्तं २४ अथनक्षत्रशुद्धेः प्राशस्त्यमाह इतविलंबितम्
गांकस्य मृगीदृक् तस्या मृगांकमृगीदृशः चंद्रनक्षत्रस्य यदि स्फुरदद्दूषणभूषणकांतयः स्युः अदूषणं पापवेधादिराहित्यं भूषणं शुभदृष्ट्यादिकं का

स्फुरदद्दूषणभूषणकांतयोयदिभवंतिमृगांकमृगीदृशः करमवाप्य वरः सुतनोस्तदाशुभरसंभरसंभृतमश्नु
ते २५ इतिविवाहदीपिकायांनक्षत्रशुद्धिप्रथमोध्यायः १ अथकालमीमांसाध्यायः जन्मलग्नमिदम
गमंगिनांमेनिरेमनइतींदुमंदिरं

तिः प्रकाशः अक्षीणत्वादि स्फुरत्स्फूर्तौ स्फुरंतिताः स्फुरंत्यः परिपूर्णाः ताश्चता अदूषणभूषणकां
तयश्चतास्तथा तदासुतनोर्वध्वाः करं अवाप्य करग्रहणं कृत्वा वरः भरेण संभृतं परिपूर्णं शुभरसं शुभोपभोगं अश्नुते प्राप्नोति दोषरहितेनक्षत्रे पाणि
ग्रहकृद्वरः अतिशुभं प्राप्नोतीत्यर्थः २५ इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशविरचितायांविवाहवृंदावनटीकायांविवाह
दीपिकायांनक्षत्रशुद्धिप्रकरणंप्रथमोध्यायः १ अथकालमीमांसाध्यायोव्याख्यायते नक्षत्रशुद्धेर्मुख्यत्वादादौतामभिधायेदानींराशिघटितंविवाहमुख्य
त्वसंगेनतावत्कालमीमांसानिरूप्यते तत्रादौजन्मलग्नयोरेवप्राधान्यमाह जन्मलग्नेति अंगमस्तीत्येषामंगिनः तेषांशरीरिणांइदं

प्रसिद्धं जन्मलग्नं अंगं शरीरं पूर्वं मुनयो मेनिरे मन्यंते स्म इंदुमंदिरं चन्द्रगृहं जन्मनि यश्चंद्रराशिः स मन इति मेनिरे तथा चाहुः शौनकादयः शारीरं लग्न
वशात्सुखदुःखं मानसं शशांकवशादिति हि यस्मात्कारणात्सौहृदं मित्रत्वं मनसोरेव न तु देहयोः नकुलसर्पयोरपि सौमनस्ये सति सहवासित्वदर्शनात्
तस्मात्कारणादयं मेलकः इंदुगेहयोश्चंद्रराश्योरेव स्यात् जन्मराश्योरेव घटितयोगो न तु जन्मलग्नयोरिति सुष्ठु हृदयं यस्य सुष्ठु च तद्धृदयं चेति वा तस्य भा
वः सौहृदं भावे अण् हृदयस्य हृदादेशः पूर्वपदादेर्वृद्धिः यद्वा सुष्ठु हृदयं यस्यासौ सुहृत् सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः सुष्ठु च तद्धृच्चेति वा तस्य भा
वस्तया ननु हृद्भगसिंध्वंते पूर्वपदस्य चेति पूर्वोत्तरपदाद्योर्वृध्या सौहार्दमित्येव स्यात् छंदसि तु महते सौभगाय इत्यादयः प्रयोगाः छंदस्येव तत्र सर्वविधी
नां वि—कल्यविधानादिति प्रसादकारादयः यत्तु श्रीभागवते न तत्र सौहृदं धर्मसंतोषो भूत सौहृदं इत्यादिषु दृश्यते तदपि संदिग्धं पुराणानाम पिछांदस

सौहृदं हि मनसोर्न देहयोर्मेलकस्तदयमिंदुगेहयोः १ चंद्रराशिवशमेव सौहृदं सूक्ष्मयोरपि न किं नवांशयोः एवमस्तु म
करांशगे विधौ कर्कटेऽपि किमु नोत्तरायण २

त्वात् विशेषेण श्रीभागवतस्य अतो भाषायां सौहृदमिति प्रयोगः कथं युज्यते यदि तु ग्रंथकृता प्रयु
क्तस्तर्हि कथंचिद्गतिमात्रं चिंत्य—ते ओर्गुण इत्यनेन संज्ञापूर्वकस्य विधेरनित्यत्वस्य ज्ञापितत्वात् उभयपदवृद्धेरनित्यत्वमिति एवं च सुभं च लसौहृदय
त्रियोर्दृष्या इति वराहोक्तमपि निवेदितव्यं ननु चंद्रराश्योर्मेलकस्तर्हि तन्नवांशयोरपि कथं न मेलक इत्याह १ रथोद्धता सौहृदं मित्रत्वं चंद्रराशिवशं चंद्र
राश्यधीनमेवेति यदुक्तं तत्सूक्ष्मयोर्नवांशयोरपि कथं न स्यात् जन्मनि यद्राशौ चंद्रः स जन्मराशिरित्युच्यते तयोश्चेन्मेलको विलोक्यते तर्हि तदंतर्गतयोः
सूक्ष्मयोश्चंद्रनवांशयोरपि कथं न मेलक इत्याक्षेपः अपिः समुच्चये अत्रोत्तरं एवमस्त्विति चेदित्यध्याहारः एवं चेदस्तु भवतु तर्हि कर्कटे कर्कराशिस्थे वि

टी॰ धौमकरांशगेमकरनवांशस्थितेसति उत्तरायणंकथ्यन्मासात् अयनंद्विराशिवशाद्देवनतुनवांशवशादितिप्रसिद्धं अतोराश्योरेवमेलक इति २ अथराशिवशादे
२ वायनमित्यत्रप्रमाणमाह यस्मात्कारणान्मासषट्कं षण्मासपर्यंतंदक्षिणादक्षिणस्यांदिशि दक्षिणाद्दात् तद्धितश्चासर्वेविभक्तिरित्यव्ययं आदित्यःसूर्यःएतिग
च्छतितत्तस्मात्कारणात् इतिएवंविधमयनंश्रुतिर्जगौजगाद यस्मात्कारणात्सूर्योमासषट्कंदक्षिणांदिशंगच्छतितस्मात्तत्प्रमाणमयनंश्रुतिर्जगादेत्यर्थः एवं
सयुक्तिकमागमप्रमाणमुक्त्वाप्रमाणांतरमाहमूलसंक्रमेति नवांशापेक्षयामूलराशिविवस्वतःसूर्यस्यमूलसंक्रमोराशिसंक्रांतितत्समांतत्सदृशींऋतवोव
संतादयोपिस्वस्वभंगिंस्वीयस्वीयरचनांचिन्हमितियावत् बिभ्रतिधारयंति वसंतेषुष्पोद्गमादि ग्रीष्मेनिदाघादि इत्यादीनियान्यृतुचिन्हानितानिरविराशि

मासषट्कमयनंचदक्षिणादित्यएतितदितिश्रुतिर्जगौ मूलसंक्रमसमांविवस्वतःस्वस्वभंगिमृतवोपिबिभ्रति ३ किंदिनर्क्षविरहेकर
ग्रहोनेष्यतेतदुदयक्षणेप्यपि स्थूलमेवमखिलंजगत्फलं तद्विशेषयतिसूक्ष्मतागतिः ४

संक्रमवशेषुतत्तदृतुषुप्रत्यक्षंदृश्यते अतोराशिवशादे
वमेलक इति सिद्धं ३ अथयुक्त्यंतरमाह एयोद्वतादिनर्क्षस्यदिवसनक्षत्रस्यविरहेवियोगेसतिकरग्रहनक्षत्रालाभेसतीत्यर्थः तस्यकरग्रहनक्षत्रस्यउदयेक्षणे
षुमुहूर्तेष्वपिकरग्रहःकिन्नेष्यते धिष्ण्येतस्मिंतस्यभस्योदयोवेतियस्मिन्धिष्ण्येपञ्चकर्मोपदिष्टंतद्दैवत्येतन्मुहूर्तेपिकार्यमितिचकथितोपिदिनेनक्षत्रालाभेस
तितदुदयेतन्मुहूर्तेवाकरग्रहोमहद्भिःकथंनेष्यते अपितुनेष्यतइत्यर्थः अतोखिलंसमस्तंजगतःफलंस्थूलमेवमिति एवंचतर्हिसूक्ष्मफलस्यगतिमाहत
द्विशेषयतीतितत्रस्थूलफलंसूक्ष्मतागतिःसूक्ष्मफलस्यगतिः विशेषयतिविशेषंकरोति सूक्ष्मफलंस्थूलफलस्यसविशेषतांकरोतीत्यर्थः ४ तर्हिसूक्ष्ममेवफ राम॰
लंप्रमाणंकथंनस्यादित्याशंकायामाह स्वागताप्रतिवेलंतत्तदृद्दनविकल्पसमर्द्दैः अव्यवस्थितिःस्यादितिहेतोःमुनीन्द्राःस्थूलमप्यनुसरंतिकेवलमणीयान १२

योनरमणीयमित्यन्वयः वेलांवेलांप्रतीतिप्रतिवेलं वीप्सार्थेव्ययीभावः तस्यास्तस्या वेलाया ऊहनंवितर्कस्तस्यविकल्पास्तद्व्यारयः तेषांसमूहास्तैः कृत्वा
अव्यवस्थितिरव्यवस्थास्यादितिहेतोर्मुनींद्रागर्गादयः स्थूलंफलंवर्षमासतिथ्यादिकमप्यनुसरंति तत्रप्रवर्तंते केवलमणीयः सूक्ष्मतरंफलंनरमणीयंस्या
त् अतिशयितमणु अणीयः सूक्ष्मफलस्यानवस्थानात्स्थूलेष्वपिप्रवर्ततइतिभावः एतदपिस्पष्टयिष्यति ५ एवंचेत्तर्हिसूक्ष्मफलमकिंचित्स्यात्तत्राह स्यागता
भुविशृयिव्यांवर्तमान अयंभूयान्बहुतरोजनः जातावेकवचनं एकधिष्ण्य दिनजोपिएकनक्षत्रतिथिजातोपिभिन्नफलभाक्विसदृशफलभागीभवतीति
प्रत्यक्षंतेनकारणेनसूक्ष्मतापिगरिष्टागरीयसीस्यात् अपिः समुच्चये तर्हिस्थूलंत्याज्यंस्यात्तत्राह साचेति साचसूक्ष्मता मूलंस्थूलं अनुरुध्य अनुसृत्यविधे

अव्यवस्थितिरितिप्रतिवेलंतु तदूहनविकल्पसमूहैः स्थूलमप्यनुसरंतिकृतींद्राः केवलंनरमणीयमणीयः ५ भिन्न
भिन्नफलभाग्भुवि भूयानेकधिष्ण्यदिनजोपिजनोयं सूक्ष्मतापिनगरिष्टासाचमूलमनुरुध्यविधेया ६ सूक्ष्मो
नवांशाद्विरसांशएवत्रिंशल्लवस्तल्लवतोपिसूक्ष्मः ततोपिलिप्तेत्यवलिप्तवाचांदृग्गोलुकस्यांनिपतोसमस्या ७ ॥ ॥

यास्यात् स्थूलानुसारेणसूक्ष्मतापिग्राह्येत्यर्थः ६ कथंस्थूलमनुरुध्यसूक्ष्मताग्राह्येत्येतदर्थंसूक्ष्मतायाअनवस्थानंप्रकटयति उपजातिका सूक्ष्मयोरपिन
किंनवांशयोरितिनवांशः किलसूक्ष्मउक्तः नवांशादपिद्विरसांशोद्वादशांशः सूक्ष्मः द्वौचरसाश्चते अंशः आदौद्व्यंशः ततस्तस्यारसांशइतिकृत्वाद्वादशांश
एवसिद्धः यथासूर्यनंदेर्ह्तंतत्स्यादायुर्मासादिकंस्फुटमित्यादिषुसूर्येहृतसनंदहृतमितिव्याख्यायतेनतुद्वादशाधिकनवशतैस्तद्वदत्रापि अतएवबृ
हज्जातके चंद्रोपगाद्विरसभागसमानरूपमिति तद्वत्तत्सपादद्वादशांशादपित्रिंशल्लवस्त्रिंशांशः सूक्ष्मः ततोपिलिप्ताकलासूक्ष्मा इतीत्यनेनप्रकारेण

अवलिप्तवाचां अवलिप्ता उपलिप्ता वाक् येषां तेन तया एवमुक्तवतामित्यर्थः पुरुषाणां दृक् दृष्टिः कस्यां निपतेत् समस्यां समाधानं स्तुगकृत् समसनं सम स्याकुप एवं सूक्ष्ममुक्तवतां दृष्टेर्न कुत्राप्यवसानमास्ति सूक्ष्मस्य अपर्यवसाधनादितिभावः ७ एवं सूक्ष्मकालानां कलने सति सिद्धांतमाह इंद्रवज्रा सकिल कालस्यैकदेशः अत्यंतसूक्ष्मः अतिदुर्लक्ष्यः येन कृत्वाखिलानां प्राणिनां फलर्द्धिः फलसंपद्धिदुराभेदनशीला स्यात् भिन्नभिन्नेतियावत् छिदिविदिभिदां कुरः सः सूक्ष्मकालः अस्मादृशां वयमिव दृश्यंते ते स्मादृशः तेषां चर्मचक्षुषां दृग्विषयो दृष्टिगोचरो न स्यात् दुर्ज्ञेय इतियावत् तथा च नारदः स्वस्थितरेसु खासीने यावत्स्पंदति लोचनं तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः तत्पराच्छतशो भागस्त्रुटिरित्यभिधीयते त्रुटेः सहस्रभागो यो लग्नकालः स उच्य

अत्यंतसूक्ष्मः सकिलैकदेशो येनाखिलानां भिदुरा फलर्धिः नास्मादृशां दृग्विषयः स तस्मान्मूलानुकूला व्यवहारसि
द्धिः ८ इति सति यदि मूले सूक्ष्मभावांशलब्धिस्तदखिलमपि सिद्धं नास्ति चेन्मूलसंपत् तदुभयलवनाशो दुर्गम
त्वारणूनां परिणतिरिति रूढा कालमीमांसया नः ९ इति विवाहवृंदावने कालमीमांसाध्यायो द्वितीयः ॥२॥

ते देवोपि तं न जानाति किं पुनः प्राकृतो जनः स कालोप्यन्यकालो वा पूर्वकर्मवशाद्भवेत् निमित्तमात्रं दैवज्ञस्तद्वशाच्च शुभाशुभमिति सिद्धांतयतित
स्मादिति तस्मात्सूक्ष्मकालस्यादृग्विषयत्वात् सर्वजनानां व्यवहारसिद्धिः मूलानुकूला स्यात् मूलस्यानुकूला मूलानुकूला स्थूलानुसारिणी वत्सरमा
रभ्य नवांशपर्यंतमित्यर्थः असमत्साध्यत्वात् अथानयोः स्थूलसूक्ष्मयोः समाधानमाह ८ मालिनी इत्यनंतरोक्ते सति मूले स्थूलमध्ये यदि सूक्ष्मभावा
वांशलब्धिर्लाभश्चेत्स्यात् तत्तदाखिलं सर्वमपि सिद्धं फलितं स्यात् एवं स्थूलं तदंतर्गतं सूक्ष्मं च विलोकनीयमित्युक्तं अन्यथा बाधकमाह नास्तीति चे

स्यूलसूक्ष्मलक्षणौ यौ विभागौ तयोर्द्वयोरपि नाशः स्यात् कस्मात् अणू
न्मूलं संपत्स्यूललब्धिर्नास्ति तदा तदुभयलवनाशः स्यात् तस्य फलजातस्योभयलवौ स्यूलसूक्ष्मलक्षणौ यौ विभागौ तयोर्द्वयोरपि नाशः स्यात् कस्मात् अतो नवांशपर्यंतसूक्ष्मकालस्य मनुष्यगम्यत्वात्तत्सूक्ष्मं
नामतिसूक्ष्माणां दुर्गमत्वात् दुःखेन गम्यं तेज्ञायंते तानि दुर्गमाणि तेषां भावस्तत्त्वं तस्मात् अतो न वांशपर्यंतसूक्ष्मकालस्य मनुष्यगम्यत्वात्तत्स्यूलं
तत्स्यूलांतर्गतं सूक्ष्मं विचारणीयमिति सिद्धं अतो नवांशयोरपि मेलकः स्यादिति नवांशमेलकस्य जने व्यवहारो नास्तीत्येतत्सप्रपंचं वक्ष्यति एतदुक्तम
यामनसि समाहितमित्याह परिणतिरिति इतीपं कालमीमांसया कालविचारणेन नोस्माकं परि[illegible]तिः रूढा स्फुरिता कालस्य मीमांसा विचारणमानते स्वा
र्थेस न ततः प्रत्ययांताद्भावे अच् कालविचारणे क्रियमाणे अस्माकमयं बुद्धिपरिणामो रूढ इत्यर्थः १ इति श्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरा
त्मजगणेशविरचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां कालमीमांसाध्यायो द्वितीयः २ एवं प्रसंगिकं कालमीमांसनं निरूप्य अधुना प्रकृतं

अथ मेलकाध्यायः व्ययेन वित्तं न तपस्य पत्यं नायुर्द्विषत्येव वधूवराणां द्विर्द्वादशः पंच नवाष्ट षष्ठो जन्मर्क्षयोः
सख्यविधिर्नदृष्टः १ ॥

मेलकाध्यायं निरूपयति तत्रादौ राशिमेलकं सोपपत्तिकमाह उपजातिका वधूवराणां स्त्रीपुरुषाणां जन्म
र्क्षयोर्जन्मराश्योर्द्विर्द्वादशः सख्यविधिः ------ मैत्रविधिर्न दृष्टः न लक्षितः पूर्वमुनिभिः द्वौ च दश च द्विर्द्वादश तयोः पूरणो द्विर्द्वादशः एकस्य राशेः स
काशादन्यराशिर्द्वितीयस्तस्मादप्यन्यो द्वादश इत्यर्थः अत्र हेतुः व्ययेन वित्तमिति यतो व्यये सति वित्तं न स्यात् व्ययो द्वादशस्थानं वित्तं द्वितीयं यत्र व्यय
स्तत्र कुतो धनमिति अनेनैवात्र दरिद्रत्वमिति फलं च सूचितं भवति एवं तपसीत्यादि हेतुना पंच नवेत्यादि पंच च नव च अष्ट च षट् च पंच नवाष्टषट्
तेषां पूरणः पंच नवाष्ट षष्ठः पंचम नवमोष्टम षष्ठ[illegible] यादि नियमविधानात् तपो नवमस्थानं अपत्यं पंच

·टी·
१४

मं अतोन पंचमनवमः सख्यविधिः अत्रानपत्यतेति फलमपि सूचितं द्विषतिशत्रौसति आयुर्नैवस्यात् शत्रुसांनिध्ये कथमायुरिति शत्रुः षष्ठं आयुर
ष्टमं अतोष्टमषष्ठोन सख्यविधिः अत्रनायुष्यमितिफलंच अर्थाच्छेषाश्चतुर्दशमतृतीयैकादशाभयसप्तमाः शुभाः एकराशित्वेविशेषंवक्ष्यति १ अथा
स्यापवादंताराभैत्रंचाह स्वागतायदासे त्रयोराश्योः सुहृदभिन्नपतित्वंदृश्यते तत्तदा अखिलेषुद्विर्द्वादशादिषु अपिमेलः सख्यस्यात् मेलनंमेलः किं
पुनः शुभेषुचतुर्थदशमादिषुसुहृदौअभिन्नौचसुहृदभिन्नौतौचतौपतीच तयोर्भावस्तत्वंपत्योः सुहृत्वंएकत्वंचेत्यर्थः राश्यधिपास्तत्सुहृत्वंचव
क्ष्यति तथाचोक्तं नवर्णशुद्धिर्नगणोनयोनिर्द्विर्द्वादशेचैवषडष्टकेपि वैरेपिदूरेयदिवात्रिकोणेमैत्रीयदिस्याच्छुभदोविवाह इति अथताराभैत्रंभीरु

दृश्यतेसुहृदभिन्नपतित्वंसेत्रयोस्तदखिलेष्वपिमेलः भीरुभादचलपंचतृतीयाशोकवैरविपदेवरतारा २ नक्षत्र
मेकंयदिभिन्नराश्योरभिन्नराश्योर्यदिभिन्नमृक्षं प्रीतिस्तदानींनिविडानृनार्योश्चेत्कृत्तिकारोहिणिवन्ननाडी ३

भादिति भीरुः स्त्रीविशेषास्त्वंगनाभीरुः कामिनीवामलोचनेत्यभिधानात् तस्मान्नक्षत्रमारभ्यवरतारावरनक्षत्रं अचलपंचतृतीयाक्रमेणाशोकवैर
विपदःस्यात् द्वंद्वैकत्वेक्लीबत्वं अचलाश्चपंचचत्रयश्च तेषांपूरणीतथासप्तमीपंचमीतृतीयाचेत्यर्थः सप्तमीशोकाय पंचमीवैराय तृतीयाविपदे इति
एतत्त्रयमनवके एवंपुनर्द्वितीयेतृतीयेपि केचिदेवमशुभयुग्माभ्यामपीच्छंति तथाचाहुः पुरस्ताद्गणयेद्यावत्कन्यर्क्षंकन्यभादपिवरभंनवृद्धेच्छेश
ताराः संतिपरस्परमिति एतदन्यदेशेषुप्रसिद्धंग्रंथकृतोक्तंतद्देशएव २ अथैकनक्षत्रेएकराशौचविशेषमाह उपजातिका यदिनृनार्योर्वरव
ध्वोः भिन्नराश्योः सतोर्नक्षत्रमेकंभवति अथवाअभिन्नराश्योः एकराश्योरपिभिन्नमृक्षंस्यात् अपिवार्थे तदानिविडाअतिशयितानृनार्योः प्रीतिः राम
१४

स्यात् तत्र नाडीदोषोपि नास्तीत्याह चेत्कृत्तिकेति चेत्कृत्तिकारोहिणिवत्तदा नाडी न स्यात् यथा कृत्तिकारोहिण्योरेकनाडीत्वेपि एकराशौ सति नाडीदोषो
न स्यादित्यर्थः अनेनैव गणदोषोपि निरस्तः एवं शततारका पूर्वाभाद्रपदादिष्वपि तथा च गर्गः एकराशिं विना नाडीयोगमादौ विवर्जयेत् न दोषस्त्वेकराशि
स्थे भकूटेन्येषु सत्सु हि इति भृगुरपि दंपत्योरेकराशिश्चेत्पृथगृक्षं यदा भवेत् वसिष्ठोक्तो विवाहः स्यात् तृणनाडीं न चिंतयेदिति एतद्बहुमतमुक्त्वा मतांतरमाह
३ उपजातिका एकौ च तौ ऋक्षराशी च तौ तथा एकनक्षत्रे एकराशौ एकसत्यपीति अपिः स्वभावनायां नवांशभेदान्नक्षत्रचरणभेदात्सौमनस्यं सुहृ
त्वं पराशरः प्राह एकनक्षत्रे एकराशावशुभमिति बहुमतं प्रागुक्तं तत्रापि चरणभेदे सति शुभमिति पराशरमतमित्यर्थः तत्राप्येकांशत्वे चरणैकत्वेपि

पराशरः प्राह नवांशभेदादेकर्क्षराश्योरपि सौमनस्यं एकांशकत्वेपि वसिष्ठशिष्यो नैकत्रपिंडे किल नाडिवेधः ४
नाग्निर्दहत्यात्मतनुं यथाहि द्रष्टा स्वदृष्टं न हि दर्शनीयः एकांशकत्वेपि समप्रभावान्न भर्तृभार्याव्यवहारसिद्धिः ५

वसिष्ठशिष्यः सौमनस्यं प्राह एतद्बृहस्पति अत्र नक्षत्रैक्ये नाडीदोषो नास्तीत्याह नैकत्रेति द्वयोरपि नक्षत्रयोरेकत्र एकस्मिन् स्थाने पिंडे गोलके सति
किल निश्चयेन नाडिवेधो न स्यात् द्वयोर्व्यवहितयोः सत्येव वेधः स्यादेकत्वे तु न स्यादिति भावः नाडिरितीकारांतः कृदिकारादक्तिन इति ङीबंतोप्यस्ति ४ अथ
नाडीदोषाभावे दृष्टांतमाह उपजातिका यथाहि अग्निः आत्मतनुं स्वमूर्तिं तेजोरूपां न दहति अपि च दर्शनीयो रमणीयः पुरुषः स्वदृष्टं द्रष्टा न स्यात्
कर्मणि षष्ठी चक्षुष्मानपि द्रष्टा स्वदृष्टिं न पश्यतीति तथा एकत्र पिंडे नाडीवेधो न स्यादिति पूर्वेणान्वयः अथैकांशकत्वे दोषमाह एकांशकत्वे इति
एकांशकत्वे चरणैकत्वे सति तु भर्तृभार्याव्यवहारसिद्धिर्न स्यात् कुतः समप्रभावात् समानसामर्थ्यात् अयं भावः नरनार्योरेकांशकत्वात्समानसाम

र्यंतस्मिन्सति अयंभर्त्तातदधीनेयंभार्येतिसर्वव्यवहारोगार्हस्थ्या द्विरूपोनसंभवतीति अतएकांशकृत्वेसौमनस्यंनस्यादितिभावः५ अथना
डीवेधमाह वसंततिलका रुद्रआर्द्रा अर्यमाउत्तराफाल्गुनी इंद्रोज्येष्टा वरुणःशततारका एतानिचत्वार्यारभ्यप्रत्येकंद्वयं एवमष्टौ अश्विनीचएका
किनीएवमेकोनवकः विश्वेउत्तराषाढा अग्निःकृत्तिका वायुःस्वाती फणीआश्लेषा एवदारभ्यप्रत्येकंयुगंयुग्मएवमष्टौ अंत्यभंरेवतीच एकाकिनी एव
द्वितीयोनवकः शेषाणि पूर्वाफाल्गुनीचित्राधनिष्ठा भरणी मृगपूर्वाषाढानुराधापुष्योत्तराभाद्रपदाः अयंतृतीयोनवकः इतिनवकत्रयंस्यात् वधूवरयो
र्जन्मोडुनीजन्मनक्षत्रेएकपातेएकस्मिन्नवकमध्येप्राप्तेतदानाडीस्यात् किमर्थं वरवधूनिधनायाद्वयोरेकनाड्यांमृत्युःस्यादित्यर्थः अत्ररुद्रादिदेवता

रुद्रार्यमेंद्रवरुणद्वयमश्विनीचविश्वाग्निवायुफणिनांयुगमंत्यभंच शेषाणिचेतिनवकत्रयमेकयातेजन्मोडुनी
वरवधूनिधनायनाडी६ प्रमीयमाणापिमतेर्मुनीनांत्रिद्व्यंघ्रिनक्षत्रभुवःकुमार्याः नाडीचतुःपंचतयस्यपक्षोन
सोढव्योविषयत्वमेति७

निनिर्देशेनतन्नक्षत्रनाड्यादिगृह्यते लोकेहिस्वामिशब्दंसेवकेप्रयुंजानाहश्यंते अतोदेवताशब्दस्तन्नक्ष
त्रतिथ्यादिषूपचर्यते तथाविधवृद्धप्रयोगदर्शनाच्च नागोद्वादशनाडीभिदिक्पंचदशभिस्तथाभूतोष्टादशनाडीभिर्दूषयन्तुत्तरांतिथिमित्यादिनागः
पंचमी दिग्दशमी भूतश्चतुर्दशीति ६ अथत्रिनाडिकाचक्राभिप्रायेणनाडीवेधउक्तः केचित्तुत्र्यंघ्रिभद्व्यंघ्रिभोत्पन्नकन्यायाश्चतुःपंचनाडीचक्रेवेधमाहुः
तन्मतंदूषयति उपजातिका त्रयश्चद्वौचअंघ्रयोयस्यत्रिद्व्यंघ्रितच्चतन्नक्षत्रंतत्र भवतीतित्रिद्व्यंघ्रिनक्षत्रभूस्तस्याःकुमार्याः क्रमान्नाडीचतुःपंचतयस्य
चत्वारश्चपंचचतुःपंचतेवयवायस्यत्वच्चतुःपंचतयं नाडीचतुष्टयंनाडीपंचकंचेति संख्यायाअवयवेतयप् तस्यपक्षःमुनीनांहारीतादीनांमतैःप्र

मीयमाणोपि प्रमाणं प्राप्नुवन्नपि आगमप्रामाण्यं प्राप्तोपि सोद्वीथीविषयत्वं सोदस्य वीथीपदवीतस्या विषयत्वं विचारमार्गगोचरत्वं नैति न गच्छति त्र्यं
घ्रिभं कृत्तिकादिकं द्व्यंघ्रिभं मृगशीर्षादिकं तथा च हारीतः त्र्यंघ्रिभे द्व्यंघ्रिभे कन्या जाता या गणये क्रमात् वन्हिभादिंदुभान्नाडी चतुः पंचसु पर्वसु इति अस्य वि
षयमाह वृद्धगर्गः जांगले च चतुर्मालापांचाले पंचमालिका त्रिमाला सर्वदेशेषु विवाहे ऋषिसंमतम् इति एवं सोद्देक्रियमाणे सप्त स्रोत्र देशे व्यवहारं न प्राप्ने
तीत्यर्थः ७ अथ योनिमैत्रमाह स्रग्धरा अश्वस्तुरगः इभो हस्ती अजो मेषः उरगः सर्पः पुनरहिः सर्पः श्वा शुनकः स्वनूकरिपुर्मूषकशत्रुर्मार्जारः मेषअ
जः पुनरोतुर्मार्जारः द्विः द्विवारं आखुर्मूषकः गौर्धेनुः काली महिषी व्याघ्रः प्रसिद्धः पुनः काली महिषी पुनः पशुरिपुर्व्याघ्रः हरिणो मृगः पुनरेणो मृगः पुनः

अश्वेभाजोरगाहिश्वस्वनकरिपवो मेषओतुर्द्विराखुर्गौकाल्यौ व्याघ्रकालीपशुरिपुहरणेणश्वकीशाः क्रमेण द्वौत्र
भ्रूकीशसिंहौ तुरगमृगपतिच्छागमातंगमैवं नेष्टा योनिः सवैरावरयुवतिनृपामात्ययोरश्विनीतः ८ त्रियुग्मीरो
हिण्यासह शिवयमसौ नैरिसुरेस्रुतिस्वातीमित्रादितिगुरुकरात्याश्विशशिभं

कीशो वानरः सिंहः प्रसिद्धः तुरगोश्वः पुनर्मृगप
तिः सिंहः छागो मेषः पुनर्मतंगो हस्ती द्वंद्वे कत्वेक्षीवत्वं एवं क्रमेण अश्विनीतः अश्विनीमारभ्य योनिः स्यात् सा योनिः सवैरा नेष्टा कयोः वरयुवतिनृ
पामात्ययोः वरश्च युवतिश्च वरयुवती नृपश्च अमात्यश्च नृपामात्यौ वरयुवती च नृपामात्यौ च तयोः पृथक्पृथक्द्वित्वविवक्षायां न बहुत्वं अश्वि
नीत इत्यत्र तसिलादिष्वाकृत्वसुच इत्यनेन पुंवद्भावे प्राप्ते उक्तपुंस्कत्वाभावान्न स्त्रीप्रत्ययलोपः अत्र योन्योर्वैरं लोकाद्धेयं गोव्याघ्रं गजसिंहमित्या
दिना ८ अथ गणमैत्रमाह शिखरिणी त्रयाणां युग्मानां समाहारस्त्रियुग्मी फल्गुनीद्वयं आषाढद्वयं भाद्रपदाद्वयं चेति रोहिण्या सह रोहिणी चेत्यर्थः

टी.
६६

शिवयमर्क्षे आर्द्राभरण्यौ अयंनक्षत्रनवकोनरिमनुष्येभवेत् श्रुतिःश्रवणःस्वातीप्रसिद्धामित्रोनुराधा अदितिःपुनर्वसुःगुरुःपुष्यःकरोहस्तः अंत्यंरेवती
अश्विनोअश्विनी शशिभंमृगशिरः अयंनवकःसुरेद्वेभवेत् परंचित्राज्येष्ठाधनिष्ठाविशाखामूलकृत्तिकाशततारकामघाश्लेषाद्रनीहंनवकंदैत्येभवेत्
एवंगणत्रयं अस्यप्रयोजनमाहमृत्युरिति दनुजमनुजानांराक्षसमनुष्याणांमृत्युःनृनाथयोरक्षोमानुषगणयोःसतोमृत्युःस्यादित्यर्थः निर्ऋतितनयानांराक्षसा
नां अनिमिषैर्देवैःसहस्वैरमतिशपितंवैरंस्यात् क्वपरिणयेविवाहे अर्थाच्छेषाणांमित्रत्वं१ अथस्वाभाविकंराशिवैरंतथावश्यमैत्रंचाह शार्दूलविक्रीडितंचा
पाजौधनुर्मेषौवृषभेणसहनित्यद्विषौनित्यविरोधिनौ चापेनअजेनवासहवृषभोनित्यंशत्रुरित्यर्थः एवमुत्तरत्रापि कुंभमिथुनौकर्केणमेषस्त्रियाकन्यया

परंदैत्येमृत्युर्दनुजमनुजानामनिमिषैःसहस्वैरंवैरंनिर्ऋतितनयानांपरिणये१ चापाजौवृषभेणकुंभमिथुनौकर्केणमेषस्त्रि
याशैलाग्नीसविषेणिकार्मुकहरीनक्रेणनित्यद्विषौ तद्वत्कुंभतुलेझषेणवशगाःसिंहंविनान्येनृणांतद्भोज्याजलचारिणोहरिव
शाःसर्वेविनावृश्चिकम् १०

शैलाग्नीतुलामिथुनौसविषेणवृश्चिकेन शैलाग्नीइत्यत्रसंख्यासंज्ञयातत्संख्यौराशीविवक्षितौ अतोनबहुत्वं यथा
निगमवाक्ये युग्मानियुगभूतानांषण्मुन्योर्वसुरंध्रयोरिति षण्मुन्योःषष्ठीसप्तम्याःवसुरंध्रयोरष्टमीनवम्याः एवमात्रापिकार्मुकहरीधनुःसिंहौनक्रेणम
करेणतद्वन्नित्यद्विषौकुंभतुलेझषेणमीनेन एतद्विद्वादशषडष्टकयोर्मध्येनित्यवैरिणउक्ताःशेषाणांमैत्रं अत्रान्यहेतुमाह शत्रूमंदसितौइत्यादिसत्या
चार्यमतेयदधिपत्योःशत्रुत्वमस्तितएवैतेपठिताःशेषाःश्रेष्ठाःतथाचतद्वाक्यम् द्विर्द्वादशेमेषझषौवृषमिथुनावित्यादिषडष्टकेचसिंहामीनयुतइत्या
दिग्रंथकारस्तुसत्याचार्यमतमैत्रमसहमानोमुंहेतुं [illegible] नतुतदधिपतिवशेनेतिग्रंथकारस्याशयःअथव

रयमैत्रं वशगाः स्यादिसिंहविनान्ये सर्वे राशयः नृणां मनुजानां तुलामिथुनादीनां वशगाः स्युः वशमधीनं गच्छंति ते तथा तेषां नृणां भोज्याः लभ्याः जलचा
रिणो मीनादयः स्युः हरेः सिंहस्य वृश्चिकं विना सर्वे राशयः वशगाः स्युः शेषं वश्यावश्यं लोकप्रसिद्धं ज्ञेयं १० अथैषां गुणदोषाणां निर्णयं विवक्षुस्तावत्तत्र
किंचित्स्वकौशलं दर्शयति उपजातिका धुरि भारे मुख्ये इति यावत् कुंभहर्योः कुंभसिंहयोः राशिमैत्री स्यात् समसप्तकत्वात् तयोः राश्योः ग्रहौ स्वामिनौ शनिरवीतत
योः विग्रहे वैरेपि करग्रहः स्यात् तस्यां राशिमैत्र्यां असत्यां षट्काष्टकत्वान्मृगराजमीनौ सिंहमीनावप्याहतौ करगृहे गृहीतौ तत्र हेतुः कस्मिन्सति तद्ग्रहयोस्त
त्स्वामिनोः गुरुसूर्ययोः सुहृत्त्वे मैत्रे सति ग्रहमैत्रं सुरगुरुरित्यादिना वक्ष्यति राशिमैत्रग्रहमैत्रयोरन्यतरलाभे शुभमिति तात्पर्यार्थः ११ अथाक्षिपति इंद्रव

स्याद्राशिमैत्री धुरि कुंभहर्योः करग्रहस्तद्ग्रहविग्रहेपि तस्यामसत्यां मृगराजमीनावप्याहतौ तद्ग्रहयोः सुहृत्त्वे ११ पत्योः
विरोधे सति भृत्ययोः स्यान्मेलोप्यमेलस्तदलं भमैत्र्या अत्रोच्यते किं न मिथो वधः स्यादेकस्य सेनानरयोर्विरोधात् १२ अ
पश्यति स्वामिनि तद्वधस्थे ग्रहेश्वराणां किमदृष्टमस्ति अतोधिकं चेत्प्रभुसख्यमेव ततो गतिः का समसप्तकस्य १३

ज्रा पत्योः स्वामिनोर्विरोधे वैरे सति भृत्ययोस्तत्सेवकयोर्मेले मैत्रे सत्यपि अमेलं अमैत्रं स्यादिति लोकप्रत्यक्षं अतो ग्रहवैरे सति राशिमैत्रं न मुख्यमिति
भावः अत्रास्मिन्विषये उच्यते उत्तरं दीयते एकस्य राज्ञः सेनानरयोः सेनासंबंधिपुरुषयोर्मिथः परस्परं विग्रहाद्विरोधात् वधो घातः किं न स्यात् अ
पि तु स्यादेव अतो राशिमैत्रं मुख्यमित्युक्तं १२ अथ प्रत्युत्तरं उपेंद्रवज्राः स्वामिनि अपश्यति सति तयोः सेनानरयोर्वधो मिथः स्यात् स्वामिसम
क्षं न स्यादेवेति इति चेन्न हि ग्रहेश्वराणां राश्यधिपानां किमदृष्टमस्ति अपि तु तैः सर्वं दृष्टमेव देवतात्वात् यत्तु दशमत्तीये इत्यादिना दर्शना

दर्शनमुक्तं तत्तत्फलार्थमेव वास्तवं तु ग्रहेश्वराणां किमदृष्टमस्तीति अतः कारणात्प्रभुसख्यं स्वामिमैत्रमेवाधिकमिति चेत् तदा समसप्तकस्य कुंभसिं
हावित्यादिकस्य का गतिकः प्रश्नो गमनिकोकथ्यतामिति १३ सिद्धांतरूपां गतिमाह उपजातिका स्वभावमैत्र्यादिषु चतुर्षु मध्ये पूर्वपूर्वं गमे पूर्वपूर्वाला
भे सति परः परः उत्तरोत्तरः गवेष्यः अन्वेषणीयः आदौ राश्योः स्वभावमैत्री समसप्तकादीका विलोक्या तदलाभे स्वपत्योः तद्राश्यधिपयोः सखिता तस्य
दसख्यस्यालाभे वशित्वं राश्योर्वश्यत्वं वश्या—लाभेन्योन्यं भयोर्नक्षत्रयोर्योनिशुद्धिः योनिवैराभावः चेत् युगपद्युतिश्चतुर्णामपि लाभस्तदा हस्ते त्रि
वर्गी स्यात् त्रिवर्गो धर्मकामार्थैरित्यमरः धर्माद्यः करगताः स्युरिति एवं पूर्वपूर्वस्यैकस्य अलाभे सति उत्तरोत्तरलाभे न तदपवाद उक्तः चतुर्णामपि।

स्वभावमैत्री सखितास्वपत्योर्वशित्वमन्योन्यभयोनिशुद्धिः। परः परः पूर्वगमे गवेष्यो हस्ते त्रिवर्गी युगपद्युतिश्चेत् १४
आपार्श्वकेंद्रद्वयगाः प्रसूतौ तत्कालमित्राणि—मिथः स्वपाथ्याः न्यूनामपि स्त्रीनरभृत्यराज्ञां तत्कालसख्यं विशिनष्टि
मैत्रम् १५

लाभेति शुभं त्रयाणां द्वयोर्वा लाभे तारतम्यं कल्प्यं १४ अथ स्वाभाविकग्रहमैत्रस्यापि तत्कालसख्येन न्यूनाधिकतामाह इंद्रव
ज्रा प्रसूतौ जन्मकाले यस्माद्ग्रहात्पार्श्वयोः केंद्रद्वयं पार्श्वकेंद्रद्वयं तन्मर्यादीकृत्यैत्यापार्श्वकेंद्रद्वयं तत्र गच्छंतीति आपार्श्वकेंद्रद्वयगाः स्वपाथ्याः ग्रहाः
खे आकाशे पथ्यंति गच्छंतीति स्वपाथ्याः तेन ग्रहेण सार्धं मिथो मित्राणि स्युः एतदुक्तं भवति जन्मकाले यस्मिन् राशौ यो ग्रहः स्थितस्तस्मात्पृष्ठवर्ती केंद्रं
दशमस्थानं भवति अग्रतश्चतुर्थं तदवधित्वेन तदंतर्वर्तिस्थानानि दशमैकादशद्वादशद्वितीयतृतीयचतुर्थानि एषामन्यतमस्थाने स्थितौ ग्रहौ तौ रा
तत्कालं मिथो मित्रे स्तः अन्ये तु शत्रव इति तथा च वराहः तत्कालेन दशायबंधुसहजस्वांत्येषु मित्रं स्थित इति प्रसूतिग्रहणं तत्कालसख्यस्य जा १

तकशास्त्रोक्तेः अतोन्यत्रापि तद्विलोक्यमितिज्ञेयं तदेवाह न्यूनामपि स्त्रीनरौ च भृत्यराजानौ च तेषां स्त्रीनराणां भृत्यराज्ञां च ग्रहवशेन या स्वाभाविकी मै
त्री तां एतत्तत्कालसख्यं विशिनष्टि विशेषयति कथंभूतामपि न्यूनामपि किं पुनः संपूर्णां तथाहि स्वाभाविको यो मित्रं समः शत्रुर्वा स चेत्तत्काले मित्रं भवति तदा
क्रमेणाधिमित्रं मित्रं समः स्यात् चेत्तत्काले शत्रुस्तदा समः शत्रुरधिशत्रुरिति १५ अथ वर्णमित्रमाह इंद्रवज्रा यजनयाजनादीनि षट्कर्माणि तानि येषां ते षट्कर्मा
णः विप्राः तेषां शासितदेवदैत्यौ अधिपौ स्तः शासिताः सिक्षिताः देवदैत्या य्याभ्यां तौ गुरुशुक्रावित्यर्थः राजन्यानां क्षत्रियाणां समूहो राजन्यकं तस्याधिपती कुजा
र्कौ स्तः विट्शूद्रयोः क्रमेण चंद्रबुधौ विशां चंद्रः शूद्राणां बुध इति संकीर्णानां संकरभवानां निषादादीनां पतिः शनिः स्त्रीनृषु बुधूवरेषु वर्णमैत्री स्यात् तद्यथा

षट्कर्मणां शासितदेवदैत्यौ राजन्यकस्याधिपती कुजार्कौ विट्शूद्रयोश्चंद्रबुधौ शनिश्च संकीर्णपः स्त्रीनृषु वर्णमैत्री १६
सुरगुरुर्जगुरुकविको विदो विरवयो विकुजाविरवींदवः अशशिसूर्यकुजाः सुहृदा रवेर्यवनयुक्तिरियं नयवीयसी १७ ॥

श्यधिपयोर्वर्णौ विलोक्यौ तत्रोत्तमवर्णः पुरुषः शस्तः समवर्णो मध्यः हीनवर्णोधम इति एतदुक्तं ग्रंथकृता स्वदेशप्रसिद्धेः अन्यदेशे तु मीनाद्ब्राह्मणपूर्वो
वर्णाः कन्योत्तमो वरः श्रेष्ठः मध्यस्थः समवर्णो नीचो हीनो द्रवः पुरुष इति इयं वर्णमैत्री केवलं गुणमात्राय न तु मेलकनिर्णयाय अतो मेलकनिर्णयानंतर
मेवोक्ता १६ एवं राशिकूटमुक्त्वा तदुपयोगि ग्रहमैत्रं जातकोक्तमत्राह एते दारभ्य श्लोकाष्टकं द्रुतविलंबितं रवेः रविमारभ्य एते सुहृदः स्युः अर्थादन्ये श
त्रवः रवेः सुरगुरुर्मित्रं अन्ये शत्रवः चंद्रस्य बुधगुरू मित्रे शेषाः शत्रवः भौमस्य शुक्रबुधौ मित्रे अन्ये शत्रवः बुधस्य रविव्यतिरिक्ताः मित्राणि रविः शत्रुः गुरोः
कुजव्यतिरिक्ता मित्राणि कुजः शत्रुः शुक्रस्य रवींदुव्यतिरिक्ता मित्राणि रवींदू शत्रू शनेः शशिसूर्यकुजव्यतिरिक्ता मित्राणि शशिसूर्यकुजाः शत्रवः इ

बृ·टी· यं यवनाचार्याणां युक्तिर्नयवीयसी नकनिष्ठा स्थूलदूरयुवेतियवादेशः यवनाचार्यमतमिदं महदित्यर्थः १७ कथमिदं महदिति संस्थापयति विरोचनः सू
१८ र्यः मिहिरोपि सूर्यः अतो वराहमिहिरः इदं यवनमतं निजमते बृहज्जातकारावुदीर्य उत्क्वापि न दूषितवान् पुनर्वाक्यालंकारे अन्यमतं स्वमते नहि निवे
श्यं यदि निवेशितं दूषितव्यं तर्हि नोचेत्तर्हि तत्समतमेवेति न्यायविदः वक्ष्यति च अतः कारणात्स वराहः इदं ग्रहमैत्रीशास्त्रं यवनेषु यथातथं सत्यं
हु अतिशयितं जयति सर्वोत्कर्षेण वर्ततइति मन्यतएव वराहोपि यवनशास्त्रं याथार्थ्येन अतितरां मन्यत एवेत्यर्थः १८ एतदेव भंग्यंतरेणाह यस्मात्कार
णात्स्वमते स्वमतमध्ये निवेशितं निक्षिप्तं परमतं यदि न दूषितं तदा तन्मतं आदृतं स्वीकृतमेवेति न्यायविदः तत्तस्मात्कारणात् नूनमित्यहं तर्के इतीति

इदमुदीर्य वराह विरोचनो निजमतेपि न दूषितवान्पुनः सबहुमन्यत एव यथातथं जयति शास्त्रमिदं यवनेष्वपी १८ पर
मतं स्वमते विनिवेशितं यदि न दूषितमादृतमेव तत् कलितकेवलसत्यमतः स तद्यवनयुक्तिषु नूनमनिस्पृहः १९ किमबहु
त्वमयं मिहिरो दिशन् ग्रहसुहृत्त्वमिदं जगदेहदिदि उभयथापि समं सतितन्मतेमहतिकेपि भवेमवधंयतः २०

कथं स वराहः कलित
केवलसत्यमतः कलितं लक्षितं केवलं साकल्येन सत्याचार्यस्य मतं येन स तथा यवनपंक्तिषु यवनाचार्यवचनेषु अनिः स्पृहः निर्गतः स्पृहा निस्पृहः न
निस्पृह अनिस्पृह इति वराहोपि सत्याचार्यमतं सम्यगालोच्यापि यवनमतस्पृहयत्येवेत्यहं तर्के इत्यर्थः १९ एवं चेत्तर्हि वराहो यवनमते अस्यमत
त्वं कथमुक्तवानित्याशंक्याह अयं मिहिरो वराहमिहिरः इदं यवनोक्तं ग्रहसुहृत्त्वं ग्रहमैत्रमादिशन् सन्न बहुत्वं अबहूनां मतमिति हृदि मनसि किंज ग·
गृहे धृतवान् यवनग्रहमैत्रमुक्त्वा केषांचिदेवं मतमिति कथं उक्तवानित्यर्थः तथा च तद्वाक्यं जीवो जीवबुधौ सितेंदुतनयौ व्यर्का विभौमाः क्रमाद्वीं दुर्का १

विकुर्जेंदवृम्भसुहृदः केषांचिदेवंमतमिति अतोयवनमैत्रमबहुसंमतमितिवराहस्याभिप्रायइतिभावः अन्योत्तरं उभयथेतितन्मतेतस्यवराहस्यमतेम
हतिपृथुतरेसतिउभयथाउभयपक्षेपिसमंतुल्यंस्यात् यतोयस्मात्कारणाद्यंकेचनकेपिभवेमस्यामावराहमतंमहज्ञेतर्हिवयमपिमहांतोभवामेत्युभय
त्रसमंउभयोरपिमानुषत्वादितिभावः २० एतन्निरस्यपुनःसंस्थापयति सकृतीकुशलोवराहःबहुतरैर्भूयिष्ठैर्यत्कृतंतदेवअनुससर्त्ति अनुसरतिबहुम
तानुसारमेववक्तीत्यर्थः स्सगतौ अयंधातुपाठेवैदिकधातुपाठेवैदिकधातुषेवबह्वादिषुपठितःभाषायांतुभ्वादिष्वेव अतोनुससर्त्तीतिछंदस्येवघटते
भाषायांतुसरतीत्येव यङ्लुकितुससर्तीतितस्मादयंकविप्रमादएव अतोत्रेदंपठितव्यं अनुससारतथ्ययथातथ्यमिति इतिचेत्तदपि अयथातथ्यसत्यं
नभवति अत्रहेतुः पृथगितियतः पृथगपिद्विगुणेत्रिगुणेप्राप्तेसकृत्त्रिगुणमितियदुक्तंसा अबहूक्तिः अबहूनामुक्तिःसायथावर्गोत्तमस्वराशिद्रेष्काणना

द

बहुतरैः कृतमेवकृतीसचेदनुससर्त्तितथ्ययथातथ्यं पृथगपिद्विगुणेत्रिगुणेसकृत्त्रिगुणमित्यबहूक्तिरियंयतः २१

वांशकेसकृद्विगुणं वक्रोच्चयोस्त्रिगुणितंद्वित्रिगुणत्वसकृत्त्रिगुणमितिवर्गोत्तमादिष्वन्यतमगतेवक्रोच्चयोरन्यतरगतेचग्रहेसतितस्यायुषः पृथग्द्वि
गुणस्यत्रिगुणस्यचप्राप्तौएकवारमेवत्रिगुणत्वंदायुःकार्यमितिवराहेणयदुक्तंतन्नबहुसमतमतोवराहोक्तमपिनबहुसंमतमितिभावः तथाचोक्तंक
ल्याणवर्मणाबहुताडनसंप्राप्तौमांकरोत्येकवर्गणावराहमिहिराचार्यःसानदृष्टापुरातनैरिति अतोवराहोपिबहुसंमतमेववक्तीतिनकिंतुकदाचित्स्वम
नोरुचिनमपिवक्तीत्यतोयवनोक्तग्रहमैत्रविषयेकेषांचिन्मतमितिवराहेणोक्तेपितद्वाक्यस्याप्रामाण्याद्यवनोक्तमेवग्रहमैत्रंमहदित्यर्थः एतन्नवांशचिं
ताव्याजेनापिसम्यक्संस्थापयिष्यतिएतद्ग्रंथकृतःस्वपक्षस्थापनार्थंपांडित्यमात्रंवास्तवंनैतदितिवयंब्रूमः यतउक्तंवराहेणबृहज्जातकेसत्योपदेशोवर

मत्र किंतु कुर्वंत्ययोग्यं बहुवर्गणाभिः आचार्यकृतं तु बहुघ्नतो यामेकं तु यद्भूरि तदेव कार्यमिति अत्रैवं मतभेदे सति सत्योपदेशो वरं तर्हि किंतु अन्ये स्वतुंगव
र्कवर्गोत्तमस्वगृहादिगते ग्रहे सति बहुवर्गणाभिर्पदायुः कुर्वंति तदयोग्यं अनवस्थादोषप्रसंगादिति भावः आचार्यस्य कर्म आचार्यकं तस्य भावः आचार्य
कत्वं आचार्यस्य सत्याचार्यस्यायमभिप्राय इत्यर्थः बहुवर्गणायां प्राप्तायां सत्यां यदेकमाधिकं वर्गणं तदेव कार्यमिति तद्यथा उच्चगतस्य उच्चगणो रूपत्र
यं वक्रगतस्य चेष्टागुणोपि रूपत्रयं ततः घातमूलं स्फुटगुणोपि रूपत्रयं वर्गोत्तमस्वगृहादिगते आश्रयगुणोपि रूपत्रयासन्नः तत्स्फुटगुणयोर्घातमूलं
कर्मगुणोपि रूपत्रयं अतः उच्चवक्रवर्गोत्तमस्वगृहे द्रेष्काणादिगतेपि सकृत्त्रिगुणमित्येव अतो वराहेण गर्गसत्यादिमतानुसारेण यदुक्तं तद्युक्तियुक्तं ब
हुमतं चेति अतो ग्रंथकृता बहुतरैः कृतमेवेत्यादि पद्यैरुक्तं तन्न विचारणीयमिति एवं राशिसख्यं प्रसंगेनोक्त्वा इदानीं नवांशसख्यस्यापि ग्राह्यत्वं प्रतिपा

अभिदुरावधिपौस्त्रजतः शुभं शशिनवांशकयोरिति देवलः तदपि चारुन चारुषितैर्मुखैर्व्यवहरंति तथा वितथाशयाः २२

दितत्वात्तत्कथं नोक्तं तद्विषयमाह २१ जन्मकाले शशिनवांशयोश्चंद्रगतनवांशयोः अभिदुरौ न भिदुरं यतो स्तावभिदुरौ सुहृदौ भिदेर्भावे कुरच् अधिपौ शु
भं स्त्रजतः कुरुत इति देवलो मुनिः प्राह तदपि चारु रमणीयं पतत्काल ¯ मीमांसयैव प्रतिपादितं तथा तेन प्रकारेण जनाः वितथाशया न व्यवहरंति वि
तथमसत्यमाशयो येषां ते तथा असत्याभिप्रायाः कैः आ ईषत् रुषितैः कुपितैर्मुखैः अयुक्तमनसि स्वीकृत्य किंचित्कुपितमुखैर्न व्यवहरंतीत्यर्थः यद्वा अवि
तथाशयाः यथार्थमनोभावाः मनस्येवमेवास्ति परंतु तादृशैर्मुखैस्तथा न व्यवहरंति लोके अप्रसिद्धिभयादिति भावः २२ एवं देवलादिमते सत्यपि ये
नवांशसख्यव्यवहारं न कुर्वंति तेषामनिष्टमाह ॥ ॥ ॥ ॥ ॥ ॥ ॥

येदैवविदः करग्रहे लग्नदृशं विना लवदृशा नवांशदृष्ट्यैव फलममंसत लुङि मन्यंते स्म तेपि शशिनवांशसखित्वे पराङ्मुखाः किंस्युः तथाहि उदयगत नवांशः स्वेशदृष्टेयुतो वा न भवति यदि मृत्युः स्यात् तदानीं वरस्येत्यादीनि नवांशदृष्ट्यैव लग्नफलं मन्यते लग्नफलं नवभागे इत्यंशस्य मुख्यत्वात् तस्य मेलकार्थे चंद्रनवांशयोः सख्यं कथं न मन्यंत इति तेषामनिष्टं अथेदमलम् अस्तु दूरं तिष्ठतु तत्कथं जगदिदं गतानुगतं गतमनुगतं गतानुगतं गतानुगतिको लोको न लोकः पारमार्थिक इति कश्चिदित्यज्ञानाद्व्यवहरत् तथैवान्यस्तद्द्दन्योपीत्यंधपरंपरावदिति भावः २३ इतिश्रीसकलागमाचार्यश्रीकेशवसांवत्सरात्मजगणेशविरचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां मेलकाध्यायस्तृतीयः ३ अथ सूक्ष्मं लग्नादिफलं विवस्तुस्तावन्नवांश

लवदृशैव हि लग्नदृशं विना फलममंसत येपि करग्रहे शशिनवांशसखित्वपराङ्मुखाः किमलमस्तु गतानुगतं जगत् २३ इति विवाहवृंदावने मेलकाध्यायस्तृतीयः ३ अथ नवांशचिंताध्यायः नवलवाधिपती उदयास्तयोरनिमिषार्चितचान्द्रमसायनौ

चिंतां निरूपयति तत्रादौ करग्रहोक्तनवांशोपपत्तिव्याजेन यवनोक्तग्रहमैत्रं संस्थापयति तथाहि लग्नं किल भर्तृस्थानं तत्रत्यो नवांशोपि सप्तमं जायास्थानं तन्नवांशश्च तयोः सख्ये वरवध्वोः सख्यं अतस्तूक्ष्मयोरुदयांशास्तांशयोः स्वामिवशात्सख्ये सति वधूवरयोरपि मैत्रं स्यात् अतो येषां नवांशानामेवं घटते त एव नवांशास्तुलाधरादयः पूर्वैः पठितास्ते च यवनोक्तग्रहमैत्रस्यैव स्वीकारात् घटंते अतो यवनोक्तमेव ग्रहमैत्रं प्रमाणमिति सिद्धांतं मनसि मत्वा पूर्वोत्तरप्रसारं च यति नवलवेत्यादिना श्लोकषट्केन अत्राध्याये सर्वाणि द्रुतविलंबितानि उदयास्तयोर्लग्नतत्सप्तमगतयोर्नवलवयोरधिपती अनिमिषार्चितचान्द्रमसायनौ यदि स्तः अनिमिषा देवाः तैरर्चितः बृहस्पतिः चंद्रमसोनंतरापत्यं चान्द्रमसा

यनोबुधः नैतच्चतुरस्रं अनंतरापत्ये फक् अविधानात् कोविदपत्यमात्रेपि अणादीनिछंतितद्‌पिनानडादिषुपाठात् यञ्द्विधानादर्शनाच्चएवंसति तस्येदमित्याद्यपिनिरस्तं यत्तुप्रायश्चित्तस्मृतौ चांद्रायणमितिप्रयोगः तदेवंव्युत्पादितं चंद्रस्य अयनमिवायनं चरणं यस्मिन्कर्मणि तच्चांद्रायणं संज्ञायां दीर्घः एवं सोमायनादि अतोग्रंथकृता अनंतरापत्ये चांद्रमासायन इति प्रयुक्तस्य गतिमात्रं चिंत्यते चंद्रमसइदं चांद्रमसं अयनं उत्पत्तिस्थानं यस्यासौ चांद्रमसायनो बुधः तौ गुरुबुधौ यदि समवैरिणौ स्तः तत्तदा वरपतिं वरयोर्वरवध्वोः पतिं वृणुते सा पतिंवरा संज्ञायां भृतवृजिधारिसहितपिदमइतिखः खित्वान्मुम् इष्टफलेषु शुभफलेषु फल्गुतानिःफलता स्यात् एतदुक्तं भवति लग्ननवांशः किल वरस्य स्थानं तत्सप्तमांशो वध्वाः अतस्तदधिपयोर्मैत्रेस

वरपतिंवरयोः समवैरिणो यदि तदिष्टफलेष्वपि फल्गुता १ तदुदयद्विपदांशनियामको यवनसौहृदमाद्रियतां जनः इतरथा कथमस्तु करग्रहस्तनुफलं हि लवानवलंबतः २

तितयोः शुभं तत्र यदा लग्ने धनुरंशः तदा सप्तमे मिथुनांशः अनयोरधिपती गुरुबुधौ तौ सत्याचार्यमते शत्रू मंदसितावित्यादिना मिथः समवैरिणौ भवतः अतो न वरवध्वोः शुभं न स्यात् तस्माद्धनुरंशो न ग्राह्य इत्यनिष्टप्राप्ते १ अतो यवनमैत्रं ग्राह्यमित्याह तत्तस्मात्कारणाज्जनः यवनसौहृदं यवनोदितमैत्रमाद्रियतां स्वीकुरुतां दृगतौ तुदादिः कर्तरि लोट् सौहृदमित्यस्य गतिः प्राग्वत् कथंभूतो जनः उदयद्विपदांशनियामकः उदये लग्ने द्विपदांशो नरराश्यंशस्तं यच्छतीति तथा कर्त्तरि वुण् लग्ने द्विपदांशस्वीकारं नियममिव यवनमैत्रं ग्राह्यमित्यर्थः अन्यथात्वे दोषमाह इतरथेति इतरथा द्विपदांशानंगीकारे करग्रहः कथमस्तु अपितु मास्तु तत्कथं हि यस्मात्कारणात्तनुफलं लग्नफलं लवान् अवलंबते आश्रयते लवाधीनं लग्नफलमिति अयंभावः लग्नफलं नवभागेष्वेकत्वान्नवांशो मुख्यः स चद्विपदएव भाव्यः तथा चोक्तं प्र

स्मन्नेहि पदग्रहाकुर्याद्न्यांशकोद्यो नाशमिति अतोहि पदांशाद्न्यनवांशेवरवध्वोर्नाशविधानात्करग्रहः कथंस्यात् अतोहि पदांशनियमेसति उदयाम्नां
शाधिपयोर्मैत्र्याभाव्यंमा च धनुर्द्दशांशेयवनोक्त्यालभ्यते अतोयवनोक्तमेवग्रहमैत्रं भाद्विपनामिति २ अत्राप्यन्यस्याशंकामनूद्यदूषयति अथप्रकारांतरं अथ
उभयसप्तमौ नरिपूस्तः समसप्तकयोः सदाराशिमैत्री अस्त्येव चतुर्दशमवत् अतोधनुर्मिथुनयोर्मैत्रंसदास्तीति यदीदंतदाकुलशस्यहि पदतां नतांदधतोविभक्तो
पयशः अशुभत्वंकिमागतं कुंभेहि उतराधे मनुष्यः उदयास्तांशयोः सदामसप्तकत्वान्मैत्रं अतः कुंभांशः कथंनगृहीतइति अत्रोत्तरं अशुभसंतेति अशुभसं
तापापग्रहभवनत्वंकुंभोहि पापग्रहभवनमतोनोक्तइति अत्रप्रत्युत्तरं एवंचेत्तर्हि वृषानिमिषौवृषमीनौकिमुपस्सितौ कथंपरित्यक्तौ वृषमीनौसौम्यभवनत्वे

अथरिपूयदिनोभयसप्तमौतदयशः कुलशस्यकिमागतं हि पदतांदधतोयशुभसंतायदि वृषानिमिषौकिमुपेक्षितौ ३ अ
मनुजाविति चेत्किमुशौनकोनवलवंझषमादृतवान्मुनिः शुभग्रहहि पदास्तलवः सचेद्भवतु तत्रकिमस्तुतुलाभृतः ४

पिकथंत्यक्ताविति ३ अत्रोत्तरप्रत्युत्तराणि तौवृषमीनौ अमनुजौमानुषौनभवतः नतुदयहि पदांशनियामकइत्युक्तत्वात् इतिचेत्तर्हिशौनकोमुनिर्झषंमी
नंनवलवंकथमादृतवान् स्वीकृतवान् प्रहसितवदन्माचमीनांशइति मीनोहि जलचरः कथंशौनकेनगृहीतइति अत्रोत्तरं समीनः शुभग्रहहि पदास्तलवः शु
भग्रहहि पदस्य अस्तलवोयस्यसतया मीनस्यास्तांशः कन्या असौशुभग्रहहि पदस्य अतोमीनांशः शौनकेन आदृतइति अत्रप्रत्युत्तरं इतिचेत्तर्हितुलाभृतः
किमस्तु तुलाधारस्यहि अस्तलवोमेषः सशुभग्रहहि पदस्यनभवति अतः कस्मात्तुलाधरः स्वीकृतइति ४ अत्रोत्तरप्रत्युत्तरे यद्येवमुक्तंलग्नानंतर्हि अयमेकः
नयोनवांशोहिचरणः शुभभंचपरिगृह्यते उदयनवांशास्तनवांशयोरेकतरोनवांशोमनुजः सौम्यगृहंचगृह्यते नतुद्वावपीत्यस्मात्कमाशयः द्वयोरेकस्यानिषे

टी० रणेतरपतुलाभृतो हि अस्मांशो मेषः तयोस्तुलामेषयोरेकतरस्तुलाधरः अमीोद्विचरणः शुभभंचास्ति अतस्तुलांशो गृहीत इत्यर्थः अन्योन्यंऽगत्यस्यपंसंबो
१ धनेहेतवईरितं उक्तमिदमसंगतमघटमानं कस्मात् किल यस्मात्कारणाज्जगति लोके एकवशात्सौहृदंनास्ति सौहृदं हि उभयगतो धर्मः स चैकस्मिन्नेवनघ
टते अत एकतरो गृह्यते इतिचेदुदीरितं त्वयानतदंशमिति ईरितमत्रभावे क्तः नवेवेति शेषविवक्षायां षष्ठी सौहृदमित्यस्य गतिः प्राग्वत् एवंसर्वविकल्पा
न्परिहृत्य परिशेषात्फलितं सिद्धांतमाह ५ खचरयोरुदयांशास्तांशस्वामिनोः सुखितामित्रत्वंकारणं वक्तव्यं विकल्पांतराणां निरासात्मायदिकारणं स्यात्त
र्हि मा सखिता यवनाध्वनि यवनमार्गे नितरां अतिशयेन ध्वनति शब्दायते यवनशास्त्रे प्रसिद्धेत्यर्थः सत्याचार्यमते तु तयोर्मैत्र्यभावात् अतो यवनमत्र

द्विचरणः शुभभं च नवांशकः स्तदयमेकतरः परिगृह्यते इदमसंगतमंगत वेरितं जगति नैकवशात्किल सौहृदं ५ खचरयोः सखितायदिकारणं ध्वनितसा नितरां यवनाध्वनि कलशसिंहनवांशपशत्रुता परिणमत्युभयोरपि शास्त्रयोः ६ अथानतयोः समसप्तसुहृत्पथः कथमसूक्ष्मगतिः सच नैकधा

मेवप्रमाणमिति भावः ननु कुंभांशं परित्यागः सत्याचार्यमते वैरसद्भावादि
ति चेत्तत्राह कलशेति कलशसिंहौ घटसिंहौ तौ नवांशौ च उदयास्तनवांशौ तौ पातस्तौ तत्स्वौ तदधिपती तयोः शत्रुता वैरत्वं उभयोर्द्वयोरपि शास्त्रयोः परिण
मति परिपाकं प्राप्नोति शनिसूर्ययोर्वैरं यवनशास्त्रे सत्यशास्त्रेप्यस्ति अतो यवनमते शत्रुत्वसद्भावात्कुंभांशस्त्यक्तः नतु सत्यशास्त्रे वैरसद्भावादिति भावः
एवमंशग्रहमैत्र्यादिकं विचार्य नेतर्हि राशावपि कथं नावलोक्यत इत्याशंकां परिहरति ६ अथानंतर्ये हि यस्मात्कारणात्तयोर्यवनसत्यशास्त्रयोः समसप्त राम०
सुहृत्पथः कथमसूक्ष्मगतिः अपि तु सूक्ष्मगतिरेव समास्सप्तमसप्त च समसप्तः सुहृदां पंथाः सुहृत्पथः ऋक्पूरब्धूःपथामित्यप्रत्ययः समसप्तानां सुहृत्पथः समस २१

प्रसुहृत्त्वयः वरवधूस्थानराश्योः सदा समसप्तकत्वाद्भ यमतेपि समसप्तकराश्योर्मित्रत्वमार्गः सूक्ष्म एवेत्यर्थः सच्च सुहृत्त्वयः एकधा एक प्रकारो नास्तित
त्कालमैत्रादेरपि सद्भावात् उक्तं हि स्यूनामपीत्यादिना ततस्मात्कारणादिहास्मिन्विवाहे अखिलैः यवनादिभिः सत्यादि मिश्रखलखेटग्रहाणि पापग्रहभवनानि
मेषसिंहादीन्यपि लग्नगतानि अनुमेनिरे अनुज्ञातानि अपिः संभावनायां पापभवनान्यपि शुभानि किं पुनः शुभभवनानीत्यर्थः ७ अथ प्रकृत स्वसिद्धांतमाह इत्युक्तहेतु
भिः सिद्धं तुलाजितुमप्रमदाधनुः प्रथमखंडं सततमनवरतं अखंडफलं पूर्णशुभफलदं जगुर्यवनादयः तुला प्रसिद्धा जितुमो मिथुनः प्रमदा कन्या धनुः प्रथम
खंडं धनुषः पूर्वार्द्धं द्वंद्वैकत्वं न खंडफलं यस्य तत्तया तथा हि धनुः पूर्वार्धकुंभोत्तरार्धमिथुनतुलाधरकन्या द्विपदाः किलोक्ताः तत्र धनुषोस्तांशो मिथुनः तत्स्वा
मिनो गुरुबुधयोर्यवनमते मैत्र्यतो धनुरंशः शुभः एवं मिथुनांशोपि तुलाया अस्तांशो मेषः तत् स्वामिनोः कुजशुक्रयोः यवनमते मैत्र्यमतस्तुलांशः कुंभः

इहहि लग्नगतान्यनुमेनिरे तदखिलैः खलखेटगृहाण्यपि ७ इति तुलाजितुमप्रमदाधनुः प्रथमखंडमखंडफलं जगुः सत
तमस्तपतिद्विषदीश्वरं नवलवं बलवंध्यपतिं त्यजेत् ८

कन्याया अस्तांशो मीनः तत्स्वामिनोर्गुरुबुधयोर्यवनमते मैत्र्यमतः कन्यांशः शुभः कुंभ
स्यास्तांशः सिंहः तत् स्वामिनोर्मैत्राभावात्कुंभांशो न शुभः अत एव नवांशाः शुभा अखिलैरुक्ताः तथा चाहुः प्राग्लग्ने द्विपदग्रहात्कुयादन्यांशकोदयो नार्यं हि
पदेष्वपि कन्यातो लि मिथुन धन्वंशकाः शस्ता इति अयं ग्रंथकृतोभिप्रायः सम्प्रपंचं मया वर्णितः परमार्थिकत्वे तु दर्वाचीनानां नयना वर्णमात्रं तद्यथा यत्त्वया सिद्धांति
तं तुलादिपूक्तनवांशेषु उदयास्तांशाधिपयोः खचरयोः सखिता कारणमिति तर्हि मेषांशः तदधिपयोः सत्यपि मैत्रे कथं त्यज्यते अशुभः स्त्वादिति चेत्तन्न वृषांशस्यम
न्यपि मैत्रे त्यागात्त अमनुजत्वादिति चतर्हि शौनकेन मीनांशः कथमादृतः शुभग्रहद्विपदाम्तलब्धः स चेन्न दपिन तर्हि तुलांशः कथमाद्रीयत इति त्वयैवोच्यते उदया

स्वांशयोरेकतस्माद्दृशाग्राह्यत इति चेत्तदपि न जगति नैकवशाक्लिल सौहृदमिति त्वयैवोपन्यस्तत्वात् अथ चेन्नवेदमभिप्रेतं उदयद्विपदांशनियामक इति तदपि न जगति नैकवशाक्लिल सौहृदमिति त्वयैव स्मारितत्वात् अस्तांशोपि द्विपदो भाव्यः अथ परिशेषात्प्राग्लग्ने द्विपदग्रहात्कुर्यादन्यांशको दयो नाशमित्यागमबलादिदमित्येव वक्तव्यं तर्ह्यस्माकं फलितं मनोभिलषितं आगम एव कथं तुलांशादिषु कारणं तत्स्वीकर्तव्यः किमर्थं कारणांतरं ग्रहमैत्रं कल्पनीयं कल्पनालाघवात् शौनकेन मीनांशस्य अमनुजत्वेपि स्वीकाराच्च अतो नवांशोक्त्या यवनमैत्रशास्त्रस्य संस्थापनेन न संयुज्यते किमनेन नवलवाधिपतीत्यादिना ग्रंथसंदर्भेण अत एव वराहः ज्योतिषमागमसिद्धं विप्रतिपन्नो न योग्यमस्माकं स्वयमेव विकल्पयितुं किंतु बहूनां मतं वक्ष्य इति अतो वराहेण यवनमते केषांचिदेवं मतमित्युक्तं सत्योक्तं ग्रहमैत्रं बहुमतमतः सर्वजनेषु प्रसिद्धतरं यवनमैत्रत्वे कदेशीयमतामहद्भिरुपेक्षितं किमर्थमत्र ग्रंथकृतोभिनिवेशः किमपराद्धं च सत्यादिभिः उच्यते ग्रंथकृद्भिः स्वगो

लवपतिः कुरुते लवलग्नयोः पतिमतिं त्रिवसुव्ययवित्तगः नवलवास्तपतिः प्रतिहंत्यसून्मृगदृशश्च तदस्तभयोस्तथा ९

स्वार्थे किं निरपूर्वं वक्तव्यं वृथैवमहत्तामयुक्तिः किं विदूषणीयेत्यलं बहूक्त्या अथैषामप्यंशानां विशेषमाह अस्तपतीति अस्तो स्तांशः तस्य पतिस्तस्य द्विपन् शत्रुः सईश्वरो यस्य नवांशस्य स तथा उदयास्तांशाधिपयोस्तात्कालिकशत्रुत्वे स नवांशस्त्याज्य इत्यर्थः तुलादिषु हि उदयास्तांशाधिपयोः स्वाभाविकशत्रुत्वाभावान् विशेषांतरमाह बलवंध्येति बले न वंध्यः पतिर्यस्य नवांशस्य स तथा यस्यांशस्य पतिः स्थानादिबलैर्यदि हीनः तदा तमपि त्यजेदित्यर्थः ८ अथोदयास्तशुद्धिमाह लवपतिः लवलग्नयोस्त्रिवसुव्ययवित्तगः पतिमतिं कुरुते अंशाधिपतिरंशाल्लग्नाद्वा तृतीयाष्टमद्वादशद्वितीयस्थितो भर्तृमतिं कुरुत इत्यर्थः इयमुदयशुद्धिः अथास्तशुद्धिः नवल वेति नवलवादस्तं सप्तमं तस्य पतिः तदस्तभयोर्लवलग्नयोरस्तभे सप्तमभवने तयोः तथा तद्वत् त्रिवसुव्ययवित्तगः मृगदृशो वध्वा

असून्त्राणान्प्रतिहंतिनवलवात्सप्तमाधीशोनवांशसप्तमाल्लग्नसप्तमाद्वान्त्रिवसुव्ययवित्तगस्तदावधूंहंतीत्यर्थः ननुपूर्वैर्यवनादिभिर्नवांशाधीशस्यनवांशद
ष्टौलग्नदृष्टौचसत्यामुदयशुद्धिरुक्ताकथमत्रोक्तंत्रिवसुव्ययवित्तगइति उच्यते षष्ठंद्वितीयभवनंद्वादशमेकादशंनपश्यंतिस्वस्थानाद्दीस्यंतेग्रहास्तथान्यानिभव
नानीत्यत्रग्रहस्थानाद्यदेकादशंतस्माद्ग्रहस्तृतीयस्त्वभवति एवंयत्सप्तमंतस्माद्ग्रहोष्टमएवयद्द्वितीयंतस्माद्द्वादशःयद्द्वादशंतस्माद्द्वितीयइति अतोयदुक्तंत्रिवसुव्य
यवित्तगइति तद्ग्रहादर्शनमेवेतिनविरोधः अथान्यैःकेवलमत्राहष्ट्यैवोदयशुद्धिरुक्ता पुतःस्वनायेनविलोकितोवानवांशकोलग्नगतोनराणां निहंत्यनिष्टानि
तथापमृत्युकलत्रसंस्यग्ध्वनितंविनीनामिति तदलाभेलग्नदृष्ट्यावापश्यद्यदांशाधिपतिर्विलग्नंलग्नेथवास्यादुदयांशशुद्धिःअस्तांशनाथःस्मरभंविलग्नात्

उभयदृक्फलदाबलदार्ध्वतोलवदृगुरुहतेक्रियदूनतां तदिहकेवललग्नदृशःफलंशकलितंकलितंयवनेश्वरैः १०
स्पृशतिकिन्नकदाचिददृश्यतामवयवोवयविन्यवलोकिते अमतकेवललग्नदृशांनतेन्मतमतकैसहंससपास्महे ११

श्येस्तदास्तांशविशुद्धिरुक्तेति अत्रतुलवलग्नयोरितियोगपद्यमुक्तं तत्कथमित्याह१उभयस्यदृक् उभयदृक् नवांशस्यलग्नस्यापियादृष्टिरित्यर्थः सा
फलदास्यात्कस्मात् बलदार्ध्वतः बलस्यदृढत्वात् लग्नंहिशरीरं अंशस्तुतदवयवरूपः उभयदर्शनेसतिसम्यक्फलमिति अतोलवदृक् अंशदृष्टिःक्रिय
दूनतामुद्वहतेधारयति किंपरिमाणमस्येतिकियत् कियच्चतदूनंचतस्यभावःकियदूनता केवलमंशदृष्टिःकिंचिन्न्यूनफलेत्यर्थः तत्तस्मादतःकारणा
दिहास्मिन्विवाहेकेवललग्नदृशःफलंशकलितमर्धितंयवनेश्वरैःकलितलक्षितं शकलंसंजातमस्येतिशकलितं अंशदृष्टिंविनाकेवलायालग्नदृष्टेःफ
लमर्धितंयवनैःप्रोक्तमित्यर्थः १० अमुमुक्तमेवार्थमुत्तरार्द्धेनाह यदीति यस्मात्कारणात् अवयविनिविलोकितेसति अवयवःकदाचिददृश्यतांकिंनस्पृश

टी० २३

ति अपितु अवयविन्यवलोकितेपि कदाचिदवयवो प्यदृश्यतांस्पृशत्येवेति द्वौनौप्रकृतार्थं ब्रूतः दृष्टेप्यवयविनि कदाचित्कश्चन तदवयवोनदृश्यत इत्यर्थः ततस्मात्कारणादस्मन्नु केवललग्नदृशांनमताकेवलालग्नदृग्येषांतेषांमतंनअतर्कसहं अपितुतर्कसहमेवतर्कसहतेतत्तर्कसहं वयंसमुपास्महे अनुसरामः येषांकेवललग्नदृष्टिर्नसमता अपितुउभयदृक्संमता तेषांमतंतर्कसहंतद्वयंमन्यामह इत्यर्थः यदुक्तमुभयदृक्फलदेतितत्रकेवललग्नदृष्टिंमन्यमानःपरआक्षिपति ११ ननु इत्यहो इहविवाहे अंशपतिर्लग्नविलोकनेसतिनिजंनवांशं कलयति पश्यतितस्यलग्नातत्वात् अन्यथात्वे अनिष्टमाह यमवलोकयतइति नवांशपतिर्यंनवांशमवलोकयतेसयदितनोःसकाशात्पृथगस्तितदातदिष्टफलायतस्यलग्नस्यइष्टफलतवापिसंमतंतस्मैजलांजलिःस्यात् जलांजलिदानंम

ननुनवांशकमंशपतिर्निजंकलयतीहविलग्नविलोकने यमवलोकयतेसतनोःपृथग्यदितदिष्टफलायजलांजलिः १२
अपृथगस्तिसचेन्ननुपश्यतातनुमसावधिपेननिरूपितः हृदयहारदृशैवमृगीदृशःप्रणयिनातरलस्तरलद्युतिः ॥ १३ ॥

तस्यैव अतोलग्नफलंगतमेवेत्यर्थः तनुफलंहिलवानबलंबले इतितवापिसंमतंनवांशाधीनंलग्नफलमितितस्यमज्जनमेवस्यादित्यनिष्टप्रसंजनं १२ अत्रापि निश्शुभयदृष्टिंमन्यमानःस्वयमाह ननु अहोसनवांशश्चेत् अपृथगस्ति लग्नांतर्गतएवास्ति तदातनुलग्नंपश्यता अवलोकयता अधिपेनलग्नस्वामिनाअसौनवांशोनिरूपितो दृष्टएवस्मात् रूपअवलोकने चुरादिः केनकइवप्रणयः प्रीणनंतदस्यास्तीतिप्रणयीप्रियः तरलोहारमध्यमणिः कथंभूतेनप्रणयिना मृगीदृशः अंगनायाहृदयहारदृशाहृदयेहारस्तंपश्यतीति हृदयहारदृक्तेननतयाकथंभूतोमध्यमणिः तरलद्युतिः तरलाचंचलाद्युतिर्यस्यासौतयाप्रियेणांगनायाहारेदृष्टेसतितदंतर्गतोमध्यमणिर्दृष्टएवेति तथालग्नंपश्यतातदधिपेनतदंतर्गतोनवांशोपिदृष्टएवेत्यर्थः अतोनवांशपतिनानवांशोदृष्ट

राम
२३

श्च इति पत्न्योच्यते तद्व्यर्थमित्यनिष्टप्रसंजनं अतश्च प्रागुक्तकालमीमांसनाच्च नवांशपतेर्लग्नदृष्टिस्तदंतर्गतनवांशदृष्टिश्च विलोक्येतिसिद्धं ननु लग्न
पतिना लग्नं दृष्टव्यमस्तपतिनास्तलग्नमित्येतत्तदपि केषांचिन्मतमस्ति तदपि दूषयति १३ यदि तनुपतिस्तनुं न पश्यति अथ अस्तपो लग्नात्सप्तमाधीशोस्तंल
ग्नात्सप्तमं न पश्यति तदा तत्कृतं लग्नकृतं अस्तलग्नकृतं च शुभं न पश्यति इति परः कश्चिदाह बत अहो अस्मिन्मते लवतरौ लव तरुरिव तरुस्तस्मिन् रौद्रः उग्रः
शाणो द्रुतः अशनिः स्वड्गः परं पतेप्परामित्यव्ययमुत्कृष्टार्थे अस्मिन्मते नवांशवृक्षोपरि अत्यर्थं रौद्रशनिपातो भवेन्नवांशफलोच्छेद इत्यर्थः एवं सयुक्तिकामुदया
स्तशुद्धिमुक्त्वाधुना जन्मराशिलग्नाभ्यामंशसशुद्धिमाह १४ लग्नं च भं च लग्नभे जनने लग्नभे जन्मलग्नजन्मराशी तयोर्मृतिशास्तितुः अष्टमस्थानाधिपतेः मृति

तनुपतिस्तनुमस्तमथास्तपो यदि न पश्यति नश्यति तत्कृतं इति परः परमत्र मते पतेल्लवतरौ च तरौद्रइवाशनिः १४
जननलग्नभयोर्मृतिशास्तितुर्मृतिगतस्य च राशिनवांशकाः तनुगता यदि तत्तनुते वधूररितिलकातिलका यजलांजलि १५

गतस्य ताभ्यामष्टमस्थितग्रहस्य च राशीनां नवांशकाः यदि विवाहकाले तनुगता लग्नस्थितास्युः तदा वधूररतिलका अभर्तृका सती तिलका यभर्त्रे जलांजलीन्त
नुते विस्तारयति इदं हातीत्यर्थः तिलकः शृंगारकतिलकः नास्ति तिलको यस्याः सा अतिलका विधवेत्यर्थः तिलक इव तिलकास्तिलकः भर्त्तेति यावत् मृतभर्त्रे स्वयमे
वाजलिदानेन वध्वा अनपत्यतापि सूचिता एतदुक्तं भवति कस्यचिज्जन्मलग्नं वृषः जन्मराशिः कर्कः तयोरष्टमभवने धनुर्धरकुंभौ तयोराधिपती गुरुशनी एतौ
नित्यौ कदाचित्तत्र धनुषि कुंभे वा कश्चन ग्रहः स्थितः स चेच्छुक्रः तेषां गुरुशनिशुक्राणां राशयो धनुर्मीनमकरकुंभतुलावृषाः एषामन्यतमस्य नवांशो यदि तस्य वि
वाहे लग्नगतो भवति तदा परिणीता स्त्री अनपत्या विधवा भवेदिति एवं च यावगिवि जन्मलग्नाज्जन्मराशेश्च १५ अथाष्टमलग्नदोषं तदपवादं चाह ॥ ॥

जननर्क्षविलग्नयोर्जन्मराशिजन्मलग्नयोरष्टमंभवनमभ्युदितंउदयंगतंविवाहेत्यजेत् जन्मराशेर्जन्मलग्नाद्वा अष्टमंलग्नंत्यजेदितितात्पर्यार्थः कथंभूतं म्यलिवृषं वृश्चिकवृषव्यतिरिक्तं वृश्चिकवृषावष्टमावपिनत्याज्यावित्यर्थः अत्रहेतुमाह सितपुलस्तीति तयोरलिवृषयोरीशतास्वामितातनुसमायोहिलग्नाधिपतिः सएव अनयोरिति इतिहेतोः सितपुलस्त्योर्मतेदूषणंनसमेतिनसंगच्छते ततुरितिराशेरप्युपलक्षणं एतदुक्तंभवति वृश्चिकोष्टमोमेषस्यैवभवति यो वृश्चिकस्याधिपः सएवमेषस्यएवंवृषोष्टमस्तुलायाएव तयोरधिपतिरेकएव अतएकाधिपतित्वात् वृषवृश्चिकयोरष्टमत्वेनदोषइति केचित्सुहृल्लेपिनदोषमाहुः झषकुलीरवृषालिमृगांगनाजननराशिविलग्नगृहाष्टमाः शुभफलाभगुणाकथितास्तयोरधिपतीसुहृदौहिपरस्परमिति १६ अथचरन

म्यलिवृषंजननर्क्षविलग्नयोर्भवनमष्टममभ्युदितंत्यजेत् सितपुलस्तिमतेनतदीशतातनुसमेतिसमेतिनदूषणं १६
चरलवंचरवेश्मगमुत्सृजेन्मृगतुलाधरगेमृगलक्ष्मणि युवतिरत्रभवत्कृतकौतुकामदनवत्यनवत्यजनोन्मुखी ॥ १७

यसंनिपातदोषमाह चरलवंचरनवांशंचरवेश्मगंचरराशिलग्नस्थितमुत्सृजेत् परित्यजेत् कस्मिन्सति मृगलक्ष्मणिमृगतुलाधरगेसति मृगः शशलक्ष्मलांछनंयस्यासौतया तस्मिन् चंद्रेमकरस्थेतुलास्थेवेति चरामेषकर्कतुलामकराः तत्रकर्कमेषस्थितेचंद्रेविवाहनिषेधाभावात् मृगतुलाधरग इत्युक्तं अत्रफलमाहयुवतिरिति अत्रयोगेकृतकौतुकायुवतिः मदनवतीसती अनवत्यजनोन्मुखीभवेत् कौतुकंविवाहकंकणंकृतंकौतुकंयस्याःसा तया विवाहितेत्यर्थः ननवः अनवः पुरातनस्तस्यत्यजनंतत्रोन्मुखीउत्सुका मदनार्त्तासतीपूर्वभर्तृपरित्यागेउत्कंठिता परपुरुषगामिनीत्यर्थः केचित्तुवर्गोत्तमेसतिनैषदोषइत्याहुः वर्गोत्तमेवरग्रहेनचरोनवांशइति अतएवाहुरन्येपि कर्कलग्नेथवामेषेघटांशोयदिदीयते तुलायांमकरेचंद्रेवैधव्यंलभतेतदे

अथ चतुर्थद्वादशलग्नस्य दोषं तदपवादं चाह तनुश्च जन्म च तनुजन्मनी तयोस्तनुजन्मनोः जन्मलग्नजन्मराश्योः सुखगृहं चतुर्थभवनं तनुगतमित्यनुवृत्तिः
सुखहृत्सुखनाशनं स्यात् कैः सुखकर्तृभिर्ग्रहैः अबलताशबलैः कालाद्येति सप्तम्यर्थे तृतीया अबला नां भाव अबलता तया शबला मलिनास्तैर्बलरहितैरित्यर्थः
अर्थात्सुखकर्तारो ग्रहा यदि बलिनः स्युस्तदा जन्मलग्नराशिभ्यां चतुर्थलग्नं सुखहृत्स्यादिति अपीति तयोर्जन्मलग्नजन्मराश्योः व्ययभं द्वादशभवनमपि तनुगतं तदा
व्ययभृत्स्यात् व्ययं भनक्तीति व्ययभंकृत् व्ययनाशनं तदा कुदा यदा धनकारिणो ग्रहाः विगतबाधनकाः स्युः विगतं बाधनकं येषां ते तथा बाधारहिताः निर्दुष्टा इत्यर्थः
यदा धनदातारो ग्रहाः दोषरहिताः स्युस्तदा जन्मलग्नराश्योर्द्वादशलग्नं व्ययनाशकरं स्यादित्यर्थः अर्थादेते निर्बलास्तदा सतद्व्ययकरं स्यादिति तथा च गर्गः चतुर्थद्वा

सुखगृहं सुखहृत्तनुजन्मनोरबलताशबलैः सुखकर्तृभिः अपि तयोर्व्ययभं व्ययभंकृच्चेद्विगतबाधनका धनकारिणः १८
अशुभकृत्खलगः खलु यांशको जनुरनेहसि नेहसितांशुगे तनुगतेपि शिवं युवयोषयोर्बलवतोलवतो न भयं क्वचित् १९

दशेकार्ये लग्ने बहुगुणान्विते इति अपि चाकार्ये योगबला द्वादशे चतुर्थे इति अथ जन्मग्रहवशेन नवांशस्य दोषांतरं तदपवादं चाह १८ जनुषः अनेहा जनुरनेहा
तस्मिन् जन्मकाले अंशकः अशुभकृत्खलगो भवति अशुभं करोतीत्यशुभकृत् स चासौ खलश्च अशुभकृत्खलः तं गच्छतीति अशुभकृत्खलगः जन्मकाले दुष्टकारि
पापग्रहो यस्मिन्नवांशेस्ति स नवांश इत्यर्थः इह अस्मिन्नवांशे सितांशुः सितांशुं चंद्रं गच्छतीति सितांशुगः तस्मिन् सितांशुगे तनुगते लग्नगतेपि अपिः वार्थे युवयोषि
तोर्वरवध्वोः शिवं शुभं न स्यात् वरवध्वोर्जन्मकाले दुष्टकारी पापग्रहो यस्मिन्नवांशेस्ति स नवांशो यदि विवाहकाले चंद्रगतो लग्नगतो वा भवेत्तदा अशुभकृत्स्या
दित्यर्थः इत्यादिकस्यांशजनितदुष्टस्यापवादमाह बलवत इति बलवतः बलयुक्ताल्लवतोंशकाद्विद्धं न स्यात् चेज्ज्ञातकोक्तेन अधिपयुतो दृष्टो वेत्यादिप्रका

रिणा बलवानंशराशिस्तदायस्यकस्याप्यंशजनितस्यदुष्टस्यभयंनस्यादित्यर्थः १९ अथजन्मकालिकग्रहवशेन दोषांतरमाह जनुरनुक्रम्य अनुजनुरव्ययीभावः अ
यवा अनुगतोजनुः अनुजनुः अत्यादयःक्रांताद्यर्थेद्वितीययेति तत्पुरुषःपुंवत् जनुर्जननजन्मानीत्यमरः जन्मःकालानुक्रमेणयोग्रहोमृतिगजन्मलग्नादष्टमः
पश्च जन्मलग्नान्मृतिपः अष्टमस्थानाधीशः सग्रहोयदिविवाहकालेतनुगतोलग्नगतस्तदाशिवंशुभंकश्चिन्नतनुतोनकदाचित्शुभंकरोतीत्यर्थः इतीयंजन्मका
लवशेनयाउक्ताविविक्तिः विवेकः विवेचनंविविक्तिः सासदा तदाफलदास्यात् तदाकदा चेत्तजन्मकालोविवाहकालश्च इहकालेस्फुटःसिध्यति यदाघटीपला
त्मिकःस्फुटोजन्मकालोविवाहकालश्चसाधितःस्यात्तदैवेदंसूक्ष्मफलविवेचनंस्यान्नान्यथेत्यर्थः २० इतिश्रीसकलगमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेश

अनुजनुर्मृतिगोमृतिपश्चयः सतनुगस्तनुतेनशिवंक्वचित् इतिविविक्तिरियंफलदासदासइहसिध्यतिचेत्समयःस्फुटः २०
इतिविवाहवृंदावनेनवांशचिंताध्यायश्चतुर्थः ४ अथलग्नबलाध्यायः अरिपराक्रमलाभविनाशगोरविरविश्रमसौख्यसुतार्थदः
मदनमूर्तिशयःशयसंग्रहेमृगदृशामशनिःशनिराहुवत् १

विरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायांनवांशचिंताध्यायश्चतुर्थः ४ ए
वंलग्नेनवांशशुद्धिमभिधायाधुनाग्रहबलशुद्धिमाह तत्रादौलग्नाद्रवेः शुभाशुभस्थानान्याह अत्रापिद्रुतविलंबितवृत्तानि अरिः षष्ठपराक्रमस्तृतीयलाभएका
दश विनाशोऽष्टम एषुगच्छतीतथा लग्नादेषुवर्तमानोरविःमृगदृशांस्त्रीणांशयसंग्रहे पाणिग्रहे अविश्रमसौख्यसुतार्थदःस्यात् नास्तिविश्रामोविश्रांतिर्यस्यतद
विश्रमंतच्चतत्सौख्यंचतद्ददातीतितथा पंचशाखःशयःपाणिरित्यमरःशेषेष्वष्टसुस्थानेषुदुष्टइत्यर्थसिद्धं तत्राप्यतिदुष्टस्थानद्वयमाहमदनेतिमदनमूर्तिशयः अ राम
शनिःस्यात् अतिदुष्टःस्यादित्यर्थः मदनःसप्तमंमूर्तिर्लग्नंतत्रशेतेसौमदनमूर्तिशयःसप्तमस्थोलग्नस्थोवेत्यर्थः अशनिरिवाशनिस्तद्वद्घातकइतियावत् शनिराहु २५

वत्पर्यैषुस्थानेषु शनिराहूतयै वरंविरिति शनिराह्वोरपीदमेव फलमितिभावः अत्रराहुशब्देन केतुरपिगृह्यते तस्यापि तद्रूपत्वात् यतोवस्तुतिच चंद्रपातमपरं
स्वपाततोराहुरेतीत्यादि अतएवस्पष्टमाह श्रीपतिः प्राग्लग्नाद्रविनंदनेनशिखिनास्वर्भानुना चक्रमादिति १ अथ चंद्रस्य त्रयस्त्रतीयंधनं द्वितीयं लाभएकादशंसु
खंचतुर्थं एषुशशीशुभः स्यात् शेषेष्वशुभः तत्राप्यतिदुष्टान्याह निधनेति निधनमष्टमं मूर्तिर्लग्नंरिपुः षष्ठं एष्वतिगर्हितोतिदुष्टः एतत्प्रसंगेनदोषांतरमाह अ
शुभइति अशुभश्चशुक्रश्च अशुभशुक्रौ तयोः सखासतथाराजाहःसखिभ्यष्टच् पापयुक्तः शुक्रयुक्तोवेत्यर्थः असून्प्राणान्खनति प्राणनाशकोभवतीति अर्था
द्बुधयुक्तोगुरुयुक्तोवाशुभः दोषांतरमाह दिनकरेति दिनकरोनकरः शंसुखंनकरोति दिनकरेणऊनाःकराः रश्मयोयस्यसतथा अस्तंगतइत्यर्थः २ अथभौमस्य

त्रिधनलाभसुखेषु शुभः शशीनिधनमूर्तिरिपुष्वतिगर्हितः अशुभशुक्रसखः सखनत्यसून्दिनकरोनकरोनकरोति शं २ अ
वनिजस्त्रिभवारिषु चेद्धयेमृतिकरोमृतिमूर्तिमदाश्रितः॥ इह न भोयुजि जीवदृशंविना च्युतनयातनयामिषभुग्वधूः ३ व्यय
गृहंविरहय्यहिमांशुजः सकलवेश्मसुखेमसुतार्थदः सनियतंविदधातिवधूवरंयमकरेमकरेंगितमत्सुगः ॥ ४ ॥

अवनेर्जातो अवनिजो भौमः त्रिभवारिषु वृद्धयेभवति शेषेषु नवसुदुष्टः तत्राप्यतिदुष्टानिमृतीति मृतिरष्टमं मूर्तिर्लग्नं मदः सप्तमं एतानि आश्रितः एषु
स्थितइतियावत् मृतिकरः स्यात् इहास्मिन्भौमे नभोयुजिसतिनभसायुनक्तीतिनभोयुक्तस्मिन्नभोयुजि दशमस्थेसतिवधूश्च्युतनयासतीतनयामिषभुक्स्यात्
च्युतस्त्यक्तोनयोयथासातथा अन्यायमार्गवर्तिनीतनयस्यामिषंमांसंभुनक्तीतितथा अस्यापवादमाह जीवदृशंविना तस्मिन्दशमस्थेभौमेगुरुणादृष्टेसतिनायं
दोषइत्यर्थः ३ अथबुधस्य हिमांशुजोबुधद्वादशगृहंविरहय्यपहाय त्यक्त्वा शेषेषु सप्ताष्टमव्यतिरिक्तेषु वेश्मसुस्थानेषु वेश्मगृहंसुताःपुत्राःअर्थोद्रविणंत

त्पदः सप्तमाष्टमयोस्तु अतिदोषमाह सनियतमिति सबुधः मकरेंगितमृत्युगः वधूवरंयमकरेनियतंविदधातिकरोतिमकरेणइंगितंचेष्टितंयस्यसमकरेंगि
तोमदनः सप्तमंमृत्युरष्टमंतत्रगतोबुधोवधूवरंयमहस्तेविदधातिमारयतीत्यर्थः ४ अथगुरोः अत्यंद्वादशंमदः सप्तमंताभ्यामन्यानि अनंत्यमदानितेषुद्वादश
सप्तमव्यतिरिक्तेषुस्थितोगुरुः मुदंहर्षंश्रियंलक्ष्मींचसृजति ददाति तत्राष्टमेमहादोषमाह कालगृहइति कालोमृत्युः तद्गृहमष्टमंतत्रास्थितोगुरुर्गृहभंगदःस्या
त् गृहभार्यातस्याभंगोमृतिस्तत्प्रदः एतत्प्रसंगेनगुरोर्दोषांतरमाह अशुभकृदिति मकरेपिस्थितोगुरुः करग्रहे अशुभकृत्स्यात् नीचराशिस्थितत्वात् दोषांत
रमाह नमृगेति मृगराजसिंहस्तत्रगतोगुरुः जगतोविश्वस्यकरग्रहेनहितः नशुभः ५ अथशुक्रस्यसहसहजंतृतीयंएकदेशग्रहणेननामग्रहणात् सपत्नःश

गुरुरनंत्यमदेषुमुदंश्रियंसृजतिकालगृहेगृहभंगदः अशुभकृन्मकरेपिकरग्रहेनमृगराजगतोजगतोहितः ५ सहप
त्ननिमीलनमन्मथप्रथमदेवगुरुर्गुरुभीतिकृत् वहतिशेषगृहेषुमहोत्सवंव्ययगतः समतासमतांतरात् ६ खलकृ
तातनुरोहिणिमित्रयोर्दुरधराविधुरांकुरुतेवधूं ॥

त्रुः षष्ठंनिमीलनंमरणमष्टमंमन्मथोमदनः सप्तमं एषुप्रथमदेवगुरुः गुरुभीतिकृ
त्स्यात् प्रथमादेवादैत्याः पूर्वदेवाः सुरद्विषइत्यभिधानात् तेषांगुरुः शुक्रः गुरुभीतिर्महाभयंमरणादितत्कारीभवेत् शेषगृहेषष्ठसुस्थानेषुमहोत्सवान्वा
हतिप्रापयतिददातीत्यर्थः तत्रद्वादशेविशेषः व्ययगतइति सशुक्रोव्ययगतोद्वादशस्थः मतांतरादन्येषांमतेसमतांमध्यत्वंवहतितथाचतद्वाक्यंकेप्याहुरंत्येशु
भदोसितेज्याविति शनिराहुकेतूनांफलंरविवदित्युक्तमेव एवंप्रातिस्विकंभावफलमुक्त्वाधुनाकर्तरीलक्षणंविशेषफलंजामित्रफलंचाहद् तनुर्लग्नंरोहिण्यामित्र
रोहिणिमित्रंरोहिणीभर्ताचंद्रः ज्यापोः संज्ञायामितिह्रस्वः तयोर्लग्नचंद्रयोः खलकृतापापग्रहकृतादुरधरावधूंविधूरांवियुक्तांकुरुतेदुरधराजातकेप्रसिद्धाउ

भयस्थितेर्दुरधरेति लग्नाच्चंद्राद्वा द्वितीयद्वादशस्थयोः पापग्रहयोः सतोः पापग्रहकृता दुरधरा स्यात् सात्र कर्तरीत्युच्यते सा वधूं विधवां कुरुते अथ जामित्रदोषः श्रुतीति तयोस्तनुरोक्षिणि मित्रयोः श्रुतिशरांशं पंचाशदंशं इतं प्राप्तमपुण्यं पापग्रहं त्यजेत् किमिव अपुण्यमिव लग्नं चंद्रो वा यस्मिन्नवांशेस्ति तस्माच्चतुःपंचाशत्तमेनवांशे यदि पापोस्ति तं पापग्रहं पातकतद्दूरं त्यजेदित्यर्थः ७ अथ गुरुशुक्रयोर्बाल्यादिदोषमाह सुरगुरुर्भृगुश्च गतेप्ययोरुदयास्तयोः सप्तदिनानि क्षिपति शुभमिति शेषः कालनैरंतर्ये द्वितीया गुरुः शुक्रो वा सोदयादनंतरं सप्तदिनानि बालः अस्तात्प्राक्सप्तदिनानि वृद्धः क्षिपति प्रेरयति नाशयतीत्यर्थः इहास्मिन्युगेयुग्मे गुरुशुक्रयुगुले गलदोजसि सति युगस्य वधूवरस्य करग्रहो विवाहः स्फुटमत्यर्थमंगलदः स्यात् उल्बणं विशदं स्फुटमित्यभिधानात् गलत् ओजो बलं यस्य तद्गलदोजस्तस्मिन् गलदो

श्रुतिशरांशमितं स्मरभे तयोर्ग्रहमपुण्यमपुण्यमिवत्यजेत् ७ क्षिपति सप्तदिनान्युदयास्तयोः सुरगुरुश्च भृगुश्च गतेप्ययोः
इह युगेपि युगस्य करग्रहः स्फुटममंगलदो गलदोजसि ८ शिशुजरत्वमहान्युदयास्तयोर्दश चतुर्दश चांगिरसः स्फुटं उशन
सो दश पंच च पश्चिमेगति वशान्त्रिदशाहमपश्चिमे ९

जसि स्थानादिबलहीने अस्तंगते नीचस्थिते चेत्यादि सूचितं एवं मतांतरात्सान्येन बालत्ववृद्धत्वे उक्त्वाह नादिकपरत्वेन तयोः सयुक्तिकं विशेषमाह ८ अंगिरसो बृहस्पतेः शिशुजरत्वं क्रमेण दश चतुर्दश अहानि स्फुटं स्यात् शिशुश्च जरंश्च शिशुजरनौ जीनो जीर्णो जरन्नपीत्यमरः तयोर्भावः शिशुजरत्वं दशदिनानि बलत्वं चतुर्दश वृद्धत्वमिति अत्र स्फुटमित्युक्तः पूर्वसाधारण्येनाक्रमिति सूचितं उशनसः शुक्रस्य शिशुजरत्वं पश्चिमे पश्चमदिशि क्रमेण दश पंच च अहानि स्यात् पश्चिमोदये दशदिनं बालत्वं अस्ते पंचदिनं वृद्धत्वमित्यर्थः अपश्चिमे पूर्वदिशि त्रिदशाहं स्यात् त्रयश्च दश च त्रिदश त्रिदश च तानि अहानि त्रिदशाहं [illegible] पुंसि त्रिदिनं बाल्यं दशदिनं वृद्धत्वमित्यर्थः कस्माद्

टी॰
७

तिवशात् शुक्रस्य वक्रमध्य एव पश्चिमास्तं पूर्वोदयश्च भवती अतोर्कस्य प्राग्गतित्वाच्छुक्रस्य पश्चिमगतित्वाच्च गतियोगेन तदंतरवृद्धत्वे सति अल्पदिनैरेव शुक्रस्योज्व
लतास्यात् अतो त्र बालत्ववृद्धत्वमल्पदिनमुक्तं पश्चिमोदयपूर्वास्तौ तु मार्गगतावेव भवतः अतस्तत्र गत्यंतरेणांतरवृद्धौ सत्यां बहुदिनैरुज्वलतास्यादतस्तेब
हुदिनमुक्ते अतो त्र हेतुर्गतिवशादिति एवं लग्नाद्गृहबलान्युक्तानि तत्र केषामावश्यकत्वं तदाह ९द्युमणि सूर्यः जीवो गुरुः नवोदयो शिष्टस्तोलवोदयशासिनो।
अंशपतिलग्नपतीतेषां चतुर्णामुडुपतेश्चंद्रस्य इति पंचबली विना चलभ्रुवां फलानि विरिंचिः कमलासन इत्यमरः तेन कृतान्यपि शुभं विरिंचिपरिणमंति पंचानां
बलानां समाहारः पंचबली चला चंचला भ्रूर्यासां ताश्चलभ्रुवस्त्रियः तासां फलानि विरिंचिः कमलासन इत्यमरः तेन कृतान्यपि शुभं विरचंति तानि शुभविरिंचि

द्युमणिजीवलवोदयशासिनामुडुपतेरिति पंचवलीं विना परिणमंति फलानि चलभ्रुवां फलविरिंचिविरिंचिकृतान्यपि १० व्य
यगृहं बुधभार्गवजीवयुग्यदि नतकुलमित्रजनेष्वपि कृपणतो नरनीरजनेत्रयोरिति नशक्रमते क्रमते मतिः ११ इति विवा
हवृंदावने लग्नबलाध्यायः पंचमः ५ अथ चंद्रबलाध्यायः

शुभनाशकानि प्रथमा बहुवचनं रिचविरेके कर्तरि क्विप् परिणमंति परिपच्यंते य
त्र लग्ने द्युमणिजीवादीनां पंचानां बलं न लभ्यते तदा स्त्रीणां सर्वाणि फलानि ब्रह्मकृतान्यपि शुभनाशकत्वरूपं परिपाकं प्राप्नुवंतीत्यर्थः १० अथ द्वादशगृहं बुधशु
क्रगुरुशुक्राणां मतांतरमाह व्ययगृहं द्वादशस्थानं यदि बुधभार्गवजीवयुग्मं भवति यद्येकोपि व्ययस्थाने न भवेत्तदा नरनीरजनेत्रयोः नरो वरः नीरजं कमलं तद्व
न्नेत्रे यस्याः सा वधूः वरवध्वोः कृपणता स्यात् केष्वपि कुलमित्रजनेष्वपि कुलमित्राणि कुलपरंपरागतमित्राणि यद्वा कुलं पुत्रभ्रात्रादि मित्राणि सुहृदः तेच तेज राम:
नाश्च तेष्वपि किं पुनरन्येषु इदं कस्य मतमित्याह इतीति इत्थं विधे शक्रमते इंद्रमतविषये अस्माकं मतिर्न क्रमते न चलति एवं विधे इंद्रमते अस्माकं बुद्धिः न प्रवर्त २७

तद्दत्यर्थः तथा चवैद्यविवाहपटले बुधभार्गवजीवानामेकोपि यदि नव्ययेत द्दौदार्यंन दंपत्योः पुत्रपित्रतिथिपीति ११ इति श्रीसकलागमाचार्यवर्यश्रीकेश
वसांवत्सरात्मजगणेशविरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायांलग्नबलाध्यायः पंचमोध्यायः ५ एवंलग्नबलमुक्त्वाधुनावधूवरयोश्चंद्रबलविचार
आरभ्यते तत्रादौमतांतरमनूद्यदूषयति अत्राध्यायेरयोद्दतवृत्तानि कन्यकायावितरणंदानंतस्मैकन्यादानाय पूरुषोवरः पुरुषाः पूरुषानराइत्यमरः पात्रमात्र
पात्रमेवपात्रमात्रं इतिहेतोरस्यवरस्यसैंद्रवंबलं इंद्वारिदमैंदवं चंद्रबलंकेचित्कोविदाबुधाः सन्सुधीः कोविदोबुध इत्यमरः नवितरंतिनददति वरः पात्रमात्रमि
तिहेतोर्वरस्यविवाहेचंद्रबलंनावलोक्यमितिकेषांचिन्मतं तद्याक्यंच नाधिकारोनराणांचविवाहेगर्भशोध इति तेषामुपहासमाह कोविदामिति तेषामनस्तन्म

कन्यकावितरणाय पूरुषः पात्रमात्रमितिनैंद्रवंबलं केचिदस्यवितरंतिकोविदाः कोविदोकिलकरोतुतन्मनः १ ईदृशं यदित
तः प्रतिग्रहग्राहिणोस्यांकिमभिप्रपंचितैः सांशनाडिगण—योनिशुद्धिभिर्जन्मलग्नभवनव्ययाष्टमैः २

नः किलकः विद्वांकरोतुविचारय
तु नकोपीतेषांमानसंतत एव जानंल्लिस्सर्यः विद्वांकुर्वंस्त्वन्यतरस्यामिति आम् लोटोलोपः लोडंतः कृतोनुप्रयोगश्च तेनविद्वामित्याम॑तमव्ययं अतोनयोर्व्यवधा
नेपिप्रयोगोघटते यथारघुकाव्ये तंपातयांप्रथममासपपातपश्चाविति १ एवंयेमन्वानास्तेषामनिष्टमाह ततस्तस्मादुक्तहेतोः यदीदृशंपात्रमितिहेतोर्व
रस्यचंद्रबलंदद्यादितितदास्यप्रतिग्रहग्राहिणोवरस्यसांशनाडीत्यादिभिः अभिप्रपंचितैः सविस्तरंप्रतिपादितैः किं पचिविस्तारे प्रतिगृह्णंप्रतिगृह्णातीतिप्रतिग्रह
ग्राही अंशाश्चनाडिश्चगणश्चयोनिश्च तेषांशुद्धयः ताभिः सहवर्तमानानितानितथा जन्मनिलग्नभवनेताभ्यांव्ययाष्टमानितानितथा अयंभावः पत्योच्यतेव
रः प्रतिग्रहग्राहकएवपात्रमात्रं अतोस्यनैंद्रवंबलं एवंचेत्तर्हिवरस्य पराशरः प्राह नवांशभेदादिस्तादिनांशशुद्धिः नाडीयोनिगणानांशुद्धयश्च जन्मलग्नज

न्मराशिभ्यां द्वादशाष्टमगतानि लग्ननवांशादीनि सप्रपंचं कथं प्रतिपादितानि इत्यादीनि वरस्य त्वयापि गृह्यंते तर्हि एकं चंद्रबलं कथं न गृह्यते इति तत्स्थानि थं किं
च २ अस्य श्लोकद्वयस्य एवमादित्यनेन संबंधः लग्ने भवेल्लाग्निकः नवलवो नवांशः यदि स्वामिना निजाधिपेन युक्तो वीक्षितो वा न स्यात् पुंसः अंतः पुमंतः अ
तोवसाने किंच संगममिति इंदुश्च तनुश्च इंदुतनू ताभ्यां कामगः सप्तमगः जामित्रस्थितो ग्रहः पत्युर्भर्तुर्दीर्घनिद्रया मरणेन सह संगमं समागमं दिशति ददाति
दिशदाने भर्तुर्मरणं करोतीत्यर्थः ३ चंद्रमसीति चंद्रे उपचयात् वृद्धेः सकाशात् परिच्युते बलहीने सति कर्तुर्वरस्य आयति शुभं उत्तरकालीनं शुभं उत्तरः काल आयति
रित्यमरः सभंगुरं सभंजनं भंजेर्भावे कुरः विनश्यदिति यावत् असितशौनकादयो मुनयो निर्दिशंति कथयंति कैरपि परैर्भौमादिभिर्ग्रहैश्चारुगोचरचरैरपि

लाग्निकोनवलवः पुमांतकृत्स्वामिना यदि नयुक्तवीक्षितः संगमं दिशति दीर्घनिद्रया पत्युरिंदुतनुकामगो ग्रहः ३ चंद्रमस्यु
पचयात्परिच्युते चारुगोचरचरैः परैरपि कर्तुरायतिशुभं सभंगुरं निर्दिशंत्यसितशौनकादयः ४ एवमादिफलवादिनो नृणा
मैंदवं बलमुशंति किं न ते भानुरप्युपचयेन्नृजन्मतो यच्च मतोक्तिषु तदिष्टमेव नः ५ ॥

चारुश्चासौ गोचरश्च तत्र चरंतीति ते तथा
गोचरे शुभस्थानस्थितैरपि अयं भावः चंद्रे क्षीणत्वादिना बलहीने सति अन्यग्रहाणां गोचरबललाभे सत्यपि वरस्योत्तरकालीनं सर्वं शुभफलं नश्य
तीत्यसितशौनकादयो जगुः उक्तं चैतैः न कुर्वीतास्तगे चंद्रे दुःस्थिते जन्मराशितः क्रूरग्रहयुते तद्वन्मंगलान्यखिलान्यपीति ४ इत्याद्यनिष्टप्रसंगेन त
न्मतं दूषयति नृणाम् एवमादिफलवादिनः एवमादीनि फलानि पुरुषाणां इच्छंतीति त एकं चंद्रबलं कथं नेच्छंतीति तेषामनिष्टं अतस्तैरपि वरस्य चंद्रबलं
स्वीकर्तव्यमित्यर्थः यदुक्तं तैः पुंसां रविबलं ग्राह्यमिति तन्नीकरोति भानुरपीति येषाम् [illegible] कयः यन्मतोक्तयः तासु यन्मतवचनेषु नृजन्म

तः नरस्य जन्मराशेः सकाशाद्भानुरुपचये भाव्य इत्यध्याहारः गोचरे हि भानुरुपचयस्थान एव शस्तः तन्नोस्माकमपि इष्टं संमतमेव तथा च तदुक्तं योनि
स्त्रीणां शिशिरकिरणश्चित्रभानुश्च पुंसां इत्यादि अत्र यदुक्तं स्त्रीणामेव चंद्रबलं तन्निराकृतं यदुक्तं रविबलमिति तदस्माकमपीष्टमिति भावः अतो वरस्य
ध्या अपि गोचरेण चंद्रबलं रविबलं च ग्राह्यमिति सिद्धं वस्यति च योषितां गुरुपतंगगोचर इत्यादि एवमुनिष्ठप्रसंगेन तन्मतं निरस्य युक्त्यंतरेणापि पुनर्दूष
यति ५ त्रिवर्गपतिना नरेण शशिबलं न समाप्यते कन्यया हृत्वा समाप्यते लभ्यते त्रिवर्गपतिनेति हेतुगर्भं धर्मार्थकामानां स्वामिना पुरुषेण कन्याद्वारा यदि चंद्र
बलं प्राप्यते तर्हि इह विवाहसमये यत् गोमहीमहिष्यादि दीयते तर्हि तद्बलं तेषां गोमहीमहिष्यादीनां यच्चंद्रबलं तत्तस्य वरस्य दिशदेहि गौर्धेनुः महीसेत्रवाटिकादि

नत्रिवर्गपतिना नरेण चेत्कन्यया शशिबलं समाप्यते दीयते यदि ह गोमहीमहिष्यादि तर्हि दिशत तस्य तद्बलम् ६ इंदुरिंदुवदनानुगं ब
लं यच्छतीह युवतिग्रहो यतः तन्नृणामपि करोति षडष्टगः खंडयत्ययमसून्प्रसूतिषु ७

महिषी प्रसिद्धा आदिशब्देन दासीदासशय्यादीनां ग्रहणं य
दि पात्रमात्रमिति हेतोः कन्यायाय च्चंद्रबलं तदेव वरस्य तर्हि गवादिकं यद्दीयते तस्यापि यच्चंद्रबलं तदपि वरस्य भवेदित्यतिप्रसंगः यद्वायमन्वयः चेत्त्रिवर्गपतिना
नरेण शशिबलं न समाप्यते न प्राप्यते यदि कन्यया समाप्यते तर्हि इह विवाहे यद्गवादिकं दीयते तस्य गवादेस्तद्बलं तस्य चंद्रस्य बलं दिशत्यतिप्रसंगः यच्च परमते
योनिः स्त्रीणां शिशिरकिरण इत्यादि तदनुवदन्दूषयति ६ इंदुश्चंद्रमाः इंदुवदनानुगं बलं यच्छति ददाति इंदुरिव वदनं यस्याः सा इंदुवदना ता अनुगच्छतीति इंदु
वदनानुगं अंगनानुसारं यतः इंदुः युवतिग्रहः स्त्रीग्रहः तस्मात्तद्बलं स्त्रीणामेव न तु नराणामिति चेत्तर्हि अयं चंद्रमाः प्रसूतिषु जन्मकालेषु षडष्टगः सन्नृणां पुरु
षाणामपि असून्प्राणान्कथं खंडयति अयमर्थः चंद्रमा स्त्रीग्रहः इति सर्वेषां पि स्त्रीणामेव चंद्रबलं ग्राह्यं तर्हि तेनैव हेतुना जन्मकाले षष्ठाष्टगेन चंद्रेण नृणाम्

रिष्टं न कार्यं तच्च तेषामप्यस्ति अतो वरस्यापि चंद्रबलं ग्राह्यमिति सिद्धं ७ एवं न केवलं पुरुषफले जातकेन चंद्रः स्वीकृतः किं त्वन्येष्वपीत्याह होरया जातकेन
हिमरश्मिराहृतः स्वीकृतः केषु सुनफादिष्वपि पुंस्फलेषु योगेषु पुंसां फलं येषां ते तथा रविवर्जं द्वादशगैरनफा चंद्राद्द्वितीयगैः सुनफा इत्यादिषु चंद्रयोगेषु अन्येष्वपि चं
द्रकृतेषु राजयोगादिष्वपि जातकेन पुरुषफले चंद्रः स्वीकृत इत्यर्थः अतो वरस्यापि चंद्रबलं विलोक्यमिति सिद्धं अथ कृष्णपक्षे केचित्तारां बलीयसीमाहुस्तद्विषयमुप
न्यस्यति अत्रिरिति बहुले कृष्णपक्षेपि तारकापतेश्चंद्रस्य बले सति तारका बलीयसी अत्रिर्मुनिराह कृष्णपक्षेपि न केवलं तारा बलीयसी किं तु तारकापतिबले सति अतः
कृष्णपक्षेपि चंद्रबलालाभे सति ताराबलं न प्रमाणमिति मुनेराशयः ८ अथ मतांतरं दूषयितुमुपन्यस्यति विकलं वर्ष्म शरीरं यस्याः सो विकलवर्ष्मा शरीरं वर्ष्म विग्रह इत्य

होरयापि हिमरश्मिराहृतः पुंस्फलेषु सुनफानफादिषु अत्रिराह बहुलेपि तारकां तारकापतिबले बलीयसीम् ८ प्रोषिते विकलवर्ष्मणि
प्रिये तालिलिः स्त्रियमियेष कार्यिणीं अस्तु किं तु न पति प्रतीपतां सान्यथा घटयितुं पटीयसि ९

मरः तस्मिन्विकलशरीरे प्रोषिते प्रवासं प्राप्ते वा प्रिये
भर्तरि सति तोलिलिर्मुनिः स्त्रियं कार्यिणीं इयेष ऐच्छत् कार्यं विद्यते यस्याः सा कार्यिणी कार्यकर्त्री अत इनिठनाविति मत्वर्थ इनिः कृत्यस्य यात्रासंनिषेधेपि कार्यविधि
धानात् कृष्णपक्षे चंद्रस्य क्षीणशरीरत्वात् वनस्थत्वादिषु प्रोषितत्वाच्च तत्तुल्यास्ताराया एव बलं मुख्यमिति भावः एतदभ्युपेत्य दूषयति अस्तु किं त्विति तारकार्यिणी
अस्तु नहि किं तु सा तारा अन्यथा प्रकारांतरेण पतिप्रतीपतां भर्तुरभिप्रेताद्विपरीततां घटयितुं न पटीयसी न समर्था अतिशयेन पटुः पटीयसी सा स्वयं कर्त्री भवतु परं तु भर्तृ
प्रतिकूलकार्ये न समेत्यर्थः अतः कृष्णपक्षे चंद्रबलाभावे ताराबलं न ग्राह्यमिति सिद्धं अथ अतिकृष्णपक्षे नष्टश्चंद्र इत्युच्यते तद्विषयमाह ९ स चंद्रमाः बहुले कृष्णप
क्षे केवलं क्रौर्यमेति अमावसन्तु सन्नेव नश्यतितमां क्रूरस्वभावः क्रौर्यं अतिशयेन नश्यतितमां आख्यातमङ्गं आमवातदं तमव्ययं कृष्णपक्षे चंद्रः क्रूरत्वमेव प्राप्नो

निक्षीणत्वात् दर्शे तु वर्तमानश्चंद्रो नातितरां नश्यति किंतु अदृग्गोचर एव अतो नष्ट इत्युच्यते यद्वा अमावसन्निति पाठः तत्र अमेत्यव्ययं सहार्थे अमासाकंसमंसहेत्य भिधानात् सूर्येण सह वसन्नित्यर्थः एष चंद्रः तत्र अमायां अमासमीपे च यद्दिनास्ति अतितरां नष्टो भवति तदा जनिषु जन्मकालेषु तत्कृता तेन चंद्रेण कृता रिष्टरौद्रता कथं स्यात् रिष्टस्य रौद्रता उग्रत्वं रिष्टस्य अतिशयता यदि तत्र चंद्रस्य सर्वथा अभावस्तदा तज्जनितमत्युग्रमरिष्टं कथं स्यात् अतोऽमायां नैव नश्यतीति किंतु प्रकाशहीनस्ति ष्ठतीति ग्रहगणितेप्युक्तमप्यस्ति यदि स नष्टो भवति तदा तत्कृतसूर्यग्रहणं कथं स्यादित्यादि १० अथ सिद्धांतमाह दुर्बलेपि निजपतौ स्वभर्तरि पार्श्वगे समीपवर्ति नि सति कुटुंबिनी कुटुंबनिर्वाहकांता स्त्री तदभीष्टकार्यं कुर्यात् तस्य भर्तुर्यदभीष्टं कार्यं तदेव करोति न तु तत्प्रतिकूलं एवं तारकापि शशिनश्चंद्रस्यानुकूलतासंभ

कोर्धमेति बहुले सकेबलं नैव नश्यति तमाममां वसन् नास्ति चेद्यदि तत्र तत्कथं तत्कृता जनिषु रिष्टरौद्रता १० पार्श्वगे निज पतौ कुटुंबिनी दुर्बलेपि तदभीष्टकार्यकृत् तारकापि शशिनोनुकूलतासंभवे भवति पक्षपातिनि ११ इति विवाहवृंदावने चं द्रबलाध्यायः षष्ठः ६ अथ राहुसत्ताध्यायः यद्वराहमिहिरो न राहुरित्याह तांडवितबाहुरुच्चकैः

वेनुकूलत्वालाभे सति पक्षपातिनि अनु कूलत्वं विलोक्यमित्यर्थः अतः कृष्णपक्षेपि चंद्रबलसद्भावे ताराबलं ग्राह्यमिति सिद्धं तथा चाहुः चंद्रस्य सर्वदा बलमसिते ताराबलं ग्राह्यमिति ११ इति श्रीस कलागमाचार्यवर्य श्रीकेशवमां वत्सरात्मजगणेशविरचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां चंद्रबलाध्यायः षष्ठोध्यायः ६ अथ केचिद्ग्रहत्वेरा होर्न मन्यंते तदर्थस्य कौशलं दर्शयन् राहुसत्ताध्यायं वदति तत्रादौ वराहोक्तमागमप्रामाण्येन दूषयति एतदारभ्य त्रयोदशरथोद्धतवृत्तानि यद्वराहमिहि रो न राहुरित्याह राहुर्नास्तीति ब्रूते कथंभूतः उच्चकैस्तांडवितबाहुः उच्चैरेवाच्चकैः अव्ययसर्वनाम्नामकच्प्राक्टेरित्यक तांडवं नृत्यविशेषः तांडवं जा

तं यथा स्तौनां डवितौ तौ बाहू यस्यासौ नथा उच्चैर्नर्तितवाहुः सो पृहासमिदं विशेषणं अत्रास्मिन्विषये तत्त्यथविमाथिनी संहितास्मृतिसहायिनी श्रुति
र्वहति तस्य पथास्तत्यथः रूक्पूरब्धः पथामानसइत्यप्रत्ययः तविमथ्नातितथा तस्य वराहस्य यो मार्गस्तस्य भंगकर्त्री संहिता स्वस्मृतयश्चताः सहायाः
संति अस्याः सातथा संहितास्मृतिसहिता श्रुतिर्वहति प्रसिद्धास्तीति यावत् राहुर्नास्तीति वराहेण यदुक्तं तत्संहितास्मृतिश्रुतिभिरागमैर्विरुद्धमिति भावः
तद्यथा वराहेण वृक्षस्य स्वच्छायेत्यादिना एवमुपरागकारिणमुक्तमिदं दिव्यदृग्भिराचार्यैः राहुरकारणमस्मिन्नित्युक्तः शास्त्रसद्भावादिति योसावसुरो राहु
रित्यादिना च ग्रहणे राहुर्न कारणमिति प्रतिपादितं तद्धि रुद्धाः संहिताजिह्वावलेढि परितः स्तिमिरतुदो मंडलं यदि समलेहमिति अश्वनिभपर्सं प्रदायीपाट
लिकुसुमोपमो राहुरित्यादयः स्मृतयश्च सर्वे भूमिसमं दानं सर्वे ब्रह्मसमा द्विजाः सर्वं गंगासमं तोयं राहुग्रस्ते निशाकरे इति सर्वेषामेव वर्णानां सूतकं राहु

संहितास्मृतिसहायिनी वहत्यत्र तत्पथविमाथिनी श्रुतिः १ नैर्ऋतीदिशि यमस्य दिक्पतेर्ध्यानदानबलिभिः फलाप्तये॥

दर्शनमित्यादयः श्रुतयश्च तत्र माध्यंदिनी श्रुतिः स्वर्भानुर्हतो आसुरिः सूर्यं तमसाविव्याधेति अथर्वश्रुतौ हंसोपनिषदि च सोहंघनमिति घनमिति
किलि किलिलस्य राहोः शिरमाच्छादयति भोक्षिन्नेपापम्भावेच्छाया रजनीरूपा पाप्मानं करोतु राधर्षयति घृणी विरश्मि विरे च यति पृथ्वीमाच्छादयति दीप्तिमाच्छा
दयति द्युतिमाच्छादयतीत्यादयः एतत्त्वकौशलदर्शनाय ग्रंथकृतः पाण्डित्यमात्रं यतो राहुर्नास्तीति वराहो न ब्रूते किंतु ग्रहणे सोन कारणमिति नच्छादकः
त्वर्थः अस्य स्मृत्यादि विरोधोपि तेनैव परिहृतः योसावसुरो राहुस्तस्य वरो ब्रह्मणा पुरा दत्तः आप्यायनमुपरागे दत्तहुतांशेन तेन भविता तस्मिन्काले
सान्निध्यमस्य तेनोपचर्यते राहोरित्यादिना च अयवराहोक्तिः सम्यगेव १ अथ राहोरस्तित्वे प्रमाणांतराण्याह अस्य राहोर्दिक्पतेर्दिशाधिपतेरियं प्रसि

ह्वा नैर्ऋतीदिक् अस्ति प्राच्यादीशारविसितेत्यादिना राहोर्नैर्ऋतीदिक्प्रसिद्धा । किंच अयं ध्यानदानबलिभिः फलाप्तये अभीष्टफलसिद्धये भवति तत्र ध्या
नं ब्रह्मयामलादौ करालवदनः खड्गचर्ममालीवरप्रद इत्यादि दानं गोमेदादि बलयः पूजा कृष्णपुष्पोपहाराद्यैस्तैः फलाप्तये भवति एभिः प्रमाणै राहुरस्ती
ति भावः ननु यथान्येषां ग्रहाणां क्रांतिवृत्ते मेषादिग्रहेषु भ्रमणमस्ति तद्वदस्य नास्तीति चेत्तत्राह वेश्म चेति अस्य राहोः शशभृद्विमंडलक्रांतिमंडलमिथश्चतुष्पथं वे
श्म वास्ति चत्वारः ग्रंथानः समाहृता इति चतुष्पथं द्विगोः क्लीवत्वं पूर्ववदप्रत्यः विमंडलं विक्षेपमंडलं नाम्नैकदेशेन नामग्रहणं शशभृतः विमंडलं च क्रांतिमंडलं च
तयोर्मिथः परस्परं चतुष्पथं शशभृद्विमंडलक्रांतिमंडलमिथश्चतुष्पथं चंद्रस्य शरवृत्तक्रांतवृत्तयोः संपातश्चतुष्पथरूपस्तदेवास्य स्थानमित्यर्थः तच्चलने

वेश्म चास्य शशभृद्विमंडलक्रांतिमंडलमिथश्चतुष्पथं २ सोंधकारचरतां वहन्महीछायया विशति सोममंडलं दीपिता
परदलेंदुमंडलच्छायया सह च सूर्यमंडलं ३

न अस्यापि चलनं सिद्धं तदेव चंद्रस्य शरपातस्थानं ग्रहगणिते प्रसिद्धं ननु दिक्देशकालावरणादिभे
दाच्छादको राहुरिति ब्रुवंतीति ग्रहगणिते प्रत्यक्षं तद्विरुद्धाः स्मृत्यादयः संति २ अतस्तत्समाधानमाह सराहुरंधकारचरतां वहन्महीछायया सह सोममं
डलं विशति अंधकारे चरतीति अंधकारचरस्तस्य भावस्तया भूछाया किलांधकाररूपिणी सोप्यंधकारचरः अतस्तत्साहित्येन चंद्रमंडलं विशति आछादयतीत्यर्थः
दीपितेति अंधकारचरतां वहन् संदीपितापरदलेंदुमंडलच्छायया सह सूर्यमंडलं च विशति दीपितमपरदलं उपरिस्थितदलं यस्य तत् दीपितापरदलं तच्च तदिंदुमंड
लं च तस्य छायया तथा दर्शे किल चंद्रस्योर्ध्वदलं प्रकाश अतोंधकाररूपस्य चंद्रमंडलाधोभागस्य छायया सह सोप्यंधकाररूपः सूर्यमंडलं प्रविश्य छादयतीति अनेन
गोलगणितस्य स्मृत्यादीनां च विरोधः परिहृतः तथा चोक्तं गोलाध्याये राहुः कुभामंडलगः शशांकं शशांकगः छादयतीनबिंबमिति ननु शरवृत्तक्रांतिवृत्तयोः संपाते

वि·टी· वृत्तयोः संपाने कथं राहुरस्तीति तत्राह पतनं पातः वृत्तयोः शरवृत्तक्रांतिवृत्तयोः पतनमेव पात इत्याहुर्गोलविदः पतो वृत्तयोः संपातस्ततः पात इत्युच्यते अत्र
३१ पातेस्थितो राहुः आपतंतं आगच्छंतं अमृतद्युतिं चंद्रमसमासते गृहीतुमवलोपते किलेत्यागमे तमेवागमं विशेषणद्वारेणाह सुधेति सुधा अमृतं सुधास्नान
दानहवनं चतेषामंशो विभागस्तत्र लालसस्तत्परः अत्र संपाते स्थितो राहुरमृतांशो ग्रहणनिमित्तस्नानादीनामंत्रास्य ब्रह्मवरप्रदानान्ममभविष्यतीति चिंत
यन्नमृतद्युतिं गृहीतुमीसत इति भावः चंद्रोहि अमृतद्युतिः राहुश्च सुधालालसः अतस्तं गृहीतुमीसत इतियुक्तं रविग्रहेपि चंद्रच्छायासांनिध्यमस्त्येव ब्रह्मव
रप्रदानादिकं ब्रह्मपुराणादौ प्रसिद्धं अत आगमात्तत्र संपाते राहुरस्तीति भावः एतदेवोक्तं वराहेण यो सावसुरो राहुस्तत्र वरो ब्रह्मणा प्रदत्तः आप्यायनमुपरा

वृत्तयोः पतनमेव पात इत्याहुरत्र किल राहुरीस्यते आपतंतममृतद्युतिं सुधास्नानदानहवनांशलालसः ४ सैंहिकेयग्र
हतामुपेयुषो दूरगो वियति वृत्तपातयोः ग्रासमेति न रविर्न चंद्रमा गृह्यते स खलु पार्श्वगस्तयोः ५
गेद्वृत्तहृतांशेन तेन भवितेत्यादि ४

एवं चेत्तर्हि प्रतिपर्वणि ग्रहणं कथं न स्यात्तत्राह सिंहिकाया अपत्यं सैंहिकेयो राहुस्तस्य ग्रहं तस्य भावः तां सैंहिकेयग्रहतां उपेयुषोः प्राप्तयोः उपेयुरित्युपपद्यो
सौ तयोरुपेयुषोः इण्गतौ उपेयिवाननाश्वाननूचानश्चेति क्वसंतो निपातः वृत्तपातयोः शरवृत्तक्रांतवृत्तसंपातयो दूरगो रविर्वियति आकाशे स्थितः ग्रासं नै
ति न प्राप्नोति न च चंद्रमा ग्रासमेति तयोर्वृत्तपातयोः पार्श्वगः समीपवर्ती स रविश्चंद्रश्च खलु निश्चितं गृह्यते राहुणेति शेषः यद्वा कर्मकर्तरि रूपमेतदुक्तं भव
ति शरवृत्तक्रांतिवृत्तयोर्द्वौ किल संपातौ एकश्चंद्रपातस्थानं द्वितीयस्तत्सप्तमं चेति तेद्वे अपि राहुस्थाने एकं राहोरपरं केतोश्चेति तयोर्दूरगो रविश्चंद्रो वा ग्रा
सं नैति शरबाहुल्यात् शरो हि राहुचंद्रबिंबमध्ययोरंतरं अतो मानैक्यार्धादूने शरे सत्येव ग्रहणं न त्वधिके एतद्ग्रहगणिते प्रसिद्धं एवं गणितेन राहुसद्भा

वंप्रतिपाद्य अधुना संहिताजातकाभ्यामप्याह ५ स राहुः सूर्यवृद्धावगोचरफलैर्न हीयते यतोसौ राशिवृत्ते वसति राशिवृत्ते क्रांतिवृत्ते वसतिः स्थानं यस्य स
तथा सूर्यो हि क्रांतवृत्ते स्थितत्र राहुरपि चंद्रपातत्वात् अतः संहितासु सूर्यस्य यादृशानि भावफलानि तादृशानि राहोरप्युक्तानि अतो राहोर्भावगोचरफल
सद्भावाद्राहुरस्तीति भावः एवं जातकेपि रिष्टभंगेति स राहुः रिष्टभंगजननैकनायको भंगश्च जननं च भंगजनने रिष्टस्य भंगजनने रिष्टभंगजनने तयोरेकम
श्चासौ नायकश्च स तथा होरां विदंति ते होरिकाः तैः कैः कीर्तितः अपितु स राहुः सर्वैर्जातकविद्भिः रिष्टभंगस्य रिष्टजननस्य च एक एव कर्ता कीर्तित एव त
था राहुश्चतुष्टयस्थो मरणाय निरीक्षितो भवति पापैरित्यादीनां रिष्टजननानां अजवृषभकर्किलग्ने रक्षति राहुः समस्तपीडाभ्यः इत्यादीनां च कर्तात्र

राशिवृत्तवसतिः स सूर्यवृद्धावगोचरफलैर्न हीयते रिष्टभंगजननैकनायको होरिकैरपि स कैर्न कीर्त्यते ६ एष
शेषखगपाततुल्यतां नेति चंद्ररविपर्वगर्वितः जातकादिषु यथेंदुमंदिराकिं तथा न फलमन्यराशितः ७ ॥

होरांतरानपेक्ष एक एव कीर्तितः अतोसावपि जातकेनापिस्वीकृत इति भावः ६ नन्वसौ किल चंद्रपातस्तस्य चेद्ग्रहत्वं तर्हि भौमादिपातानामपि कथं न ग्रहत्वमि
तित्र आह एष चंद्रपातः शेषखगानां भौमादीनां ये पातास्तत्तुल्यतां नैति न प्राप्नोति यतोयं चंद्ररविपर्वगर्वितः चंद्ररविपर्वणा गर्वितः चंद्ररविग्रहणकर्तृ
त्वेन गर्वं प्राप्तः यतस्तस्य संनिहितावेव चंद्रार्कौ ग्रासं प्राप्नुतः न त्वितरेषां अतोसावन्यपातसाम्यं न प्राप्नोतीत्यर्थः किंच जातकादिषु जातकसंहितास्वरशा
स्त्रयामलादिषु यथा इंदुमंदिराच्चंद्रराशेः फलं तथान्येषां भौमादीनां राशितः फलं नास्ति अतो यथा सर्वत्र फलानि चंद्रराशेस्तथा तत्पातराशेरपि अतश्चासौ
शेषपातसाम्यं नैति ७ एवं प्रथमे सपाते राहुस्थितिमुक्त्वा द्वितीयेपि तत्स्थितिमाह ॥ छ ॥ छ ॥ छ ॥ छ ॥

त्रि·टी· चंद्रस्य शरवृत्तक्रांतिवृत्तयोः संपात एव चंद्रपातसंज्ञो राहोःस्थानमिति किलोक्तं तस्मात्षड्भांतरे द्वितीयः संपातस्तमपरं वृत्तपातं राहुरेति गच्छति तत्रापि स्थि
३२ तश्चोके केतुरुच्यते तदपि राहोःस्थानं कस्मात् स्वयंभुवोब्रह्मणः समयात् वरस्य संकेतात् समयः शपथाचारकालसिद्धांतसंविद इत्यमरः संपातद्वय
स्यापि समीपवर्तिनोश्चंद्रार्कयोर्ग्रहणसंभवः अतो ब्रह्मवरप्रदानात् संपातद्वयेपि राहोरवस्थितिरागमसिद्धा तद्वत्तस्मिन् द्वितीयसंपाते गतो राहुर्जे
गतिइहलोके दिव्यरिष्टवत्यज्यते दिविभवे दिव्यं नच्च नदिष्टं च तद्वत् दिव्यान्यरिष्टानि ग्रहनक्षत्रजानि तेषु मुख्यं दिव्यं केतुः अतोत्र दिव्यरिष्टशब्देन केतुर्गृ
ह्यते द्वितीयसंपाते गतो राहुरेव लोके केतुनाम्ना त्यज्यत इति भावः यतोब्रह्मपुराणादिषु विष्णुना सुदर्शनछिन्नं राहोःशिरो राहुःरपरं केतुरित्युक्तं अत एक

वृत्तपातमपरं स्वपाततो राहुरेति समयात्स्वयंभुवः मंदिरं तदपि तस्य तद्गतस्त्यज्यते जगति दिव्यरिष्टवत् ८ पातवद्गतिव
शान्न शीतगोरुच्चमस्तु फलदं किलेति चेत् अस्तु किंतु न हि तन्निवेशितं राहुवद्ग्रहपदे विरिंचिना ९ किंच गोलगणितानि यन्म
हीमध्यकेंद्रमधिकृत्य तेनिरे ॥

मेव शरीरं द्विधाभूतं राहुकेतुसंज्ञमिति ८ ननु एष शेषः खगेत्यादिना यदुक्तं सर्वग्रहेषु मध्ये फलदातृत्वे चंद्रस्य मुख्य
त्वात्तस्यापि फलदातृत्वं तर्हि तदुच्चस्यापि तत्कथं न भवेदित्यनूद्य परिहरति शीतगोः उच्च फलदं किलास्तु किंवत् पातवत् केन हेतुना गतिवशान यथाप्रागु
क्तं चंद्रस्य फलदातृत्वं मुख्यत्वात्तस्य फलदातृत्वं गतिसद्भावात् तद्वत्तदुच्चस्यापि गतिसद्भावात्फलदातृत्वं किलास्त्विति भावः इति चेदस्तु तर्हि किंतु हि
यस्मात्कारणात्तदुच्चं विरिंचिना ब्रह्मणा ग्रहपदे ग्रहपंक्तौ न निवेशितं न स्थापितं उच्चस्य ब्रह्मवराभावान्न फलदातृत्वमिति भावः एवं चंद्रोच्चस्य फलदातृत्वमाग
माभावान्निरस्य गोलयुक्त्यापि दूषयति ९ किंच [illegible] ला इति कस्मात् वृत्तानि महीमध्यकेंद्रं महीमध्ये वृत्तस्य मध्यं किल

केंद्रमुक्तमिति सिद्धांतोक्तेः तत् अधिकृत्य प्राथम्येन धृत्वा तेनिरे विस्तृतानि कर्मकर्तरि रूपं यतः सर्वेषां कक्षावृत्तनाडिकावृत्तादीनां मध्यं भूगर्भ एव तद्वृत्त
स्थस्मिन् भूगर्भे स्थितो नरः पातवर्त्मनि पातमार्गे स्थितं स्फुटं शनिं नेच्युच्चहेतुमीक्षते पश्यति अपिरेवार्थे विगतः उच्चहेतुर्यस्मात्सोत्र तथा उच्चस्य हेतुं विनापीत्यर्थः
एतदुक्तं भवति फलभं न्याकक्षावृत्तस्य भूगर्भो मध्यं प्रतिवृत्तस्य मध्यं भूगर्भादित्यफलज्यांतरे तत्र प्रतिवृत्ते मध्यमचंद्रस्तदुच्चं च तन्मध्ये चंद्रकेंद्रं कक्षावृत्ते तु स्फुटचं
द्रः तत्रैव तत्पातश्च उक्तं च चंद्रस्य कक्षावलये हि पात इति अतो भूगर्भस्थो द्रष्टा कक्षावृत्ते स्फुटचंद्रं पश्यति तत्रैव तत्पातश्च अतो न योरेकवृत्तचारित्वाच्चंद्रदर्शनं तत्सा
तस्यापि फलदातृत्वं न तूच्चस्य अत उक्तं च्युच्चहेतुमिति एतत् ग्रंथकृतोक्तं जनानां व्यामोहनमात्रं वास्तवं तु नैनत् तथाहि यद्यपि प्रतिवृत्तस्य नीचोच्चवृत्तस्य वाय

तद्वतः शशिनमीक्षते स्फुटं च्युच्चहेतुमपि पातवर्त्मनि १० अत्र येन विकलादलार्धमप्यन्हि यांति फलमस्तु किं ततः तावदेव
फलगौरवं गतिर्यावतीत्यधिफलः कलानिधिः ११

उच्चस्थानं तदेवोच्चमित्यस्ति तथाप्युच्चहेतुं विना कक्षावृत्ते स्फुटचंद्रदर्शनं कथं स्यात् स्फु
टचंद्रस्य कारणमुच्चं भवत्येव उक्तं च सूर्यसिद्धांते अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः शीघ्रमंदोच्चपाताश्च ग्रहाणां गतिहेतव इत्यादि अतो च्युच्चहेतु
मितियदुक्तं तन्न चतुरस्रमिति प्रतिभाति अत एव युक्त्यंतरं वक्ष्यति अर्कमकुजेत्यादि अथ यदुक्तं गतिवशेन तद्दूषयन् अन्यपातानां फलदातृत्वासंभवं प्रति
पादयन् चंद्रस्य फलगौरवं द्रढयति १० अत्र ये भौमादीनां पाताः विकलादलार्धं विकलायाः दलं तदर्धमपि अन्हि दिवसेन यांति न गच्छंति तेभ्यः फलं किं स्तु अपि तु न
स्तु नहि ते वर्षशतेनापि कलामात्रं चलंति अतो यावती गतिस्तावदेव फलगौरवं यथा यथा गतिरधिका तथा तथा फलगौरवं अल्पकालेनैव फलं चेच्चित्यात् इ
त्यतः कलानिधिश्चंद्रमाः सर्वग्रहेभ्योधिफलः अधि [illegible] अधिकं फलं यस्मात्सोधिफलः अन्यग्रहाणां गतियोगोपि चंद्रगतिसमो न स्यादतोसावधिकफलः इति

टी॰ भावः तथा चोक्तं एकतस्तु ग्रहाः सर्वे एकतः शशलांछनः ततोधिकतरश्चंद्रस्तस्माच्चंद्रं परीक्षयेदिति ११ अत्र यः संपातः स एव राहुरित्यर्थे प्रमाणांतर
३३ फलमाह किंच प्रमाणांतरमप्यस्ति जिष्णुजो ब्रह्मगुप्तः सोमः प्रसिद्धः रोमको मुनिः मयो मयासुरः आदिशब्देन पितामहवसिष्ठादीनां ग्रहणं ननु एते तांत्रिकाः शा
स्त्रप्रणेतारः राहुपातयोर्नामनी पर्ययेणैव विदधुः पातपर्यये राहुशब्दं प्रयुंजते घटकलशवत् तथा चोक्तं कुमुदिनीपतिपातो राहुमाहुरिह केपि तमेवेति अतो
यः पातः स एव राहुरिति सोमरोमकादीनामुक्ते र्वृत्तसंपात एव राहुरित्यर्थः ननु पात एव राहुर्भवतु उच्चस्य फलदातृत्वाभावे किमायातं तत्र उच्चहेतुमिति कारणा
नुपन्यस्तं तदपि सूक्ष्मदृष्ट्या विचार्यमाणे संदिग्धमित्याशंकां मनसि धृत्वा तन्निरासे युक्त्यंतरमाह १२ तदुच्चं यदि पृथग्भवेत्फलदातृत्वे स्वतंत्रं भवेत्तर्हि सो

किंचागोलगणिते षु जिष्णुजः सोमरोमकमयोदयोपि च पर्ययेण ननु राहुपातयोर्नाम नी विदधुरेव तांत्रिका १२॥
अर्कमर्कजकुजार्यतुंगतां किं नयंति यदि तत्पृथग्भवेत् कल्पनातदियमुच्चमुच्चरन्कोपि रोपितफलं न चश्रुतः १३

मरोमकादयः अर्कजकुजार्यतुंगतां अर्कं किं नयंति आर्यो गुरुः अर्कजकुजार्याणां तुंगं तस्य भावस्तथा शनिभौमबृहस्पतीनां शीघ्रोच्चं सूर्य एवेति कथं
वदंतीति यद्येषां सूर्य एव शीघ्रोच्चं तदा तस्य फलदातृत्वे पृथक्त्वं न स्यात् तत्तस्मात्कारणादियं कल्पना उच्चं हि कल्पनामात्रं मंदफलानि साधनायेति उक्तं
च गोलाध्यायो यः स्यात्प्रदेशः प्रतिमंडलस्य दूरे भुवस्तस्य कृतोच्चसंज्ञा सोपि प्रदेशश्चलतीति तस्मात्प्रकल्पिता तुंगगतिर्गतिज्ञैरिति अत उच्चस्य कल्प
नामात्रत्वान्न फलदातृत्वं तर्हि पातोपि शरसाधनाय कल्पनामात्रं कथं तस्यापि फलदातृत्वं भवेदित्याशंकायामाह उच्चमुच्चरन्निति उच्चं रोपितफलमुच्च राम
रन्कथयन्कोपि न श्रुतः रोपितं फलं यस्मिन् तत्तथा उच्चस्य फलं कुत्रापि न श्रुतस्तस्य फलश्रवणाभावात्कल्पनामात्रत्वमिति भावः अतः पातस्य ग्र ३३

इत्येवं युक्तं उच्चस्य फलदातृत्वाभावे ग्रंथकृता किमर्थमेतावत्प्रपंचितं पर्यवसानं तु आगम एव अतः प्रथमत एव तत्रागमाभावः कारणं कथं न वक्तव्य
मिति १३ ननु दिनादेराधिपत्यं तस्य पातस्य कथं नास्तीति तत्राह शालिनीवृत्तं अहो राहोर् अहोरात्रवर्षाधिपत्यं नास्ति अहोरात्रं वारः वर्षं वत्सरः तोमा
सहोरात्रादीनामुपलक्षणं तेषां स्वामित्वं राहोर्नास्तीति सत्यं सत्यमेवेति व्यंग्योक्तिः तथापि सर्वव्योमगानां अधीशौ पुष्पवंतौ चंद्रार्कौ यस्य राहोः छायापि
नष्टिं चूर्णयति पिष्टपेषणे तस्य राहोः स्वामिता पाविनष्टिः विनाशः क्वास्ति न कुत्रापीति एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरावित्यमरः ग्रहाधीशौ चंद्रार्कौ यस्य
स्वच्छायामात्रं विह्वलयति तस्य स्वामित्वं नास्तीति वक्तुं न शक्यते अतः पारंपर्येण दिनवर्षादीनामप्याधिपत्यं तस्यास्त्येवेति भावः अथ गतिवशात्फलमि

राहोर्नाहोरात्रवर्षाधिपत्यं सत्यं सर्वव्योमगानामधीशौ यस्य च्छायापुष्पवंतौपि नष्टिं क्वास्ते तस्य स्वामिता या विनष्टिः १४
प्रतिदिनं खचरः प्रचरन् फलं किमपि यच्छति चारफलो हि सः ग्रहणऋक्षग एव स चेन्न किं चलति किंचिदुपप्लव एव तत् १५

ति प्रतिपादयन् १४ राहोर्गतिसद्भावे प्रमाणमाह द्रुतविलंबितं खचरः प्रतिदिनं प्रचरन् सन् किमपि फलं यच्छति हि यस्मात्कारणात्स खचरः चारफ
लचारेण गत्या फलं यस्यासौ तथा यस्मात्खचरः चारफल इत्युच्यते तस्माद्यथा यथा यो ग्रहः किंचिच्चलति तथा फलं यच्छतीत्यर्थः स राहुः ग्रहणऋक्षग ए
वास्ति ग्रहणे नक्षत्रे स्थित एवास्ति ऋक्षत्यक इति प्रकृति कृत्वे विपक्षे प्रत्यक्षबाधमाह स चेदिति स राहुः चेद्ग्रहणर्क्षगो नास्ति तर्हि उपप्लवः किंचित् किं चल
ति उपप्लवो ग्रहणं एतदुक्तं भवति ग्रहणे राहुसान्निध्यमस्त्येवेति प्राक् प्रतिपादितं ग्रहणं हि किंचित्प्रतिमासं सार्धैकभागप्रमाणे तिष्णमासैर्नवभागैः इ
ष्टनक्षत्रस्यैव तत् एकं ग्रहणं यस्मिन्नक्षत्रे दृष्टं तत्परं तत्पृष्ठनक्षत्रे तत्परमपि तत्पृष्ठनक्षत्रे इति प्रत्यक्षं दृश्यते अतो ग्रहणाचलनं सैव राहुगतिः ॥

टी· ३४

ग्रहणेवश्यंतत्सांनिध्यात् अतश्चराहोर्गतिसद्भावात् ग्रहत्वंफलदातृत्वंचसिद्धं १५ एवंराहोर्ग्रहत्वादिकंसंस्थाप्यानयैवयुक्त्याकेतोरपिग्रहत्वंसंस्थापय
तिद्रुतविलंबितंपदादिवि आकाशेतत्परंतस्यराहोः परंपश्चिमकायःउदयंएतितदाकेतुरपिप्रतिवासरंचरतीतिस्यात् एतदुक्तंभवतिवृत्तपातमपरमित्यादि
नाराहोःषड्भांतरेयोद्वितीयःसंपातस्तस्यग्रहंसकेतुरितिप्रतिपादितंतत्संनिधावपियद्ग्रहणंतदपिप्राग्वज्ज्वलति अतःकेतोरपिगतिःसिद्धा गतिसिद्धौसत्यांग्रहत्वं
फलदातृत्वंचसाधयतिभवतीतिगतिंविनाग्रहएवनभवतिकथंभूतःजगतिइहजनेकर्मविपाकवदावदःकर्मणोविपाकस्तंवदतीतिकर्मविपाकवदावदःपचा
दित्वादच् वरिचलिपतिवदीनांवाद्वित्वमभ्याक्चाभ्यासस्येतिद्वित्वमभ्यासस्यात्वंचयस्माद्धिगतिरस्तिसएवग्रहोभवति अतोसौपूर्वकर्मविपाकजनितस्यशुभाशुभस्य

उदयमेति यदादिवितत्परंचरतिकेतुरपिप्रतिवासरं भवतिनग्रहएवगतिंविनाजगतिकर्मविपाकवदावदः १६ परिहरंस्तुपरा
गपरागतंतमउपप्लवएवसकिंग्रहःइतिमणित्थवचांसिविवृण्वतामतमतस्यतमोजमहीभुजा १७

सूचकोभवेत् तस्मात्केतोरपिग्रह
त्वंफलदातृत्वंचसिद्धं १६ ननुग्रहणेतमएवप्रत्यक्षंदृश्यतेसकथंग्रहोभवेदितिपरमताशंकाभोजराजेनदूषितेत्याह द्रुतविलंबितं उपरागग्रहणेपरागतंप्राप्तंत
मःउपप्लवोरिष्टमेवेतिपरिहरंतित्यजंतिसकिंग्रहःसग्रहएवनभवतीतितथाहि चंद्रार्कयोर्ग्रहणेस्वाभाविकदीप्तेरवरोधकंप्रत्यक्षंयत्तमोदृश्यतेतदुत्पातएव
प्रकृतेरन्यत्वमुत्पातइत्युक्तत्वात् परिवेषादिवत् अतस्तत्तमउत्पातएवेतिपरिहरंति आचार्याइतियन्मतंतत्मणित्थवचांसिविवृण्वतामणित्थवाक्यानांविवर
णंकुर्वताभोजमहीभुजाभोजराजेन अतस्तत अछिद्यत तस्सूतनुकरणेकर्मणिलङ्एतन्मतंमणित्थवाक्यविवरणेभोजराजेननिराकृतमित्यर्थःतद्यथाउत्पातो राम: ३४
हिगणितागतान्नोपलभ्यतेग्रहणंहिसम्यगुपलभ्यते नदृश्यते चंद्रग्रहणंतुसर्वदेशे अतश्चनोत्पातइतिग

णितागतप्रत्यक्षं आगमश्च ब्रह्मणो वरप्रदानादि ग्रहचारे तत्फलकथनं च लोकप्रसिद्धिश्च राहुकृतं ग्रहणं स्यादागोपालांगनादिसिद्धमिदमिति ब्रह्मगुप्तः अन्या
अपि तु रस्माद्युक्तायुक्तयश्च इत्यादि प्रमाणैस्तत्संमतं भोजराजेन निराकृतमिति भावः नन्वागमप्रामाण्येन राहोः सिद्धिरस्ति परं तु दिग्देशकालावरणादिभेदैर्गोलवास
नायां सिद्धिर्नास्तीति तत्राह १७ उपजातिका अथापि यद्यपि असौ राहुः केवलागमैकस्यामेव गोलवासनायां सिद्धिं नायाति तदपि नोऽस्माकं प्रियं मास्तु गोलवासन
या सिद्धिः तत्कथं अर्कायनाभ्यां सुमेरोत्तरदक्षिणायनाभ्यां सुराणां देवानां द्युरात्रमहोरात्रं अवासनं वासनाबाह्यं भवता त्वयैव किं न भेजे किं न स्वीकृतं अपि तु
स्वीकृतमेव द्युद्दलस्य यं दिनवाचकमिति शेषः स्याम्यादयः एतदुक्तं भवति मेरुगतानां देवानां नाडिकामंडलं क्षितिजं तस्मादुपरिस्थिताः क्रांतिवृत्ते मेषादयः षड्

अथाप्यसौ केवलवासनायां नायाति सिद्धिं तदपि प्रियं नः अवासनं किं न सुरद्युरात्रमर्कायनाभ्यां भवतैव भेजे १८ सि
द्धांतपक्षस्तु परं दिनार्धान्निशा निशार्धात्परतो दिनश्रीः एवं पुराणे गणिते च साम्यमर्कायनाभ्यां सदसत्फलेषु १९

राशयो दृश्याः तुलादयः षट् अधःस्थिताः अदृश्याः अतो मेषादिषड्राशिस्थिते अर्के देवानां दिनं तुलादिस्थिते रात्रिरिति द्युरात्रं गोलवासनासिद्धं शिशिरपूर्वं
मृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तद्दामरमित्यादिना पुराणादिषु उत्तरायणं दिनं दक्षिणायनं रात्रिरित्यागमस्याविरोधभयादिदं वासनाबाह्यमपि द्युरात्रं त्वया
पि स्वीकृतमतोऽस्माभिरप्येकमिदं अवासनमागतभयात्स्वीकृतमिति भावः १८ अथानयोर्विरोधं परिहरति उपजातिका सिद्धांतपक्षस्त्वयं सिद्धांतस्यायम
शय इति दिनार्धात्परं निशा निशार्धात्परतो दिनश्रीर्दिनलक्ष्मीर्दिनमेवेति यावत् एवं सत्यर्कायनाभ्यां सकाशात्सदसत्फलेषु विषयेषु पुराणे गणिते च साम्यं स्या
त् एतदुक्तं भवति गणिते किल कर्कसंक्रमे दिनार्धं तत्परं रात्र्युन्मुखत्वाद्रात्रिरित्युच्यते एवं मकरसंक्रमे निशार्धं तत्परं दिनोन्मुखत्वाद्दिनमेवेति तथा च

कि॰टी॰
३५

सिद्धांते विरोधपरिहारः दिनं सुराणामयनं यदुत्तरं निशेतरत्सांहितकैः प्रकीर्तितं दिनोन्मुखेर्के दिनमेव तन्मतं निशात यातत्फलकीर्तनायतदिति १९ अथैतद्वै वस्पष्टयति उपजातिका व्याख्यातप्रायमेतत् हि यस्मात्कारणात्कर्कंगते अर्के सति सुराणां देवानां अपराह्णः स्यात् अन्ह अपरं अपराह्णः दिनोत्तरार्द्धं अस्य फलं पुनः फलं तु रात्रिवदाहुः नक्रं मकरे गते अर्के सति एषां देवानां अपररात्रं स्मरंति रात्रेः अपरं अपररात्रः अहः सर्वैकदेशेत्यच् रात्रान्हाहाः पुंसीति पुंस्त्वं एतत्परं एतस्मात्परं वासरवत्स्मरंति संहिताकारादयः अस्य दृढीकरणार्थं एतद्दृष्टांतमन्यत्राप्याह २० उपजातिका किलेत्यहं ते कर्के अतश्च हेतोः दशमीष्वपि प्राक्पूर्वकापालिको वेधविधिरुक्तः निशार्धाद्दिनार्धपर्यंतं प्राक्कपालं दिनार्धान्निशार्धपर्यंतं पश्चिमकपालं ग्रहगणिते प्रसिद्धं तयोः कपालयोर्भवः कापालिकः अ

कर्कंगतेर्के हि सुरांप---राह्णः फलं पुरा रात्रिवदाहुरस्य नक्रंगते चापररात्रमेषामेतत्परं वासरवत्स्मरंति २० अतश्च
कैश्चिद्दशमीष्वपि प्राक्कापालिको वेधविधिः किलोक्तः मासोन्यएवन्नियमव्रतादौ पित्र्ये निशार्धे सति पूर्णिमास्या २१॥

यं भानुः दशमीशेषसंयुक्तो यदि स्यादरुणोदयः वैष्णवैस्तु न कर्तव्यं तद्दिनैकादशीव्रतमित्यादिवाक्यैररुणोदये दशम्याविद्धैकादशी यथा वैष्णवैस्त्यज्यते तद्वत्केश्चिन्निंबादित्यसंप्रदायिभिरर्धरात्रे दशम्याविद्धैकादशीत्यज्यते अर्धरात्रादुपरि उत्तरदिनमाप्तेः तद्वाक्यं च अर्धरात्रेपि केषांचिद्दशमीवेध इष्यते अतश्च धर्मशास्त्रे पित्र्याशौचार्तवादिषु केचिदर्धरात्रादुपर्युत्तरदिनमिछंति अतश्च विष्टिरंगारकश्चैव व्यतिपातश्च वैधृतिः प्रत्यरिर्जन्मनक्षत्रं मध्यान्हात्परतः शुभमित्यादिवाक्यानामवकाशः अपि चामासोन्य इति एवमनेनैव हेतुना पौर्णमास्यां पित्र्ये निशार्धे सति नियमव्रतादावन्यो मासः स्यात् पितॄणामिदं पित्र्यं पितुर्यत् नियमाः चातुर्मास्ये शाकदध्यादित्यागादयः व्रतानि कार्तिकव्रतादीनि तेषामारंभः पूर्वमासस्य पूर्णमासीमारभ्यैव यतस्तत्र पितॄणां निशार्धं तथा हि चं

इस्योर्ध्वभागे वसंतः पितरः स्वमस्तकोपरि दर्शे सूर्यं पश्यंति अतस्तत्र दिनार्धं एवं पूर्णमास्यां सूर्यस्य अधोर्ध्वस्थितत्वात् अर्धरात्रः कृष्णपक्षार्द्धे सूर्योदयः शु
क्लपक्षार्धे लमय इति पित्र्यमानस्य वासनया सिद्धांतप्रसिद्धं २१ अथ राहुसद्भावे प्रमाणांतरमाह द्रुतविलंबितं ततस्मादिति हेतोः स राहुर्विद्यत एव परैरन्यै
र्हेतुभिः किं अन्ये हेतवस्तिष्ठंतु तमेव हेतुमाह रुधिरेति रुधिरबिंदुवपुषे यातथायेतामसकीलककेतवो बिलसंति तेषां पिता राहुसमर्थनहेतवः सुः रुधिर
स्य बिंदुर्वा यस्मिन् तद्रुधिरबिंदु तच्च तद्वपुश्च तत्तथा वपुः शरीरं तामसकीलकाश्च ते केतवश्च ते तथा स्वस्त्र सौ पिता च तस्य पितात स्य समर्थनं संस्थापनं तत्र हे
तवस्ते तथा तामसकीलकास्व्यापेके तवस्ते राहुसुता इत्युक्तत्वात् तेषां केतूनां पिता राहुरस्तीत्यर्थः तथा चोक्तं वराहसंहितायां शतजानलानुरूपाः त्रिशूलतारा

तद्विति विद्यत एव स किं परैः रुधिरबिंदुवपुर्विलसंति ये॥ तद्भुतामसकीलककेतवः स्वपितुराहुसमर्थनहेतवः २२ यः
पर्वगस्तस्य गतिर्न दृष्टा सैव ग्रहत्वपि महत्प्रमाणं विलोमगामी विधुपात एव तस्माद्ध्रुवो राहुरिति प्रतीतः २३ इति विवाह
वृंदावने राहुस्तताध्यायः सप्तमः ७
ऊर्जात्मजाः षष्टिः नाम्ना च केतुकुमारस्ते सौम्याशासंस्थिताः पापाः त्रिंशत्त्र्यधिकाराहोस्ते तामसकीलकाद
तिख्याताः रविशशिग्राद्दृश्यंते तेषां फलमर्कवच्चोक्तमिति २२ राहोर्ग्रहत्वं प्रागुक्तप्रमाणेन भंग्यंतरेण द्रढयति उपजातिकायः पर्वगो ग्रहणगो राहुस्तस्य गति
साक्षान्न दृष्टा किंत्वनुमानेन ग्रहणकृक्षग एवेत्यादिना अतो गतिरस्तीत्यनुमानसिद्धं सैव गतिर्ग्रहत्वे महत्प्रमाणं हि यस्मात्कारणादेव विधुपातो राहुर्विलोम
गामी सदा वक्रचारी अस्ति यथा चंद्रार्कौ सदानुलोमगामिनौ न तथैवायं सदा विलोमगामीति तथा च भूपालः राहुकेतू सदा वक्रौ शीघ्रगौ शशिभास्करावित्ति तस्मा
द्ध्रुवो राहुरिति प्रतीतः प्रत्ययं प्राप्तः एतद्वाक्यं ग्रंथकृता न भवतीति प्रतिभाति प्रतिदिनस्वचर इत्यादिना पौनरुक्त्यापत्तिः तद्विति विद्यत इत्यनेनाध्याय

समाप्तिप्रतीतेश्च २३ इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशदैवज्ञविरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायां
राहुसत्ताध्यायःसप्तमः ७ अथषड्वर्गादिफलानिविविक्षुस्तावत्तन्वादिभावानयनंजातकशास्त्रीयमप्यत्रसौकर्यार्थमाह नवशालिनीवृत्तानिल
ग्नादर्कवद्द्वात्रिंखंडंकृत्वातस्यघटीभिर्भूयःपुनर्व्यसैर्लग्नंकार्यं तद्यथा लग्नमेवसूर्यंप्रकल्प्य अयनांशान्दत्वातस्माच्चरंकृत्वारात्रिदलंकार्यं नमिष्टका
लंप्रकल्प्य तस्मात्सायनांशलग्नात् लंकोदयैर्भोग्यादिकंकृत्वालग्नंकार्यमिति अर्थात्तच्चतुर्थलग्नंस्यात् तद्दलग्नेचक्रार्धोनेषड्भान्यूनेकार्ये एवंतत्कालंअ
स्तमध्यान्हलग्नेक्रमेणजायेयातां उत्पन्नेभवेतां १ लग्नंतुर्याच्चतुर्थलग्नाच्छोध्यंतुर्यमस्तात्सप्तमलग्नाच्छोध्यं अस्तमध्याद्दशमग्नाच्छोध्यंमध्यमैंद्रीविलग्ना

अथषड्वर्गाध्यायःकृत्वालग्नादर्कवद्द्वात्रिंखंडंभूयोव्यसैस्तद्घटीभिर्विलग्नंचक्रार्धोनेतेचतत्कालंएवंजायेयातामस्तम
ध्यान्हलग्ने १ लग्नंतुर्यात्तूर्यमस्ताद्विशोध्यंमध्यादस्तंमध्यमैंद्रीविलग्नात् शेषत्र्यंशान्द्विर्द्विराद्येषुदद्याद्देवभावाःस।
धिरतद्दलैक्यं २ संध्यौखेटोनिःफलोभावभागेस्तुल्यःसम्यक्भावपंक्तिंव्यनक्ति ॥

॥ह॥ छोध्यंइंद्रस्येयमैंद्रीपूर्वादिक्तत्रविलग्नंतदे
वलग्नमित्युच्यते तस्मान्मध्यंशोध्यं शेषाणांचतुर्णामपिपृथक्पृथक्त्र्यंशान् आद्येषुलग्नादिषुद्विर्द्विवारंदद्यात् एवममुनाप्रकारेणभावाःस्युःतद्यथा
लग्नंचतुर्थाद्विशोध्यतस्यत्र्यंशंलग्नेदत्वाद्वितीयभावोभवेत् पुनरपितमेवत्र्यंशंद्वितीयभावेदत्वात्तृतीयभावोभवेत् एवंतुर्यमस्ताद्विशोध्यतत्त्र्यंशं
तुर्येदत्वापंचमषष्ठौभावौस्तः एवमष्टमनवमादयः एतयोर्दलैक्यंसंधिःस्यात् तद्यथा द्वादशभावलग्नयोरैक्यंदलंतन्मध्यवर्तीसंधिःस्यात् एवंलग्न
द्वितीययो द्वितीयतृतीययोरित्यादि २ अथग्रहफलानांभावकल्पनवशाच्चारतम्यमाह संधौस्थितोग्रहोनिःफलःशुभफलोस्यशुभफलोपिभावभागेस्तु

त्यरवेटः सम्यक्परिपूर्णभावपंक्तिं भावफलं व्यनक्ति प्रकटयति ददातीति यावत् संधेः सकाशादूनाधिक्यमाप्तः प्राप्तः खेटगतैष्यभावाधीनं स्वपाकं संद
धाति संधेरूनो ग्रहो गतभावजं फलं अधिकस्त्वेष्यभावजं फलं ददातीत्यर्थः नत्वयं पादोऽर्धमिति त्रैराशिकेन कल्प्य एवमनेन विधिना यत्रभावेऽस्थितो ग्रहस्तत्फ
लं भावजं लग्नराशेः सकाशाद्यावति राशौ स्थितो ग्रहस्तत्फलं स्वाभाविकं ३ अनयोर्विभेदे मतिनिर्णयमाह भावेन भावकल्पनया ये जातास्तेषां गुणानां
नांगीकारः नस्वीकारः तस्माद्भावकल्पनवशाद्ये दोषास्तेषां दोषाणां तत्त्वतः साकल्येन त्याग एव अत्र प्रथमस्योदाहरणं भावेति स्वाभाविके लग्नात्सप्तमः स
प्तसप्तिः सूर्यो भावव्यक्तौ सत्यां भावकल्पनया अष्टमंगतोपि त्याज्य एव सप्तसप्तयोऽश्वाः यस्यासौ तथा एतदुक्तं भवति सूर्यः किल सप्तमो दुष्टः अष्टमः शुभः

संधेरूनाधिक्यमाप्तो गतैष्यभावाधीनं संदधाति स्वपाकं ३ नांगीकारो भावजानां गुणानां तद्दोषाणां तत्त्वतस्त्याग एव भाव
व्यक्तावष्टमत्वं गतोपि त्याज्यो लग्नात्सप्तमः सप्तसप्तिः ४ प्रत्याख्येयः पाक्षिकोपीह दोषः सम्यग्व्यापी योगुणः सोनुगम्यः
यस्मादंशे गेहभावाधिकः सन्न स्याद्भूत्यै भार्गवः पंचमोपि ५ ॥

स्वाभाविकेन सप्तमः सूर्यः यदि भाववशादष्टमो भवेत्तदासौ शुभोपि त्या
ज्य एव ४ अथ सयुक्तिकं द्वितीयोदाहरणमाह यस्मात्कारणाद्दोषः पाक्षिकोपि प्रत्याख्येयस्त्याज्यः गुणस्तु यः सम्यग्व्यापी सोनुगम्यः अनुसरणीयः सम्य
ग्व्याप्नोतीति सम्यग्व्यापी सर्वसंमतः पक्षांतरगतोपि दोषस्त्याज्यो गुणस्तु सर्वसंमत एव ग्राह्य इत्यर्थः तस्मात्कारणात्पंचमोपि भार्गवः अंशे भागे गेहभावा
दूहभावभागेभ्यः अधिकः सन् भूत्यै शुभाय न स्यात् अयं भावः पंचमः शुक्रः किल शुभः षष्ठोऽशुभः भावादुभयतो यो संधी तदंतर्वर्तिनो राशेस्तद्भावस्य अतः
पूर्वसंधेः सकाशादंशैरधिको ग्रहश्चेदुत्तरभावस्थितो भवेत् अतः स्वाभाविकेन पंचमः शुक्रो यदि भाववशेन षष्ठो भवेत्तथापि त्याज्य एवेति अथ लग्नात्तद्

रिकाज्ज्ञानंविविस्तुस्तदर्थैताव्तसंक्रांतिज्ञानमात्रेणसूर्यज्ञानंलग्नांशज्ञानंचाह ५ अंतर्मध्येवासराः अंतर्वासराः संक्रांत्योरंतर्वासरास्तैस्तथा तैर्द्युवृंदाहि न
गणाद्युद्भादिराश्यादिलब्धं ततन्मेषादिराशिभिर्मिश्रं युक्तंभानुःस्यात् तद्यथा संक्रांतिमारभ्य इष्टदिनपर्यंतयोगतोदिनगणः सपूर्वसंक्रांतिमारभ्य उत्तरसं
क्रांतिपर्यंतयेमध्यवर्तिनोदिवसास्तैर्भक्तः तस्माद्राश्यादियल्लब्धंतत्संक्रांतिवशेनगतराशिभिर्युक्तंराश्यादिकोभानुःस्यात् अथलग्नांशज्ञानंभक्तादिति लग्नस्य
भुक्तायेनवांशास्तैर्दिग्भिर्निघ्नारामैर्भक्तास्त्रिंशद्दशाभागाभवेयुः तद्यथा यथोक्तविधिनालग्नशुद्धिं नवांशशुद्धिंचविचार्य अजमृगाननतौलीत्यादिवक्ष्यमाणा
त्यालग्नादिमंशमारभ्य इष्टनवांशात्पूर्वंयेनवांशाभुक्तास्तेदशघ्नास्त्रिभक्तास्तल्लग्नराश्याधोभागाःस्युरितिराश्यादिलग्नंस्यात् ६ अथाभ्यांकालमाहरा

संक्रांत्यंतर्वासरैर्यद्युवृंदाल्लब्धंभानुर्भादिमेषादिमिश्रं भक्तारामैर्लग्नभुक्तानवांशादिग्भिर्निघ्नास्त्रिंशदंशाभवेयुः ६रात्रौ
भानुर्भार्धयुक्सायनांशस्तन्वर्कांशाःस्वोदयघ्नाः ख्यक्ते त्रिंशद्भक्ताभुक्तभोग्याःफलादितादृक्कालोमध्यगःस्वोदयाढ्यः ७

त्रौभानुर्भार्धयुक्षड्राशियुक्तः दिवातुयथास्थितएवसायनांशः अयनांशसहितौदिवारात्रौच अर्थाल्लग्नंचसायनांशंकार्यंतन्वर्कांशाः क्रमेणभुक्तभोग्याः
ख्यक्स्वोदयघ्नाःत्रिंशद्भक्ताःपलादिस्यात् अर्थाद्भुक्तंभोग्यंचतद्यथा तनौलग्नस्यभुक्तभागालग्नोदयेनगुणिताःत्रिंशद्भक्ताःफलादिभुक्तंस्यात् एवमर्कस्यभो
ग्यभागाःअर्कोदयेनगुणितास्त्रिंशद्भक्ताःपलादिकंभोग्यंस्यादितितादृक्कालःस्वोदयाढ्योमध्यगःस्यात् तदिवदृश्यतेसौतादृक् सचासौकालश्चतादृक्कालः
पलादिभुक्तभोग्यकालःस्वोदयैर्मध्यवर्तिभिरुदयैराढ्यःमध्यगःलग्नार्कयोर्मध्यवर्तीकालस्यात् ७ अथलग्नकालमुक्त्वालग्नात्कालहोरामाह सचासौकाल राम:
श्वतत्कालःतत्कालेर्कःतेनन्यूनंतच्चतल्लग्नंचतस्यअंशाःतेषांपिंडःसमूहः पंचघ्नोणिभिः पंचदशभिर्भक्तःभुक्तहोराःस्युःतदीशाःतासांहोराणामीशाभास्वदा ३७

दयो वारमारभ्य संख्यायेरन् गणयेरन् क्रमेणेति लिङ् भास्वान् सूर्यः शुक्रः प्रसिद्धः ज्ञो बुधः इंदुश्चंद्रः सौरः शनिः आर्यो गुरुः भौमः प्रसिद्धः ८ अथ पापहोराभंग
माह सौम्यग्रहहोरा शुभा पापहोराशुभेति स्पष्टमर्थसिद्धं च सौम्यवर्गैः अधिके तस्मिन् सौम्यवर्गाधिके लग्ने सति क्रूराः पापहोरा मोघा निःफलाः स्युः गृहाद्रीन्बहु
गान्नस्यातितत्र चतुराधिकाः सौम्या वर्गाश्चेत्स्युस्तदा सौम्यवर्गाधिक्यमिति स्पष्टं किंच वारे रात्र्यां च क्रूरा होरा मोघाः स्युः सौम्यवारे सहोरा रात्रौ क्रूरवारे सत्यपीत्यर्थः
तथा च गर्गः क्रूरवारे क्रूरहोरा न शस्ता इह मंगले नातिदुष्टा शुभवारे रात्रौ स्वल्पफलामतेति वैद्यनाथः न लग्नं सच्चतुर्वर्गे दुष्यते कालहोरयेति एतत्प्रसंगेन
अन्यस्य पापजनितस्याशुभफलस्य भंगमाह पापारिष्टमिति पापारिष्टं पापग्रहजनितमरिष्टं अशुभं निःफलं स्यात् कस्मिन्सति शक्तिभाजां बलिनां सद्ग्रहाणां सौ

तत्कालार्कस्यूनलग्नांशपिंडो भक्तः पंचघ्नोणिभिर्भुक्तहोराः भास्वच्छुक्रज्ञेंदुसौरार्यभौमाः संख्यायेरन्वारतस्ते तदीशाः ८
होराः क्रूराः सौम्यवर्गाधिके स्युर्लग्ने मोघाः सौम्यवारे च रात्र्यां पापारिष्टं निःफलं शक्तिभाजां स्यात् षड्वर्गे लग्नगे सद्ग्रहाणां ९
चरार्धदेशांतरयुग्वियोगौ क्रमेण याम्योत्तरगोलगेर्के

म्यग्रहाणां षड्वर्गे लग्नगे सति ९ एवं कालहोराणां मतांतरमुक्त्वा सर्वसंमतं वक्ष्यन्नत
द्दर्थं तावद्वारप्रवृत्तिमाह उपजातिका चरार्धं देशांतरं च ग्रहगणिते प्रसिद्धं तत्र चरार्धमेव चरमुच्यते देशांतरयोजनानि स्वचतुर्थांशोनितानि तत्पलानि स्युः
तेषां चरार्धपलानां देशांतरपलानां च क्रमेण युग्वियोगौ कार्यौ कस्मिन्सति याम्योत्तरगोलगे अर्के सति याम्यगोले योगः उत्तरगोलगे वियोग इत्यर्थः तत्र यो
गे सति तैः पलैर्दिनवारकर्तुः प्रवृत्तिरग्रुदयात्पुरा पूर्वं स्यात् वियोगे सति पश्चाद्भवेत् अतो दक्षिणगोले सदा पूर्वं वारप्रवृत्तिरुत्तरगोले पश्चादिति दिनस्य
दिवसस्य वारस्य कर्ता वार एवेति यावत् इयमुक्ता वारप्रवृत्तिः संगतावासना बाह्यत्वात् सप्तर्षिवराहादिवचनविरोधाच्च तथाहि लंकायां सूर्योदयात्सर्वदेशेकि

लवारप्रवृत्तिः लंकायांपत्क्षितिजंतदन्यदेशेउन्मंडलंउत्तरगोलेस्वक्षितिजादूर्ध्वमुन्मंडलंदक्षिणेत्वधःतदंतरंचरमेव अतउत्तरगोलेमध्यरेखायांस्वो
दयादुपरिचरपलैर्वारप्रवृत्तिः दक्षिणेतुपूर्वं मध्यरेखास्वदेशोदययोरंतरेदेशांतरपलानितैःपलैः रेखायाःपश्चिमदेशेऊर्ध्वमुदयःपूर्वदेशेत्वधःअतो
नेनविधिनाचरदेशांतरयोःसंस्कारवशादूर्ध्वमधोवावारप्रवृत्तिरिति अतएवोक्तंसिद्धांते अर्कोदयादूर्ध्वमधश्चेत्यादि तथाचसंहितायांसप्तर्षिभिश्चउ
त्तरदक्षिणचरदलहीनयुतानाडिकारवेरुदयात् प्राक्पश्चांतरदेशांतरयोजनखाष्टांशकेनापीत्यादि अन्यैश्चसौम्येगोलेसवितुरुदयादित्यादि अतउ
क्तमनेनतद्गोलवासनाविरुद्धंसप्तर्षिप्रमुखवचनैर्विरुद्धं अथवक्तव्यमस्यपाठांतरमस्तीतिचेतन्नयतःसर्वत्राप्ययमेवपाठः अथचवक्तव्यमस्यार्थांतरमस्ती
तिचेन्नतदपिनउक्तानार्थत्वेसत्यर्थांतरासंभवात् अर्थांतरंभविष्यतिचेद्विचारयंतु नास्त्येवार्थांतरं अथवक्तव्यमसौमध्यरेखायाःपश्चिमदेशनिवासीभविष्यति

योगेपुरारव्युदयाद्वियोगेपश्चात्प्रवृत्तिर्दिनवारकर्तुः १० द्विघ्नेष्टनाडीशरलब्धतुल्यावारप्रदेशादपिकालहोराः

अतस्तेनस्वदेशाभिप्रायेणेदमुक्तमितितदपिन उत्तरगोलेदेशांतरपलेभ्योहीनेचरेसतिव्यभिचारात् तथाहितद्भावयोः संस्कारेक्रियमाणेपश्चिमदेशांतर
स्यावशेषत्वात्तत्तुल्यैःपलैःपूर्वमेववारप्रवृत्तिर्भाव्या असौतुवदतिवियोगेपश्चादिति अतःकुत्राप्यनालंबनेसतीदंवक्तव्यं अनेनपश्चिमदेशनिवासित्वा
त्स्वदेशाभिप्रायेणेदमुक्तंयत्तूत्तरगोलेअल्पचरेसतिव्यभिचर्यतेतत्क्वदाचित्कत्वात्तेनोपेक्षितमितिमंतव्यं १० अथहोरानयनंइंद्रवज्रावारप्रवेशाद्वारप्रवे
शमारभ्यद्विघ्नाश्चताइष्टनाड्यश्चताभ्यःशरैःपंचभिःयल्लब्धंतेनतुल्याःकालहोराःकालहोरेशाःस्युःअभिमतांतरद्योतनेप्रागुक्तहोराःस्युरेताअपिभवं
तीत्यर्थःतासुहोरासुसंख्यागणना ——— उक्तवत्स्यात् ... माहपदीति यद्वाभाभ्यांप्रकाराभ्यांक्रूराहोराभवेतक्रू

वर्गः पापवर्गाधिक्यं च तदाति दोषो महादोषो भवेत् ते दात लग्नं सर्वथा त्याज्यमेतेत्यर्थः ११ अथैतत्प्रसंगेनान्यांश्च महादोषानाह शार्दूलविक्रीडितं गंडांतानित्रि
विधानि शूलवैधृतवरीयसामित्यादिना वक्ष्यमाणानि वैधृतः सप्तविंशो योगः संक्रांतेः सकाशाद्यामद्वये उभयतः संक्रांतिकालात्प्राक्पश्चाच्च षोडश घटिका इत्यर्थः
यामार्धं अर्धयामः स तु शास्त्रांतरोक्तः मनीषिणोर्धप्रहरा हि तोपादित्यादिना व्यतिपातः सप्तदशो योगः विष्टिर्भद्रा सप्तमं करणं कुलिकोनंतरमेवोक्तः एतैर्गंडांतादि
दोषैर्भग्नं विलग्नं जगुर्मुनयः सर्वश्चन्यतमे दोषे सति लग्नभंगः स्यादित्यर्थः अत्र कुलिकमाह द्विघ्ना इति द्वाभ्यां द्वाभ्यामूना द्विघ्नाः मनवश्चतुर्दश अर्कतः सूर्यमा
रभ्य कुलिकनो मुहूर्ता भवंति कुलिकोस्ति येषां ते कुलिकिनः रवौ चतुर्दशे मुहूर्ते कुलिकश्चंद्रे द्वादशे भौमे दशमे इत्यादि निशि तु व्येकाः रवौ त्रयोदशे चंद्रे एकादशे

संख्योक्त वृत्तास्वयमहुभाभ्यां क्रूराकुवर्गश्च तदाति दोषः ११ गंडांतेष्वपि वैधृतावुभयतः संक्रांतियामद्वये यामार्धं व्यतिपा
तविष्टिकुलिकैर्भग्नं विलग्नं जगुः द्विघ्ना मनवोर्कतः कुलकिनो व्येका मुहूर्ता निशि त्याज्यास्तिथ्युडुवारजाश्च न परे दो
षाः खशादीन्विना १२

इत्यादि दिनस्पराग्नेर्वा पंचदशांशो मुहूर्तः प्रसिद्धः अथैतत्प्रसंगेन अन्येषां वारादिदोषाणां विषयमाह त्याज्या इति येमया
त्र उक्ता दोषाः तेभ्यः परे अन्ये तिथ्युडुवारजा दोषाः खशादीन्विना न त्याज्याः आदिशब्देन हूणवंगानां ग्रहणं तिथिश्च उडुश्च वारश्च तेभ्यो जातास्तेन था तत्र तिथिजा
दग्धातिथ्यादयः नक्षत्रजा उपग्रहादयः वारजाः कंटककालवेलादयः ते खशादिष्वेव वर्जनीया अन्यत्र तत्तोत्र नोक्ता इति ये त्वत्रोक्तास्ते सर्वदेशे त्याज्या इत्यर्थः
उक्तं च तिथ्युडुदिनपतिजाता योगा ग्राह्यास्तु हूणखशवंग इत्यादि यद्वा तिथिश्च उडु च तिथ्युडू तिथ्युडू च वारश्च तिथ्युडुवाराः तेभ्यो जातास्ते तथा ति
थिवारजा न त्वत्र वारजाश्चेत्यर्थः उक्तं च श्रीपतिना विरुद्धयोगास्तिथिवारजाता इत्यादि तिथिवारजाः संवर्तकादयः उडुवारजाः मृत्युयोगकालदंडा

रयः तत्र केचिन्मृत्युयोगं सर्वदेशेषु त्यजंति तद्वाक्यं च सर्वदा सर्वदेशेषु मृत्युयोगं विवर्जयेदिति १२ अथ लग्ने षड्वर्गशुद्धिमाह शार्दूलविक्रीडितं राशेः अं
शाः राश्यंशाः राशिभुक्तांशाः राशीन्संत्यज्य अंशा ग्राह्या इत्यर्थः ते चतुर्षु स्थानेषु क्रमेण शशिभूगुणेषुगुणहताः १।१।३।२ ईदृगुणे ह्रीशेषाः सप्ताः तिथ्यभ्रभू
दिक्शरैर्भक्ताः १५।१०।१०।५ अभ्रभुवो दशशेषाः प्रसिद्धाः लब्धानि भार्धद्रेयो वर्गाः स्युः भार्ध होरा द्रेक्काणो द्रेष्काणः नंददिन रुद्रागो नवांश द्वादशांशौ एवं
चत्वारो वर्गाः यस्य ग्रहस्य यद्गृहं तत्तस्यैव अयमेको ग्रहास्यः अथ त्रिंशांशः समराशौ सितादीनां पंचाद्यास्त्रिंशांशाः त्रिंशतः पूरणास्त्रिंशाः शदंतविंशते
श्चेति डप्रत्ययः त्रिंशच्छते अंशाश्च त्रिंशांशाः तद्यथा समराशावाद्याः पंचभागाः शुक्रस्य ततः सप्त बुधस्य ततोऽष्टौ गुरोः ततः पंच शनेः ततः पंच भौमस्ये

राश्यंशाः शशिभूगुणेषुगुणहतास्तिथ्यभ्रभूदिक्शरैर्भक्ता भार्धद्रेक्काणनंददिनरुद्रागाग्रहं यस्य यत् त्रिंशांशाः सितसौ
म्यजीवरविजक्ष्माजन्मनां व्युत्क्रमादोजर्क्षेषु शराश्वसर्पमरुतः पंचेति षाड्वर्गिका १३ कुजकवींदुजचंद्ररवींदुजाः सित
कुजेज्ययमार्कजसूरयः॥

ति ओजर्क्षेषु विषमराशिषु व्युत्क्रमात् भागानामधिपतीनां च तद्यथा आद्याः पंच भौमस्येति ओजर्क्षेषु विषमरा
शिषु व्युत्क्रमात् भागानामधिपतीनां च तद्यथा आद्याः पंच भौमस्य ततः पंच शनेः ततोऽष्टौ गुरोः ततः सप्त बुधस्य ततः पंच शुक्रस्येति अत्र सितादीना
मेवोत्क्रम इति न व्याख्येयं गर्गादिवचनविरोधात् इतीयं षड्वर्गिका स्यात् षण्णां वर्गाणां समाहारः षड्वर्गी सैव षड्वर्गिका १३ अथ सौम्यपापवर्गज्ञानाय
राश्यधिपानाह द्रुतविलंबितं कुजादयो भवनपा राश्यधिपाः स्युः मेषादीनां द्वादशराशीनां कुजादयो द्वादशयोर्द्वादशक्रमेणाधिपाः स्युरित्यर्थः एवं गृहाधी
शाः अथ नवांशस्य एते लव पा नवांशपतयश्च स्युः नवांशराशेरप्यधिपाः स्युरित्यर्थः तमेव नवांशराशिमाह तदादय इति तस्य नवांशस्योदयः प्रथमाः अ

रा·
३९

जमृगाननतौलिकुलीरकाः स्युः मेषराशौ प्रथमनवांशो मेषएव वृषे मकरः मिथुने तौली कर्के कर्कट एव एवं पुनः सिंहे मेषः कन्यायां मकर इत्यादि एवं प्रथमनवांशं ज्ञात्वा तमारभ्य प्रागानीतभुक्तनवांशान् गणयित्वा वर्तमानो नवांशराशिः स्यात् तदधिपो नवांशाधिपतिरिति १४ अथ होरादीनाह वसंततिलका समे सम राशौ अब्जखगयोर्होरे स्तः अब्जश्चंद्रः खगः सूर्यः खगः पूषा गभस्तिमानित्यभिधानात् विषमे राशौ क्रमेण होरे स्तः प्रागानीतलब्धवशात्समे राशौ प्रथमा होरा चंद्रस्य द्वितीया सूर्यस्य विषमे प्रथमा सूर्यस्य द्वितीया होरेत्यर्थः अथ द्रेष्काणाधीशाः द्रेष्काणका इति स्वगृहात्प्रथमपंचनवेश्वराणां द्रेष्काणाः स्युः तद्यथा यदा शून्यं लब्धं तदा प्रथमो वर्तमानः यदा एकं तदा द्वितीय इत्यादि अनेन विधिना प्रथमो द्रेष्काणो राश्यधिपस्यैव द्वितीयस्तस्माद्राशेः पंचमाधिपस्य तृतीयो

मवुनपालवपाश्वतदाद्य यस्त्वजमृगाननतौलिकुलीरकाः १४ होरे समे ब्जखगयोर्विषमे रवींद्वोर्द्रेष्काणकाः प्रथमपंच नवेश्वराणां स्युर्द्वादशांशपतयः स्वगृहाच्छुभानि भानि ग्रहाश्च निजमित्रशुभांशभाजः १५ भजेतभुक्त्यंतरभुक्तियोगैः एथक्स्थयकृ षष्टिगुणान् गुणाग्नीन् ॥

नवमराश्यधिपस्येति अथ द्वादशांशाः स्वगृहात् द्वादशांशपतयः स्युः स्वीयलब्धवशात् द्रेष्काणवत् त्रिंशांशानां स्वामिन एवोक्ताः एवं षड्वर्गाधीशा उक्ताः अथैषां शुभत्वमाह शुभानीति शुभानां सौम्यग्रहाणां भानि राशयः शुभानि स्युः षड्वर्गस्य राशेरधिपः शुभः सर्वे शुभः स्यादित्यर्थः न केवलं राशि किंतु ग्रहाश्च निजमित्रशुभांशभाजः शुभाः निजश्च मित्रं च शुभश्च तेषामंशो नवांशः तं भजंति ते तथा स्वसुहृच्छुभानां नवांशस्थिता इत्यर्थः वर्गराशेरप्यधिपः एवंविधस्तदैव वर्गः शुभ इति भावः १५ अथ तिथ्यादीनां संधिकालमाह उपजातिका षष्टिगुणान् गुणाग्नीन् एथक्स्थयकृ भुक्त्यंतरभुक्तियोगैः भजेत् क्रमेण तिथीभयोगांतरनाड्यः स्युः भुक्त्यंतरं च भुक्तिश्च भुक्तियोगश्च ते तथा चंद्रार्कयोर्भुक्त्यंत

टी. ५०

रं भुक्तिश्चंद्रस्यैव योगश्चंद्रार्कभुक्तियोगः तद्यथात्र यस्त्रिंशतं षष्ठ्या संगुण्य त्रिधा संस्थाप्य क्रमेण चंद्रार्कभुक्त्यंतरेण चंद्रभुक्त्या चंद्रार्कभुक्तियोगेन
च विभज्य तिथिनक्षत्रयोगानां संधिनाड्यः स्युरित्यर्थः तिथिशब्दस्य स्त्रीलिंगेपि सत्वात्कृदिकारात् ङीषि कृते तिथीति सिद्धं उक्तं च सिद्धांते शशितन्नुवि
कलाभ्य इति एता एव मध्यगत्या आनीयव स्फुति नक्षत्रयोगेत्यादिना चंद्रार्कयोः संक्रमणकालमाह इंदोरिति इमा अनेनैव प्रकारेण साधिता अंतरना
ड्यः इंदोः पुण्या रवेस्तु पुण्यतमाः स्युः एतदुक्तं भवति रवेश्चंद्रस्यापि बिंबं त्रयस्त्रिंशत्कलाः अतो नयेर्वरीत्यात्र यस्त्रिंशतं षष्ठ्या संगुण्य स्वस्वगत्या वि
भज्य अंतरकालः स्यात् स चंद्रस्य पुण्यः रवेस्त्वतिशयितपुण्यः अयं कालो नक्षत्रयो राश्योर्वा अंतराले भवेत् संक्रमणकालत्यर्थः १६ अथ भौ

तिथीभयोगांतरनाड्य इंदोः पुण्या रवेः पुण्यतमास्त्विनास्युः १६ कुजादिकानामपि बिंबलिप्ताः स्वषड्गुणाः स्वस्व
जवेन भाज्याः नाड्यादिकः संक्रमणांतरालकालः स्फुटस्तत्स्फुटभुक्तिबिंबे १७ रवेर्भदेकग्रहाधिकस्य यदंश
वृंदं खलु सायनस्य ॥

मादीनामपि संक्रमणकालमाह उपजातिका कुजादिकानां भौमादीनामपि प्रागुक्ता बिंबलिप्ताः स्वषड्गुणाः स्वस्वज
वेन स्वस्वगत्या भाज्याः संक्रमणांतरालकालो नाड्यादिको भवेत् अत्र बिंबानि मध्यान्येवोक्तानि तेभ्यः कृतोयं संक्रमणकालः सोपि मध्यो भवेत तत्स्फु
टभुक्तिबिंबैः स्फुटः स्यात् तेषां भौमादीनां ग्रहगणितोक्त्या स्फुटभुक्तिभिः स्फुटबिंबैश्च स्फुटकालः स्यात् एषा संधिकालादीनामर्धं तदंतादुभयत्रेत्य
र्थसिद्धं १७ अथ कृत्वादिसंधीन्विवक्षुः कृत्वानयनं तावदाह उपजातिका एकग्रहाधिकस्य एकराशियुक्तस्य सायनांशस्य अयनांशसहितस्य रवेर्यदं राम: ५०
शवृंदं भागसमूहो भवेत् तद्राशिद्वयभागैः षष्टिभिस्तष्टं भक्तं यल्लब्धं ते वसंताद्वसंतमारभ्य कृतवो भवंति मृगादि राशिद्वयभोगादित्युक्त्या मीनादौ

वसंतारंभः अत उक्तं एकगृहाधिकस्येति यावद्धिं शौरयनच्युतिः स्यादित्युक्तत्वात्सायनस्येत्युक्तं एवं केचिद्दलयनादीनि सायनार्कादिकं इति तदभिप्रायेणो
दमुक्तं केचित्तु केवलादेव उभयादपि केचित्कालनिर्णयकारादयः १८ अथ ऋत्वादीनां संधिकालमाह तेषां ऋतूणां संधयः अंगांगघटीसमाः षट् षष्टिघटि
कातुल्याः स्युः तदंतास्त्रयस्त्रिंशद्घटिकाः पूर्वपश्चाच्चेत्यर्थः चेद्विषुवायनीयास्तर्हि द्विसंगुणाः द्वात्रिंशदधिकशतघटिकाः इत्यर्थः विषुवं च अयनं च विषुवायने तयो
रिमाविषुवायनीयाः विषुवं मेषतुलासंक्रमौ अयनं कर्कटमकरसंक्रमौ ततः पूर्वपश्चाच्च षट्षष्टिघटिका इत्यर्थः यत्र काले शेषशून्यं भवेत् राशिद्वयभागतष्टमितिक्रि
यमाणे यदा शून्यं शेषं भवेत् एकस्मांतोन्यस्मादिरित्यर्थः स संधिसंधिर्भवेत् संधेरपि संधिः संधिसंधिः एष कालविशेषपुण्यः अतिशयितपुण्यः अत्र संधि

यदत्रराशिद्वयभागतष्टलब्धं वसंताद्यृतवो भवंति १८ तत्संधयोंगांगघटीसमाः स्युर्द्विसंगुणाश्चेद्विषुवायनीयाः स सं
धिसंधिः खलु यत्र शेषः शून्यं भवेदेषविशेषपुण्यः १९ संधौ पुरंध्री शुचमेति वंध्यामृतप्रजा वा यदि संधिसंधिः वदंति वात्स्या
ऋतुनाविमूढा निशीथमध्यंदिनसंधिमूढा २०

संधौ पुण्ये विशेषग्रहणात्संधिकाले साधारणपुण्यमस्तीति सूचितं १९ अथैषां संधी
नां फलमाह उपजातिका संधौ तिथिनक्षत्रादिसंधिकाले पुरंध्री स्त्री शोकं सति प्राप्नोति यदि संधिसंधिस्तदा पुरंध्री वंध्या मृतप्रजा वा भवेत् अथैत
त्प्रसंगेन मध्यंदिनमध्यरात्रसंधिकालयोः फलमाह वदंतीति निशीथमध्यंदिनसंधिषु उढा विवाहिता ऋतुनामूढा आर्तवरहिता वात्स्या मुनयो
वदंति वत्सस्यापत्यानि वात्स्याः निशीथो अर्धरात्रः मध्यंदिनं सैतिमध्यंदिनं तेषां संधयः तत्परिमाणमुक्तं ग्रंथांतरे मूर्तः कालो निवासति महानिशायां
च दिनदले यस्मात् दशपूर्वं दशपरतस्तस्माद् [illegible] नोति २० अथ [illegible] योगसंधीनां विशेषमाह ॥ ॥ ॥ ॥

रयोद्धृतं शूलस्य वैधृतस्य वरीयांश्च एषां योगानां यत्नागागतं अवांतरं यच्च पंचमेषु तिथिषु पंचमीदशमी —— पंचदशीषु यच्च रेवतीं द्वफणिभोद्भवं रेवतीज्येष्ठाश्लेषोद्भवं तदपि आगतादेवांतराद्द्विगुणं सुधीः उत्सृजेत्यजेत् एतेषां मतादेतत्तुल्यं पूर्वपश्चाच्चेत्यर्थः एतद्दुंडांतसंज्ञं २१ अथतिथ्यादीनां संधिव्यवहारार्थं मध्यगत्यानीय पठति वसंततिलका नक्षत्रयोगतिथीनां संधिषु एकानाडिका क्रमेणातिथ्यष्टविंशतिपलैः सहिता उभयत्र पूर्वपश्चाच्च त्याज्या एकानाडिका पंचदशपलैः सहिता उभयत्र पूर्वपश्चाच्च त्याज्या एकानाडिका पंचदशपलैः सहिता नक्षत्रसंधिः अष्टपलैः सहिता योगसंधिः विंशतिपलैः सहितातिथिसंधिः इत्यर्थः लग्नसंधिमाह कर्कालीति कर्कालिमीनतनूनां कर्कवृश्चिकमीनलग्नानां संधिषु दिक्पलानि दशपलानि उभयत्र त्याज्यानि एषां अंता

शूलवैधृतवरीयसां च यत्पंचमेषु च तिथिषु वांतरे रेवतींद्रफणिभोद्भवं तु तद्व्यागता द्विगुणमुत्सृजेत्सुधीः २१ नक्षत्रयोगतिथिसंधिषु नाडिकैकातिथ्यष्टविंशतिपलैः सहितोभयत्र कर्कालिमीनतनुसंधिषु दिक्पलानि त्याज्यानि शेषविवरेष्वपि पंचपंच २२ अमातिथिः पार्श्वतिथिद्वयेन समं न मांगल्यमुपादधाति ॥

त्पूर्वपश्चाच्चेति शेषाणां वृषादिलग्नानां विवरेषु संधिषु पंचपंचपलानि उभयत्र त्याज्यानि एष संधिरंशानामपि ज्ञेयः लग्नोपलक्षणात् २२ अथ मास संधिमाह उपजातिका अमा अमावास्यातिथिः पार्श्वयास्तिथिद्वयेन समं सह साकं सार्द्धं समं सहेत्यमरः चतुर्दशीप्रतिपत्सहितेत्यर्थः मांगल्यं न उपादधाति न धारयति अत्र हेतुमाह लोकमिति यस्मात्कारणात्तत्रतस्मिन् तिथित्रये लोकं दृष्टणश्चंद्रमाः लोकं दृष्टपाति असौ लोकं दृष्टपाः दृष्टपालनपूरणयोः कर्तरि शः शिलात् नालोकस्य दृष्टणे इतिमुम् तिथेः प्रणेता प्रवर्तकः पीयूषवपुरमृतशरीरः वपुष्मान् प्रशस्तवपुर्यस्यासौ व[illegible]चंद्रस्य अस्तंगतत्वादित्यर्थः चंद्रो ह्यमृतकिरणो लो

काप्याय कस्तिथिप्रवर्तक इति अन्येश्चंद्रबाल्यत्वाद्द्वितीयानिषिद्धा तन्मतं निषेधयन् किंचिद्विशेषमाह २३ उपजातिका अयं चंद्रमाः प्रतिपत्समाप्तौ प्र
तिपदंते उदेति च सामीप्ये सप्तमी प्रतिपदंते तत्समीप वेत्यर्थः इक्क्रमादिसंस्कारवशात् स उदितश्चंद्रः कृशोपि वर्धिष्णुतया हेतुना प्रशस्तः वर्धनशीलो व
र्धिष्णुः तस्य भावस्तया यथा शिशुर्वर्धमानस्तया प्रशस्यते तद्वच्चंद्रोपीत्यर्थः अतोस्य बालत्वदोषो नास्तीति सूचितं तस्यापि विशेषमाह द्वीपेति द्विर्गता आ
पो यस्मिन् तद्द्वीपं तस्मादन्यद्द्वीपं द्वीपांतरं तत्र तिष्ठतीति द्वीपांतरस्थः देशांतरदृष्ट इत्यर्थः देशांतरदृष्टश्चंद्रस्तावद्विफलः तावत्कथं यावत्पृथ्वीनयनाध्व
नीनो नास्ति पृथ्वीशब्देन तत्रस्याजनालक्ष्यंते तेषां नयनानि पृथ्वीनयनानि तेषां मध्वामार्गस्तस्मिन्नलंगकृतीति पृथ्वीनयनाध्वनीनः अध्वनीयत्वा

लोकं पृणस्तत्र तिथेः प्रणेता यस्मान्न पीयूषवपुर्वपुष्मान् २३ उदेति त्वायं प्रतिपत्समाप्तौ कृशोपि वर्धिष्णुतयाप्र
शस्तः द्वीपांतरस्थो विफलोपि तावद्यावन्न पृथ्वीनयनाध्वनीनः २४ नाजन्ममासतिथिभेषु न चाधिकोनमासेति
थौ च पृष्ठ मंगलमामनंति यज्ज्येष्ठगर्भजमपत्यमुपेतमेतज्ज्येष्ठमहोत्सवमवश्यमियान्नवृद्धिम् ॥ २५ ॥

वित्यलंगाम्यर्थैस्वः आत्माध्वानो स्वे इति अतः प्रकृतित्वं यद्वा पृथ्वीनयनाध्वनिर्ईनासमर्थः पृथ्वीनयनमार्गेक्षम इति एतदुक्तं भवति शास्त्रेण दृष्टश्चंद्रो दे
शांतरदृष्टः इदं लंकापुरे कस्य यदोदयः स्यात्तदा हि नार्धयमकोटिपुर्यामित्यादि गोलवासनया प्रसिद्धं अतः स्वदेशभूमिस्थितैर्जनैर्यावन्न दृष्टस्तावद्विफल
इत्यर्थः अभ्रादिना तु अदर्शनेन न दोष इति प्रसिद्धमेव २४ अथ जन्ममासादीनां निषेधमाह वसंततिलका जन्मनि मासतिथिभानि तेषु जन्ममासि जन्मतिथौ
जन्मनक्षत्रे वेति पृष्ठ मंगलं चौलोपनयनविवाहादिकं नो आमनंति न कथयंति न च अधिकोने मासे अधिमासे क्षयमासे चेति अधिकोनेति थौ चादिनष्ट

हौदिनक्षयेवेतिज्येष्टमासस्यविशेषमाह यज्ज्येष्टेतियज्ज्येष्टगर्भजमपत्यंपुत्रः कन्यावातज्ज्येष्टमासेमहोत्सवंचौलोपनयनविवाहादिकंउपेतंप्राप्तं
तदवश्यंवृद्धिनइयात्नप्राप्नुयात् ज्येष्टापत्यज्येष्टमासेमंगलंशुभन्नेत्यर्थः२५ अथैषांगुणदोषाणांविवेककर्तुःप्रसंसामाह रयोद्धतं इतियद्गुक्तंगुणा
गुणमयंगुणाश्च अगुणाश्चगुणागुणाःतैःप्रचुरंगुणागुणमयं अतींद्रियदृशोदिव्यदृष्टारोमुनीश्वराःनिरूचिरेनिजगदुःविदितजन्मतन्मतःलग्नलग्न
धीःदैवविक्तीर्तिभाग्भवति तच्चतन्मतं अस्यतच्छब्दस्यपूर्वेणयच्छब्देनान्वयः जन्मचतन्मतंचजन्मतन्मतेजन्मतेयेनासौतथाएवंविधगुणदोषविचा
रचतुरोलग्ननिहितैकबुद्धिःकीर्तिमान्भवतीत्यर्थः २६ इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशदैवज्ञविरचितायांविवाहवृंदावन

इत्यतींद्रियदृशोनिरूचिरेयद्गुणागुणमयंमुनीश्वराः दैवविद्विदितजन्मतन्मतःकीर्तिभाग्भवतिलग्नलग्नधीः २६
इतिविवाहवृंदावनेलग्नषड्वर्गाध्यायोऽष्टमः ८ अथगोधूलिकाध्यायः प्राचींकुंकुमचर्चितामिवदिशंमुक्ताफलस्र
ग्विणींकौसुंभांशुकभासिनीमिवदिशंप्राचेतसींदर्शयन्

टीकायांविवाहदीपिकायांलग्नषड्वर्गादिशुद्ध्यधिकारोऽष्टमोऽध्यायः ८ एवंसर्व
लग्नानांशुद्धिमभिधायेदानींगोधूलिकलग्नविशेषशुद्धिरारभ्यते तत्रतावत्तस्यकालंदर्शयन्स्वकवितकौशलंदर्शयतिशार्दूलविक्रीडितं तावत्सर्यंत
मंगलमनसुरभीरेणोःकुमार्याःकरंपाणिंगृह्णतःस्वीकर्तुःपुरुषस्यमंगलंभवतिसुरभीणांधेनूनांरेणुःधूलिःसुरभीरेणुःअंगेषुलग्नाःसंसक्ताःसुरभीरेण
वोयस्याःसातथाधेनुधूलिधुसरायाइत्यर्थःतावत्कथंयावद्रविःसूर्यःसंध्याकुरंगीदृशासहकरग्रहंपातिकुरंग्यादृगिवदृग्यस्यासातथामृगलोचना
संध्येवकुरंगीदृक्संध्याकुरंगीदृक्तया अत्रसंध्यासायंसंध्यैवतत्रसुरभीरेणूनांसंभवात्किंकुर्वन्सन्कुंकुमचर्चितामिवप्राचींदिशंप्रतिआत्मानंद

र्शयन् इवोत्प्रेक्षायां कुंकुमेन चर्चितां मंडितां तां दृश्योर्णि जनतला द्विकमेकत्वं सायंकाले प्राच्यां कुंकुमसदृशः स्वाभाविकः संध्यारागः स कुंकुममिव वस्तु
प्रेक्षाकयभूतां प्राचीं मुक्ताफलस्रग्विणीं मुक्ताफलानां स्रक् मुक्ताफलहारः सास्ति यस्याः सा मुक्ताफलस्रग्विणी तां मत्वर्थीयो विनिः अर्थान्नक्षत्रमालेव
मुक्ताफलस्रक् कृत्वामिव दर्शयन् प्राचेतसीं दिशमिव प्रचेतसो वरुणस्येयं प्राचेतसी तां प्रतीचीं इव यथार्थे यथा प्राचीं तथा प्राचेतसीमिति तेन प्राचीदि
शं प्राचेतसीं च दिशं न दर्शयन्निति भावः दयभूतां प्राचेतसीं कौसुंभांशुकभासिनी कुसुंभाः पुष्पाणि कुसुंभानि तैर रक्तं कौसुंभं तच्च तदंशुकं च तेन भा
सते सा तया अर्थात्संध्याराग एव कौसुंभांशुकमिति यद्वा कौसुंभांशुकमिव भासते सा तथा या वत्सा यं संध्याकाले एतादृशः संध्यारागः सुरभीरेणव श्च दृ

यावद्याति करग्रहं सह रविः संध्याकुरंगी दृशा तावन्मंगलमंगलग्नसुरभीरेणोः करं गृह्णतः १ उत्कर्णतर्णकविलो
कनवल्गु वल्गत्पीनस्तनोद्दृषितदुर्धरधेनुधूलिः गोधूलिकं स्रजति गोपपृथग्जनानां दोषेर्महद्भिरपि लग्नमनू
नमस्यैः ॥ २ ॥

श्यते तावत्काले क्रूरग्रहकर्तुमंगलं स्यादिति तात्पर्यार्थः १ अथ गोधूलिकप्रशंसां तदधिकारणश्चाह वसंततिलकापं
चश्लोकाः उद्धूर्ध्वौ कर्णौ येषां ते उत्कर्णाः ते च ते तर्णकाश्च तर्णका वत्साः तेषां विलोकनं तेन वल्गावः शोभमानाः वल्गंतीति ता वल्गास्यः वल्गा नगतिविशेषः
पीना मांसलाः स्तना यासां ताः पीनस्तनाः उद्दुत्कर्षेण हृषिताः संतुष्टा उद्दृषिताः हर्षे निष्ठायां वेट् दूलं दुःखेन धर्तुं शक्यं ते ताः दुर्धराः उत्कर्णतर्णकविलोक
तेन वल्गा वश्च ता वल्गांत्यः पीनस्तना उद्दृषिता दुर्धराश्च ता धेनवश्च तासां धूलयस्ता स्तथा ताः कर्मी गोधूलिकं लग्नं कर्तृ गोपपृथग्जनानां स्रजत्युत्पा
दयतिद्दातीत्यर्थः गवां धूलयस्तत्र भवं तदुपलक्षितकाले जातं लग्नं तद्गोधूलिकं गोपाः पशुपालकाः पृथग्जना हीनवर्णाः गोपादीनां गोधूलिल

टी· मेनेएवंविधधेनवो भवंतीतिभावः अस्यप्राशस्त्यमाह दोषैरितिकथंभूतलग्नं अन्यैर्महद्भिर्दोषैः मनूनसहितमपि अयंभावः गोधूलिकलग्ने सदा सप्तमः
४३ सूर्योऽस्त्येव अयंमहादोषः मदनमूर्तिशयइत्युक्तत्वात एतदन्यैर्महादोषैरष्टमभौमादिभिः सहितमपिलग्नंशुभंभवेदिति यद्येवं तर्हिकेचित्षष्ठाष्टमचंद्रेस
तिलग्नस्यभंगमाहुस्तन्निरस्यति २ गोधूलिकेपिअष्टमषष्ठमूर्तिंविधुंयत्केचिन्नोचयंतित्याजयंति तत्तस्मात्कारणादयंस्वरूविप्रपंचः अष्टमंचषष्ठंच अष्टमषष्ठेत
योर्मूर्तिर्देहोयस्यासौतथा अष्टमषष्ठस्थितइत्यर्थः तद्वाक्यंचजामित्रंनविविंतयेद्ग्रहयुतमित्यादि हित्वा चेदष्टमसंषडष्टमगतंगोधूलिकंशस्यते इतिअयं
स्वरूचेःस्वस्याभिरुचेःप्रपंचोविस्तारःयद्वास्वरूच्याकृत्वाप्रपंचोव्यामोहनं जनानांतस्मात्कुतः यस्मादिदंगोधूलिकंविवाहधिष्ण्यैसहपंचांगशुद्धिमय

गोधूलिकेपिविधुमष्टमषष्ठमूर्तिंयन्नोचयंतितदयंस्वरुचिप्रपंचः पंचांगशुद्धिमयमेवविवाहधिष्ण्यैर्यस्मादिदंसततम
स्तगतेपतंगः ३ नांशोनलग्नमिहदृष्टयुतंस्वभर्त्रानार्कारसौरतमसामपिसंगभंगः किंचइचारभयमेकमिहास्तुकिंचिन्ना
त्रप्रमाणवचनंकिमपिश्रुतन्नः ४ ॥

मेवपंचांगशुद्ध्या प्रधानंपंचांगशुद्धिमयंगोधूलिकेविवाहनक्षत्रेषुसत्सुंपंचागशुद्धिरेवमुख्यानलग्न
त लग्नशुद्ध्यादिकमिति पंचागादीनितिथ्यादीनिप्रसिद्धानितेषांशुद्धिःस्वाभाविकदोषविरहः यथारोहिण्यादिषुविवाहेहितत्वात तर्हिविवाहधिष्ण्यैरि
तिपौनरुक्त्यंतन्न क्षत्रस्यप्राधान्यात् उक्तधिष्ण्यमधिकृत्यपंचांगशुद्धिर्विलोक्येत्यर्थः एतदग्रेप्रपंचयिष्यामः एतत्कथयस्मात्कारणादिदंगोधूलिकंसत
तंनित्यं अस्तगतेसप्तमगतेपतंगेसूर्येसतिभवेत् एतादृशेमहादोषेगृहीतेसतिकिंत्वन्येषष्ठाष्टमचंद्रादयइतिभावः अनेनैवअष्टमभौमादयोपिनिराकृताः ए
किंच ३ इहास्मिन्गोधूलिके अंशोनवांशःस्वभर्त्रास्वस्वामिनादृष्टयुतोनास्तुलग्नंचस्वभर्त्रादृष्टयुतंनास्तु अर्कारसौरतमसांसूर्यभौमशनिराहूणां ॥ ४३

गोयोगस्तेन भंगो लग्नभंगः सोपि नास्तु एवं सत्येकं चेद्रचारभयं किमस्तु चंद्रस्य चारस्तस्माद्रूपं हित्वा चंद्रमसं षष्ठाष्टमगतमिति एतद्देकं कथमस्त्विति अ
पि तु तदपि नास्तु नन्वत्रागम एव प्रमाणमिति चेत्तत्राह किं चेति किं च अन्यच्च अत्रास्मिन् चंद्रचारविषये वा युष्माकं प्रमाणवचनं किमपि न श्रुतं अस्मि
न्विषये यद्वाक्यं प्रमाणीकर्तव्यं तादृशं महर्षिसंमतवाक्यं नास्तीति भावः तर्ह्यत्र किं विलोक्यमिति आह ४ तद्वद्धूलिकं शनौ शनिवारे सार्कं कार्यं दृश्ये रवौ स
तीति चित्रशिखंडिनः सूनौ गुरुवारे विकार्यं विगतो रविर्यस्मिन् तद्विरवि अस्तंगते र्के सतीति कस्मात् कुलिकयामदलोपलंभात् कुलिकस्य यामदलं च तयोः
रुपलंभप्राप्तिः शनौ हि रात्रौ प्रथममुहूर्ते कुलिकः अतः सार्कं गुरौ तु अष्टमयामार्धे अतो विरवीति केवलमिदमेव पंचांगमध्ये वारदोषसद्भावात् नत्वन्यदि

राव

सार्कं शनौ विरवि चित्रशिखंडिसूनौ तत्केवलं कुलिकयामदलोपलंभात् प्रायेण संकरभुवामशुभर्क्षपक्षक्रूरक्षणेषु
शुभकृत्कर पीडनं स्यात् ५ अत्राभयत्र घटिकादलमिष्टमाहुर्ग्राह्यस्तदंबरमणेरपि नार्धबिंबः॥

ति एतत् किं तत्राह प्रायेणेति संक
रेण जातिसंकरेण भवंति ते संकरभुवः तेषां हीनवर्णानां करपीडनं प्रायेण बाहुल्येन अशुभर्क्षपक्षक्रूरक्षणेषु शुभकृत्स्यात् ऋक्षं च पक्षश्च ऋक्षपक्षौ
अशुभौ च तौ ऋक्षपक्षौ च तौ तथा क्रूरश्चासौ क्षणश्च स तथा अशुभर्क्षपक्षौ च क्रूरक्षणश्च ते तथा एतदुपलक्षणं दुष्टवारयोगादिष्वपि एष्वपि हीनव
र्णानां पाणिपीडनं शुभं किं पुनः पंचांगशुद्धाविति भावः तथा च शौनकः अंत्यानामशुभर्क्षे इत्यादि यदुक्तं सार्कमित्यादि तत्परिमाणमाह ५ अत्रास्मिन् गो
धूलिके यस्मात्कारणादुभयत्र अर्धास्तमयात्प्रागपश्चाच्च घटिकादलमिष्टमाहुः तत्तस्मात्कारणादंबरमणेः सूर्यस्य अर्धबिंबोपि कालो न ग्राह्यः अर्धबिंबका
ले पश्चिमस्मिन्स तथा न हि तद्वाचकवाक्यानां अर्धोदिते र्धास्तमिते सूर्यबिंबे दृशगत इत्यादीनां गतिमाह कालार्गलेति इयंतपनार्धबिंबवेलाव्यवस्थितिः का

स्वार्गलार्गलानियतये मुनिभिः रचयांबभूवे अरचिणिजंताद्रचतेः कर्मणि लिटि भुवोनुप्रयोगः तपनस्य अर्धबिंबं तस्य वेलाकालः तस्य व्यवस्थितिरव
स्थानं कालस्य अर्गला तस्या नियन्तिर्नियमः इयमर्धबिंबात्मिका वेलाव्यवस्थितिः कालमध्यनियमाय रचिता किंतु तत्पूर्वं तत्पश्चाच्च कालांतरमस्ति अ
र्धघटिकात्मक वाक्यांतरदर्शनादिति भावः तथा चाहुः दिनांते सूर्यबिंबार्धपूर्वपश्चाद्घटीदलं कालार्गलेव वेलायां धात्रोद्वाहाय निर्मितेति अत्र गोधूलिके
पि विधुमष्टमषष्ठेत्यादि यदुक्तं ग्रंथकृता तत्सम्यग्विचारपदवीं नाधिरोहति तथा हि यदुक्तोत्र हेतुः पंचांगशुद्धिमयमेव विवाहधिष्ण्यैरित्यादिना तत्र
दृक्कृतेके यं पंचांगशुद्धिरिति पंचांगानि तिथ्यादीनि प्रसिद्धानि नारदवसिष्ठादिभिः पंचांगशुद्धिविरहदोषस्त्वाद्यः इत्यादिना महादोषप्रकरणेभिहितानि
तेषां शुद्धिर्दोषविरहः दोषो हि द्वेधा प्राकृतिक आगंतुकश्चेति यस्मिन्कर्मणि यदभिहितं न तिथ्यादिकं तस्मिन्प्राकृतिको दोषः यथा विवाहे दर्शव्यतिपातभर

कालार्गलानियतये तपनार्धबिंबवेलाव्यवस्थितिरियं रचयांबभूवे इति विवाहवृं
दावने गोधूलिकाध्यायो नवमः ९॥

ण्यादौ आगंतुको ग्रहादिजनितः यथा तिथौ दग्धत्वं नक्षत्रे पापवेधादिकमिति अतः
पंचांगानां प्रकृतिकदोष एवात्र शुद्धिः न त्वागंतुकदोषविरहः तस्य योगकरणयोरनभिधानात् अपि च शुद्धिशब्देन आगंतुकदोषविरहे उच्यमाने वारदोषः
स्वार्जूरिकसमांघ्रिभमित्यादिना रदादिपठितेषु दोषेषु पौनरुक्त्यापत्तिः एकविंशतिपरिगणनाया असंभवश्च तस्मात्पंचांगानां प्राकृतिकदोषविरह एव शु
द्धिरिति स्थितं अत एवंविधाया पंचांगशुद्धिस्तन्मयमेव गोधूलिकं इत्युक्तं भवति अथ यदीदृशं ब्रूषे पंचांगशुद्धिमयमेव विवाहधिष्ण्यैरिति वदतो यमाशयः
विवाहविहितनक्षत्रे सति पंचांगानां ग्रहादिजनितदोषाभावलक्षणा शुद्धिर्विवक्षिता तदपि न योगकरणयोस्तस्यासंभवात् यथासंभवमिति चेत्तदपि न पं

चपदस्य वैयर्थ्यात् अतः शुद्धिशब्देन प्राकृतिकदोषाभावः स्वीकर्तव्यस्तर्हि पंचांगशुद्धिग्राह्यैः सार्कैशनादिसादिना कुलिकार्धयामौ कथं त्यज्यते वा रदो
षादिति चेत् तत्र नारदवसिष्ठादिभिः पंचांगशुद्धिविरह इत्यादिपठितदोषेषु वारदोषस्य पृथग्ग्रहणात् तर्हि कुलिकक्रान्तिसाम्यं चेत्यागमबलान्न कुलिका
र्धयामौ त्यज्येते यद्येवं षष्ठाष्टमचंद्रेण किमपराद्धं सोप्यागमबलात्त्यज्यते नात्र प्रमाणवचनं किमपि श्रुतमपि चेत्तदपि न यत् आगमप्रमाणं वाक्यानि
संत्येव षष्ठाष्टमे मूर्तिगते च चंद्रे गोधूलिके मृत्युमुपैति कन्या कुजेष्टमे मूर्तिगते यथावास्ते वरस्य नाशं प्रवदन्ति गर्गाः धिष्ण्यं क्रूरयुतं त्याज्यं मूर्तौ षष्ठाष्टमे चंद्रे
कुजे रंध्रास्तलग्नगे विना रंध्रं शुभैर्युक्तं गोधूलं शुभदं भवेदित्यादीनि एतान्यबहुसंमतानीति चेत्तदपि न प्रत्याख्येयः पाक्षिकोपीह दोष इत्युक्तत्वात् किमु
तबहूक्तेः अतः षष्ठाष्टमचंद्रादयो गोधूलिके उक्तदोषास्तेपि त्याज्या इति सिद्धं ६ इति श्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशदैवज्ञवि

अथ मासगोचरविचाराध्यायः चैत्रेमासि प्रतिपदि तिथौ वासरे र्कस्य सर्वै र्मेषादिस्थैर्गगनगतिभिर्भूर्भुवःस्वःप्रवृत्तिः

रचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां गोधूलिकाध्यायो नवमः ९ अथ विवाहमास गोचरविचाराध्यायो व्याख्यायते तत्रादौ सौर चांद्रमास
योर्विचारमाह मंदाक्रांता यस्मात्कारणाच्चैत्रे मासि शुक्लप्रतिपदि तिथौ रवेर्वासरे सर्वैर्गगनगतिभिः रव्यादिग्रहैः मेषादौ स्थितैर्भूर्भुवःस्वःप्रवृत्तिः आसीत्
भूर्भुवःस्वरित्यव्ययानि क्रमेण लोकत्रयवाचकानि तथा चोक्तं भूर्लोकाख्यो दक्षिणव्यक्तदेशात्तस्मात्सौम्यो यं भुवःस्वश्च मेरुः इति अतः पृथिवीसतल्लोकत्र
याधिष्ठितानां लोकानां प्रवृत्तिः प्रथमनिर्माणं सृष्टा भवत् कंकमलोद्भवेनेति लंकानगर्यामुदयाच्च भानोरिति च पठितं तस्यां मासे मृगमुखगते मकरा
दिस्थिते भास्वति भास्करे नामात् तस्मात्कारणात्परिणयविधौ इदं मासस्थाद्द मासः श्रेयानश्चष्टुत्क्तः अयं भावः लंकायां क्षितिजगतयोर्मेषादिस्थिते चंद्रार्के

टी·
४५

योः किल लोकत्रयस्य युगपत्प्रवृत्तिः तत्र चंद्रार्कयोः समकलत्वाच्चांद्रमसादिः मुख्यं वर्षमेषगतार्कत्वात्स एव चैत्रमासः तदानीमादित्यस्यैव होरा अतोर्कवारः इत्यादिमर्वपाणे मकरादिस्थितेर्के न घटते यतः सौरवर्षमासादेः प्रवृत्तिः संहिताकारैर्मकरादेरेव स्वीकृता उक्तं च मृगादिराशिद्वयभानुभोगादिति अतश्चंद्रस्य वमुख्यत्वमिति ग्रंथकारोक्तिः नैतच्चतुरस्रं प्रवृत्तिकाले मेषादिगतार्कत्वात्सौरमासस्यापि प्रवृत्तेः साफल्यकीर्तनायैव वास्तवं तु मेषादेरेव ग्रहगणिते प्रसिद्धा तथा चोक्तं दिनं सुराणामयनं यदुत्तरमित्यादि किं च प्रवृत्तिकाले चांद्रदिनं वर्षादेरपि प्रवृत्तेस्तस्यादिमुख्यत्वं कथं न वक्तव्यं तस्मादनया युक्त्या चांद्रमासस्य श्रेष्ठत्वं वक्तुमनर्हं किंतु युक्त्यंतरं संहितागमबलात्तदुच्यते नक्षत्रेण युक्तः कालः सास्मिन्पौर्णमासीति संज्ञायामिति च पाणिनेरनुशासनात्पौषीत्यादिसंज्ञा

एवं पौषे मृगमुखवृते भास्वति स्यान्न चासावुक्तः श्रेयान्परिणयविधावेंदुमासोस्ति तस्मात् १ नेष्टः पौषो मृगयुजि रवौ वाहृतश्चेत्प्रवीणैश्चारुश्चैत्रोप्यजसहचरे भास्करे सुंदरीणां॥

सौरादौ नोपपद्यते तस्माच्चांद्रमास एव मुख्यः इति अत एवाहनारदोपि यस्मिन्मासे पौर्णमासी येन धिष्ण्येन संयुता तन्नक्षत्राह्वयो मासः पौर्णमासी तदाह्वया तत्पक्षौ शुक्लकृष्णाख्यौ देवपित्र्यौ च तावुभाविति अभिधानं च पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभाविति अत एव सिद्धांतेप्युक्तं मासास्तु याचतिथयस्तु हि नांशमानात् इति अतः सौरादौ मासप्रयोगो गौणवृत्त्या योजनीय इत्यस्मात्कं सिद्धांतः तर्हि रवेरवैसारणा उत्तरायणमिति विवाहे सौरमासाः कथमुक्ताः नाषाढप्रभृति चतुष्टये विवाह इत्यनेन चांद्रमासा ग्रंथांतरे उक्ताः अनयोर्विरोधे सति सयुक्तिकं निर्णयं वक्तुं पूर्वपक्षमाह मंदाक्रांता सुंदरीणामुपयामे विवाहे मृगयुजि मकरगते रवौ पौषो नेष्टः मकरगतार्कस्य शुभत्वेपि अशुभपौषयोगात्स नेष्ट इति भावः ननु विपरीतं कुतो न स्यादित्यत्राह आहृत इति प्रवीणैः पंडितमन्यैः मृगयुजि रवौ पौषश्चेदाहृतः स्वीकृतः मकरार्कस्य शुभता

राम:
४५

ननदा चैत्रोपि अजमहचरे मेषगते भास्करे सति चारुः शुभः स्यात् नचैवमस्ति किंच अस्य प्रसिद्धस्य फाल्गुनस्य माहव्याघैः स्मृत शुभफलस्य प्रसंगाद्यो
गात् मीनो मीनमता र्कोपि अविकृतफलः किं न स्यात् अपितु अविकृतफल एव नविकृतं फलं यस्यासौ तथा यथावत्फल एवेत्यर्थः शुभस्यापि फाल्गुनस्य यो
गात् दुष्टोपि मीनो दुष्टफल एवेति भावः नचाप्येवमस्ति एवं सौरप्राधान्यं स्वीकर्तुरनिष्टद्वयं २ एवं सति सिद्धांतमाह उपजातिका यदि फाल्गुने झषो मीनग
तार्कस्तदा न निंद्यः चांद्रस्य मुख्यत्वात् एतत्प्रसंगेन व्रतबंधेपि निर्णयमाह मेषइति मेषो मेषगतार्कस्तु यदि वैशाखगतस्तदा न निंद्यः मेषेर्के च व्रतं न ह्यो शु
ने शुभस्यापि मेषस्य शुभवैशाखयोगाच्छुभत्वमिति भावः प्रकृतमाह मध्याश्रितेति मध्याश्रितौ चैत्रमासगतौ ह्यौ मीनमेषगतार्कौ वपि वर्जनीयौ चैत्रस

मां द्व्याद्यैः स्मृत शुभफलस्यास्य किं नोपयामे मीनोपि स्याद्विकृतः फलः फाल्गुनस्य प्रसंगात् २ झषो न निंद्यो यदि फा
ल्गुने स्यादजस्तु वैशाखगतो न निंद्यः मध्याश्रितौ द्वावपि वर्जनीयावित्यादिवाचा मियमेव मुक्तिः ३ प्रायः सौरमानमिष्टं
विवाहे तत्किं चांद्रे मासमाहुः फलेन यस्मात्सम्यक्कृतफलाप्तिस्तु द्वैक्ये सौरो मासः केवलः किंचिदूनः ४॥

दुष्टत्वात् मीनस्तु स्वरूप
तएवाशुभः मेषस्तु चैत्रयोगादिति चांद्रस्य मुख्यत्वादिति सर्वत्र हेतुः इत्यादिवाचां द्व्यादिवसिष्ठाणां युक्तिरियमेव इत्यादिकमुक्तवतां युक्तिरियमुक्तेवे
त्यर्थः यदि हि चांद्र मुख्यत्वं तदाष्टयक्सौरमानं कथमुक्तमित्याशंक्याह ३ शालिनी यदि प्रायो बाहुल्येन सौरमानं विवाहे स्वीकृतं तत्तदा फलेन चांद्रमासं
किमाहुः शौनकादयः धनमानपरिभ्रष्टा चैत्रे चाद्यप्रमैथुनात्वसतीत्यादिना यस्मादेतौ सौरचांद्रमासौ विवाहे उक्तौ तस्मात्तदैक्ये तयोः सौरचांद्रमास
योरैक्ये सति फलाप्तिः सम्यक् परिपूर्णा स्यात् केवलः सौरमासः चांद्रापेक्षया किंचिदूनः चांद्रस्य मुख्यत्वादित्यर्थः ४ एवं सौरचांद्रयोर्बलाबलमुक्त्वा

गोचराष्टकवर्गयोर्बलाबलमाह रयोद्वतानि ३ योषितां स्त्रीणां गुरुपतंगयोः गुरुसूर्ययोः गोचरे शोभने सति गोचरविधिना गुरुबले रविबले च सतीत्यर्थः
करग्रहः शुभकरः स्यात् तदत्यये तस्य गोचरबलस्यात्यये अलाभे सति अष्टवर्गविधिना गुरुपतंगबले सति मनांतरमाह सूर्यशुद्धिमिति अपरे नृणां
पुरुषाणां सूर्यशुद्धिं जगुः न तु गुरुशुद्धिं गोचरविधिना तदलाभे अष्टवर्गविधिनेति उक्तं च प्राक् भानुरथ पंचयेति पुरुषाणां गुरुशुद्धिस्तु व्रतबंध एव अ
तो न विवाहे शूद्रादीनां तु व्रतबंधाभावाद्विवाह एव गुरुशुद्धिः सूर्यशुद्धिश्चेति ५ नन्वत्र गोचरस्य कथं मुख्यत्वं तत्राह जातके अष्टकवर्गफलमेवास्ति त
त्र पश्चंद्रराशिफलं तदेव गोचरफलं संहितासु पठितं अतोस्य अष्टवर्गफलस्य परिणये तिमुख्यता किं न स्यात् गोचरफलं ह्येकस्माच्चंद्रराशेरेव अष्टवर्ग

योषितां गुरुपतंगगोचरे शोभने शुभकरः करग्रहः अष्टवर्गविधिना तदत्यये सूर्यशुद्धिमपरे नृणां जगुः ५ अष्टवर्गफ
लमेव जातके नास्य किं परिणयेपि मुख्यता सत्यमुद्वहनजन्मशास्त्रयोरन्यता मुनिभिरेव संस्मरे ६ क्रूरमष्टमम
रिष्टमिष्टदं सप्तमं शुभमुशंति जन्मनि॥

फलं त्वष्टराशिभ्यः अतोस्याधिक्यात् परिणयेपि तत्प्राधान्यं कथं न स्यादिति भावः एतदर्धं गीका
रेण परिहरति सत्यमिति जातके अष्टवर्गफलं मुख्यमिति मन्यामहे परिणयेपि मुख्यतेति न सहामहे इति कथं उद्वहनजन्मशास्त्रयोः विवाहशास्त्रज
न्मशास्त्रयोरन्यता अन्यत्वं मुनिभिरेव संस्मरे स्मृता विवाहशास्त्रस्य जन्मशास्त्रस्य च भेदो मुनिभिरेव स्मृत इति ६ अत्रोदाहरणमाह जन्मनि जन्मकाले
अष्टमं क्रूरमरिष्टम शुभमुशंति सप्तमं शुभग्रहं इष्टदं शुभप्रदमुशंति कांक्षंति मुनयः उद्वहने तु रीतिर्विवाहमार्गे न भवति तथाहि जन्मकालेष्टमः क्रूर रामः
ग्रहोशुभः विवाहे तु शुभः जन्मकाले सप्तमः शुभग्रहः शुभः विवाहे त्वशुभः अतो नयोः — — शास्त्रयोरन्यथात्वं इति हेतोरत्र विवाहे सो गोचरपथो गोचर ४६

मार्गः रथोद्धतः रथैरुद्धतः अतिघृष्टः अस्यमार्गेम्लेषः गोचर मार्गः पारं पर्यागतः स्फुट इत्यर्थः रथोद्धत इति छंदसोपिनामसूचितं ७ इतिश्रीसकलागमा चार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशदैवज्ञविरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायांमासगोचरविचाराध्यायोदशमः १० अथप्राति स्विकंभावफलमुक्त्वायोगजमाह शालिनी चक्रस्यप्राचि अर्द्धे पश्चार्द्धे क्रमेण क्रूराक्रूरैः कृत्वा चक्रमिति योगमामनंति मुनयः एतदुक्तं भवति दशमभा वभागानारभ्य चतुर्थभावभागपर्यंतं चक्रस्य पूर्वार्द्धं चतुर्थभावभागानारभ्य दशमभावभागपर्यंतं पश्चिमार्द्धं तत्र चक्रस्य पूर्वार्धे यदा क्रूराग्रहाः पश्चिमा र्धे सौम्यास्तदा चक्रंनामयोगः स्यादिति अस्य फलमाह अत्रेति अत्र योगे ऊढायाः परिणीतायाः सुभ्रुवः सुष्टुभ्रुवौ यस्याः सा सुभ्रूः तस्या योषितश्चित्तवृत्तिः

नेयमुद्वहनरीतिनित्यसावत्रगोचरपथोरथोद्धतः ७ इतिविवाहवृंदावनेमासगोचरविचाराध्यायोदशमः १०
अथग्रहयोगाध्यायः चक्रस्यार्धेप्राचिपश्चात्क्रमेणक्रूराक्रूरैश्चक्रमित्यामनंति अत्रोढायाःसुभ्रुवःस्वैरिणी
त्वेभ्राम्यत्युच्चैश्चक्रवच्चित्तवृत्तिः १ तनुनिमीलनगैश्वशुभाशुभैर्ध्वजइतीहकृतोद्वहनावधूः ॥ ॥ ॥

मनोवृत्तिः स्वैरिणीत्वेपौंश्चल्यविषयेचक्रवदुच्चैर्भ्राम्यति चतुर्थेस्वैरिणीप्रोक्तापंचमेबंधकीस्मृतेतिस्मृतिः चतुर्थेचतुर्थपुरुषोपभोगेपौंश्चल्यविषयेत स्यामनोवृत्तिरितितरांचक्रवद्भ्रमतीत्यर्थः अयंसर्वग्रहकृतोयोगः १ द्रुतविलंबितानितनुर्लग्नंनिमीलनमष्टमंतत्रगतैःक्रमेणाशुभाशुभैःलग्नस्थैःशुभै रष्टमस्थैःपापग्रहैरित्यर्थः अयंध्वजइतियोगः इहास्मिन्योगेकृतोद्वहनावधूःसगुणलाभवतीभवतिकृतमुद्वहनंयस्याःसातथागुणैःसहवर्तमानःसगुणः सचासौलाभश्चसोस्यास्तीतिसगुणलाभवतीपुनः कथं भूतावृत्तिभिः स्वभावादिभिः प्रियमनोपमनोज्ञसुखविभ्रमाप्रियस्यभर्तुर्मनःप्रियमनः

वे·टी·
४७

तस्य यमनमाकर्षणं तत्रोन्मुखः विभ्रमो विलासो यस्याः सा तथा विभ्रमो भ्रांतिहावयोरिति विश्वः अखिलानि च तानि केंद्राणि च तेषां सखाय स्ते तथा ए च च
तुर्थ्यपि केंद्रेषु गतैः खलखेचरैः पापग्रहैः वापिनाम योगो भवति इहास्मिन् योगे अर्पितपुंस्करा अर्पितो दत्तः पुंसे वराय करो यया सा परिणीतेत्यर्थः युव
तिः स्त्री उज्झितकांतगृहा सती उज्झितं त्यक्तं कांतगृहं भर्तृगृहं यया सा तथा जनयितुः पितुर्गृहे कुरुतोत्सवान् कुरुते क्रतितानि रुतानि कुरुतानि कुशब्दाः तेषा
मुत्सवा आनंदाः ३ गगनं दशमं तोयं चतुर्थं तपो नवमं तेषु यथा तथास्थितैः शुभग्रहैः शंखसंज्ञं योगं भृगुमुनिर्गदति असौ योगः अशमसुखं स्खलयति प्र

सगुणलाभवतीभवतीं गिता तैः प्रियमनोयमनोन्मुखविभ्रमा २ अखिलकेंद्रसखैः खलखेचरैर्भवति वापि रिहार्पित
पुंस्करा युवतिरुज्झितकांतगृहा गृहे जनयितुः कुरुते कुरुतोत्सवान् ३ गगनतोयतपस्सु शुभैर्भृगुर्गदति शंखम
शंसवलयत्पुसो धनयशोनयशोभितनुश्रियां परिणयेन पयोरुहचक्षुषां ४ एकादशे कुजरवी रविजः सपत्नवि
तेविधुस्तपसि शेषनभश्चराश्चेत् श्रीवत्स एष सुखयत्यपि रूपरिक्तां सौभाग्यभोगभरभंगितरंगितांगी ॥ ५॥ ॥

तिवध्नाति निराकरोतीत्यर्थः केन परिणयेन कासां पयोरुहचक्षुषां पयोरुहं कमलं तद्वच्चक्षुर्यासां तास्तथा तासां स्त्रीणां कथंभूतानां धनयशोनयशो
भितनुश्रियां धनं च यशश्च नयश्च तैः शोभते सा धनयशोनयशोभिनी तनोर्वपुषः श्रीः कांतिः तनुश्रीः धनादिशोभिनी तनुश्रीर्यासां तास्तथा ४ वसंततिलका एकादशे कुजरवी सपत्ने शत्रौ षष्ठे रविजः शनिः वित्ते धने विधुः तपसि नवमे शेषनभश्चराः कुजरविशनिचंद्रव्यतिरिक्ताश्चेत्स्युः तदा श्रीवत्सोना
मयोगः एष योगः रूपेण रिक्ता रूपरिक्ता सौंदर्यहीना तामपि स्त्रियं सुखयति कथंभूता सौभाग्येति सौभाग्यस्य भोगः तस्य भरो भारः तस्य भंगिर च

राम
४७

नातयातरंगितानितरंगाः जाताः येषु तानितरंगितानि तानि अंगानियस्याः सातथा ५ शालिनी मूर्तौ लग्ने सौम्याः स्वांत्यराश्योर्द्वितीयद्वादशयोर्य
या तया असौम्याः पापाः कार्मुकं नाम योगं कुर्युः अस्मिन्योगे परिणीता कन्यका कांतवेषा सती वेश्यारामं रमीति अतिशयेन रमते इति रंरमीतिय
ऊनेलुक वेश्याः रमयतीति वेश्यारामः वेश्योपभोगी तमप्येषा अतिशयेन रमयतीति कया स्वरत्या निजोपभोगकौशलेन किं कृत्वा विषाद्यैः विषश
स्त्राद्यधनादिभिः कांतंभर्तारं हत्वा ६ सूनौ पंचमे शुक्रः दुश्चिक्ये तृतीये सांगिराः सगुरुः गौररश्मिश्चंद्रः स्तदांगनाभ्युद्गमश्चेत्स्यात् अंगनाया अभ्यु
द्गमोभ्युदयः विवाह इतियावत् यद्वा अंगनाभ्युद्गमः कन्यालग्नं तदायं आनंदोनाम योगः तेनयोगेन सुंदरीसांद्रसौख्या सांद्रं निबिडं सौख्यं यस्याः

सौम्यामूर्तौ स्वांतराश्योरसौम्याः कुर्युर्योगं कार्मुकं कन्यकास्मिन् हत्वाकांतं कांतवेषा विषाद्यैर्वेश्यारामं रंरमीति स्व
रत्या ६ सूनौ शुक्रः सांगिरा गौररश्मिर्दुश्चिक्ये स्यादंगनाभ्युद्गमश्चेत् आनंदोयं सुंदरी सांद्रसौख्या तेनानंदं वंशयो
र्विस्तृणाति ७ व्ययरिपुहिबुकेषु वक्र शुक्र द्युमणिसुतैः क्रमशः कुठार एषः इह विहरति संहतस्ववंशा विटपटले
पटलेखिताभिसारा ८ ॥

सातथा वंशयोः पितृभर्तृवंशयोरानंदं विस्तृणाति विस्तारयति णिजंतर्भावः ७ पुष्पिताग्राणि ३ व्ययोद्वाद
शः रिपुः षष्ठः हिबुकं चतुर्थं एषु वक्रो भौमः शुक्रः प्रसिद्धः द्युमणिसुतः शनिः एभिः क्रमशः स्थितैः एष कुठारो नाम योगः स्यात् इहास्मिन्कुठारे योगे
परिणीता विटपले भंडसमूहे विहरति क्रीडते कथंभूता संहतो मारितः स्ववंशो यया सा तथा पटे वस्त्रांचले लेखितः अभिसारो यस्याः सातथा
असंशयमतिसारिणीत्यर्थः नरभोगार्थिनी पाति [illegible] नास्ति यद्वा अभिचारेतिपाठः अभिचारो व्यभिचारो तत्पाठे व्यभि

स·टी· चारिणीत्यर्थः ८ रविः सूर्यः कविः शुक्रः रविजः शनिरिंदुश्चंद्रः एभिर्ग्रहैर्व्ययो द्वादशं धनं द्वितीयं षष्ठं षष्ठं निधनमष्टमं एषु यथाक्रमं स्थितैः एषः कूर्मो नाम
५८ योगः इहास्मिन्योगे विहितः कृतः करग्रहो यस्याः सा तया परःशतानि गृहाणि भ्रमति शतेभ्यः पराणि परःशतानि पारस्करादित्वात्सुट् यद्वा परःशब्दो निपा
तइति भोजराजः शतेभ्योधिकानीत्यर्थः कया हेतुभूतया भुजिष्यतया दासत्वेन भुजिष्याया भावो भुजिष्यता त्वतलोर्गुणवचनस्येति पुंवद्भावः नियो
ज्यकिंकरप्रेष्यभुजिष्यपरिचारकइत्यमरः ९ भवः एकादशं परिभवः षष्ठं विक्रमस्तृतीयं एभिः स्थानैः द्युमणिः सूर्यः महीसुतो भौमः सूर्यस्यापत्यं सौरिः
शनिः तैर्यथाक्रमं सनाथैर्युक्तैः कृत्वा दरलेंदुरर्धचंद्रोनाम योगः परिणमति परिपाकं प्राप्नोति किं करिष्यन् इंदुमुख्याश्चंद्रवदना याः स्त्रियः कुलयुग

रविकविरविजेंदुभिः क्रमेण व्ययधनषष्ठनिधनेषु कूर्म एषः इह विहितकरग्रहा गृहणी भ्रमति भुजिष्यतया परःशता
नि ९ भवपरिभवविक्रमैः क्रमेण द्युमणिमहीसुतसौरिभिः सनाथैः परिणमति दरलेंदुरिंदुमुख्याः कुलयुगलोद्धृतिधूर्यतां
विधास्यन् ११ व्ययनिधनतनूषु मंदचंद्रारुणकिरणैर्मुसलं जगुर्मुनींद्राः इह वृष्णिकुलांतके कुमारी कुलमारी न च कापि
कार्यसिद्धिः ११

लोद्धृतिधूर्यतां विधास्यन् करिष्यन् कुलयुगलं पितृकुलं भर्तृकुलं चेति तस्योद्धृतिरुद्धरणं धुरं वहतीत्यर्थः औपच्छंदसिकं १० व्ययो ८
द्वादशं निधनमष्टमं तनूर्लग्नं स्त्रियां मूर्तिस्तनूस्तनुरित्यमरः तेषु यथाक्रमं मंदः शनिः चंद्रः प्रसिद्धः अरुणकिरणः सूर्यः तैः स्थितैः कृत्वा मुसलं नाम योगं मु [illegible]
नींद्रा जगुः इहास्मिन्वृष्णिकुलांतके योगे वृष्णयो यादवाः तेषां कुलं तस्यांतकं संहारकं मुसलमित्यर्थः क्रीडद्भिर्यादवैः शांबजठरे यद्दोष्ठितं मुसलं तेनैव मुस रा[illegible]
लेन यादवा विनष्टा इति भागवतादौ प्रसिद्धेः अस्मिन्नुत्पन्ने योगे कुमारी कुलमारी कुलनाशिनी भवति न च कापि कार्यसिद्धिर्भवति केवलं कुलनाशिन्येवेत्य ४[illegible]

पुष्पिताग्रं तनुर्लग्नं नवनवमं भवएकादशं तेषु गतैः यथाक्रमं बुधः प्रसिद्धः विबुधार्चितो गुरुः पंगुः शनिः एभिः कृत्वा गजो नाम योगः स्यात् इहास्मिन्यो
गे युवतिः स्त्री अहंकृता हंकारं प्राप्ता सती कृतानि घ्यादिताश्च ते अर्थाश्च तान्वितरति ददातीवा इत्यर्थवा युवतिः दैवत दैवतपरा स्यात् दैवतानि च दैवे च दैवत
दैवानि तेषु तत्परा देवार्चनरता भाग्यरता चेत्यर्थः भाग्यवतीति यावत् १२ इति श्रीसकलागमाचार्यवर्यश्रीकेशवदैवज्ञसुतगणेशविरचितायां विवाहवृंदा
वनटीकायां विवाहदीपिकायां ग्रहयोगाध्यायो एकादशः ११ पूर्वमरिपराक्रमेत्यादिना साधारण्येन ग्रहफलान्युक्तानि अधुना प्रतिस्थानं तानि सविशेषा
ण्याह तत्रादौ लग्नस्य ग्रहाणां फलानि शिखरिणी मूर्तौ लग्ने स्थितो जीवः मृगदृशं स्त्रियं चिरंजीवां सृजति चिरंजीवतीति चिरंजीवा चिरमित्यव्ययं विभक्तिप्र

तनुनवभवगैः क्रमेण योगो बुधविबुधार्चितपंगुभिर्गजः स्यात् इह युवतिरहंकृता कृतार्थान्वितरति दैवतदैवतत्परा वा १२
इति विवाहवृंदावने ग्रहयोगाध्यायो एकादशः ११ अथ ग्रहाणां भावकुंडलिकाध्यायः चिरंजीवां जीवः कविरविरलान
गसुभगां शशांकोर्वीपुत्रो यमयुवतिपार्श्वप्रणयिनीं बुधो भर्तुर्भक्तां मृगदृशमशीलां शनिरपि त्रयो मूर्तिर्मूर्तौ सृजति शि
खिशस्त्रादिनिधनं १

तिरूपकं कविः शुक्रः अविरलानंगसुभगां सृजति अविरलो निविडश्चासौ अनंगश्च अनंगो मदनः तेन सुभगा सौभाग्यवती श
शांकश्चंद्रः उर्वीपुत्रो भौमस्तौ यमयुवति पार्श्वप्रणयिनीं सृजतः यमस्य युवतिः तस्याः पार्श्वं सामीप्यं तत्र प्रणयः प्रीतिरस्ति अस्याः सा तथा तां यमलोककां
क्षिणीमित्यर्थः बुधो भर्तुः भक्तां सृजति शनिरपि अशीलां दुष्टशीलां त्रयो मूर्तिः सूर्यः शिखि अग्निः शस्त्रं प्रसिद्धं ते आदिर्येषां तानि शिखिशस्त्रादीनि तेभ्यो
निधनं यस्याः सा तथा तां १ अथ धनभावस्पष्टीकरणं धने द्वितीयभावे स्थिताः सितसितांशुगोमेदुज्ञाः नितांतधनिनीं जनयंति सितः शुक्रः सितांशुश्चंद्रः

जीवोगुरुः इंदुजोवुधः नितांतं धनं तदस्त्यस्याः सा तया धरानंदनो भौमः रुजा रोगः दहनः दस्युभिर्विधुरितां जनयति रुजो रोगः दापं चैव हलं तानामितिरापत् दहनो ग्निर्दस्यवश्चौराः सर्पादयो वा विधुरा वियुक्ता भर्तृहीना तस्या भावो विधुरता वैधव्यं पुंस्त्वं पूर्ववत् अर्कात्मजः शनिः सुतेषु पुत्रेष्वपि विषयमितं पचां मलिनमूर्तिं गे नयति मितं पच्यामीति मितंपचा कृपणा मितं नखे चेतिखशखि त्वान्मुम् मलिना मूर्तिर्यस्याः सा तया द्युतीनां पतिः सूर्यः सहजदुर्भगां जनयति सहजातं सहजं स्व भाविकं तनूदुर्भगां अदैवं यस्याः सा तया पद्मा सहजे सोदरविषये दुर्भगा यस्याः सा तथा २ अथ तृतीयस्य द्रुतविलंबितं सहजे तृतीयभावे इनशनी रविशनी वधूं स

नितांतधननीं धने सितसितांशुजीवेंदुजा रुजादहनदस्युभिर्विधुरितां धरानंदनः सुतेष्वपि मितंपचां मलिनमूर्तिमर्कात्म जः स्त्रियं सहजदुर्भगां जनयति द्युतीनां पतिः २ इनशनी सहजस्थधनावधूं तनुधनां सचिवः सुभगां शशी सुकृतिनीं कु रुतः कुजसोमजौ नयति देवरिदेवरि पूपनी ३ हरि द्वारविर वनीसुतो वरांगव्याघातगुरुभृगुजेंदुजाः प्रभुत्वबाल्येन्वाः प्रियवियुतिशनिस्तनां भः शून्यत्वं सृजति सुखे सुवासिनी नो ४

धनां धनसहितां कुरुतः सचिवः शक्रसचिवो बृहस्पतिः तनुधनांकरो ति तनुकृशं धनं यस्याः सा तथा शशी चंद्रः सुभगां सुष्टुभगो भाग्यं यस्याः सा तया कुजसोमजौ भौमबुधौ सुकृतिनीं कुरुतः सुकृतं पुण्यं तदस्त्यस्याः सा तया देवरिपूपतीः शुक्रः देवरि देवरेन यतिप्रा पयति देवरगामिनीत्यर्थः देवानां रिपवो दैत्याः तानुपनयते सो देवरिपूपनीः दैत्यगुरुः देवृ इति ऋका रांतः समौतुदेवृदेवरावित्यभिधानात् ३ अथ चतुर्थस्य प्रहर्षिणी सुखे चतुर्थभावे रविः दारिद्र्यं सृजति अवनीसुतो भौमः वरांगव्याघातं वरांगं शि रः तस्य व्याघातो भंगः गुरुभृगुजेंदुजाः प्रभुत्वं सृजंति गुरुर्बृहस्पतिः भृगुजः शुक्रः इंदुजो बुधः प्रभुत्वं स्वामित्वं अब्जश्चंद्रमाः बाल्ये बालत्वेपि यवि

युतिं भर्तृवियोगं शनिः स्तनांभः शून्यत्वं स्तनयोरंभः स्तनांभः स्तन्यदुग्धं तस्य शून्यत्वं अभावे सृजति कासां सुवासिनीनां प्रौढांगनानां चिरंटीत्तु सुवासि-
नीत्यमरः ४ अथ पंचमस्य प्रहर्षिणी असुराश्च सुराश्च असुरसुराः ते षामि ज्यो शुक्रगुरू सोमपुत्रो बुध एतेषु तस्याः पंचमभावस्थिताः कुमारी सत्पुत्रां
सृजेयुः क्रूरयुः रविः पुत्रारिं सृजेत् पुत्राणां अरिः पुत्रघातिनी हि जेंद्रः श्वं द्रो सुतप्रजां सुतेभ्यो न्या असुता सा प्रजायस्याः सा तथा कन्या प्रसूः अवनिसुतो भौ-
मः शोकार्ता शोकेन ऋता पीडिता शनिः इनस्यापत्यं शनिः संताने संततिविषये सततं नित्यं रुक् रोगो यस्याः सा तथा तां सृजेत् ५ अथ षष्ठे पृथ्वीवृत्तं

सत्पुत्रामसुरसुरेज्यसोमपुत्राः पुत्रारिं रविरसुतप्रजा हि जेंद्रः शोकार्तामवनिसुतः सुतस्य रेनिः संताने सततरुजं सृ-
जेत्कुमारी ५ विधुर्निधनमिंदुजः परभयं जयं भानुमान्कुजः कुशलमर्कभूर्विगतवैरतां वैरगः रिपुलमुशना सहंस-
हचरेण चारुभ्रुवां व्यनक्ति वचसां पतिः पतिमजातशत्रुश्रुतिं ६ बुधो वंध्यामिंदुः परिचितसपत्नीपरिभवं गलद्व-
र्भं पंगुः परनररतां दानवगुरुः अवीरामस्तेकीं गुरुहरमरसेवाव्यसनिनीं विवाहे माहेयः स्त्रियमतिरजस्कां जनयति ७

वैरिः षष्ठभावगः विधुः चारुभ्रुवां चारवो भ्रुवो यासां ताः तासां स्त्रीणां निधने व्यनक्ति प्रकटयति ददातीत्यर्थः इंदुजो बुधः परभयं शत्रुभयं भानुमा-
न् भानवो रश्मयः संत्यस्या सौ तथा सूर्यः जयं कुजो भौमः कुशलं क्षेमं अर्कोद्भवतीत्यर्कभूः शनिर्विगतवैरतां विगतं वैरं यस्याः सा विगतवैरा तस्या
भावो विगतवैरता प्राग्वत्तु स्त्वं उशना शुक्रः सहचरेण भर्त्रा समं साहं रिपुलं शत्रुत्वं सहचरतीति सहचराः वचसां पतिर्बृहस्पतिः भर्त्तारं अजातशत्रु-
श्रुतिं व्यनक्ति शत्रूणां श्रुतिः श्रवणं अजाता शत्रुश्रुतिर्यस्या सौ [illegible] थः ६ अथ सप्तमे शिखरिणी विवाहे विवाहकाले

अस्ते सप्तमभावे स्थितो बुधः स्त्रियं वंध्यां जनयति इंदुश्चंद्रः परिचितसपत्नीपरिभवां सपत्न्याः संबंधी परिभवः पराभवः सपत्नीपरिभवः परिचितः परिदृष्टः सपत्नीपरिभवो यस्याः सा तथा पंगुः शनिः गलद्गर्भां गलतः स्रवंतः गर्भा यस्याः सा तथा दानवगुरुः शुक्रः परनररतां परपुरुषगामिनीं अर्कः सूर्यः अवीरां नास्ति वीरो भर्ता यस्याः सा तथा गुरुः अमरसेवाव्यसनिनीं अमरसेवायां व्यसनं विद्यते यस्याः सा तथा माहेयो भौमः अतिरजस्कां जनयति अतिशयितं रजो यस्याः सा तथा प्रदरव्याधियुक्तामित्यर्थः ७ अथाष्टमे मालिनी मृत्युवेश्मनि अष्टमभावे सितसितकिरणेज्या द्रुहिणग्रहमुखीनां स्त्रीणां मरणाय भवंति सितशुक्रः सितकरणश्चंद्रः ईज्यो गुरुः द्रुहिणो ब्रह्मा तस्य ग्रहं पद्मं तद्वन्मुखं यासां तास्तथा सूर्यसौरी शनिः शनी अनवरतसुखायुः संपदे भवतः सुखं च

सितसितकिरणेज्या — — मृत्यवे मृत्युवेश्मन्यनवरतसुखायुःसंपदे सूर्यसौरी भवति पतिशरीरद्रोहकृद्रौहिणेयो द्रुहिणग्रहमुखीनां यस्मणे शोणिजन्मा ८ शशिसुतगुरुशुक्राः सांद्रसौभाग्यलीलां सरलहसितकांतस्वांतकेलिकुमारीं रविरविसुतवक्राः कैतवाक्रांतशीलां तपसि तुहिनरश्मिः स्त्रीसवित्रीं करोति ९॥

आयुश्च संपच्च सुखायुःसंपत् द्वंद्वे कलं क्लीबत्वं च अनवरतमतंद्रितं च तत्सुखायुःसंपत् तस्यै रोहिण्या अपत्यं रौहिणेयो बुधः पतिशरीरद्रोहकृत् स्यात् पत्युः शरीरं तस्य द्रोहः अपघातः तं करोतीति तथा शोणिजन्मा भौमः यस्मणे व्याधये भवेत् ८ अथ नवमे मालिनी तपसि नवमभावे शशिसुतगुरुशुक्राः कुमारीं सांद्रसौभाग्यलीलां सरलहसितकांतस्वांतकेलिं कुर्वंति शशिसुतो बुधः गुरुशुक्रौ प्रसिद्धौ सांद्रं निबिडं च तत्सौभाग्यं च तस्य लीला यस्याः सा तथा सरलं ऋजु तच्च तद्धसितं च तत्तथा कांतस्य भर्तुः स्वांतं मनः कांतस्वांतं सरलहसितेन कांतस्वांते केलिः क्रीडा यस्याः संबंधेन सा तथा रविरविसुतवक्राः कैतवाक्रांतशीलां कुर्वंति रविः सूर्यो रवि

सुतः शनिः वक्रो भौमः कैतवं कपटं तेन आक्रांतं युक्तं शीलं यस्याः सा तथा तुहिनरश्मिश्चंद्रः स्त्री सवित्रीं करोति सूते सा सवित्री स्त्रीणां सनित्री कन्या प्रसः
सुतः शनिः वक्रो भौमः कैतवं कपटं तेन आक्रांतं युक्तं शीलं यस्याः सा तथा शुचिलहीना मित्यर्थः विधुश्चंद्र
१ अथ दशमे मालिनीव्योम्नि दशमभावे शनिः कन्यकां अनियमशीलां स्व यति करोति नियमेन रहितं शीलं च यस्याः सा तथा शुचिलहीनामित्यर्थः विधुश्चंद्र
अन्यकार्यैः परकर्मभिः अतिविधुरांगीं रचयति अतिशयितं विधुराणि विकलानि अंगानि यस्याः सा तथा वक्रो भौमः शाकिनी डाकिनी क्षुद्रदेवताविशेषः शाकि
नीवशाकिनी मांसभक्षिके त्यर्थः रविः सूर्य उग्रां अशीलां कोविदो बुधः कार्मणज्ञां कार्मणं क्षुद्रकर्मविशेषः तज्जानातीति तथा आर्यः शुक्रो गुरुः शुक्रो अविकृ
नीतिं शाकिनी मांसभक्षिके त्यर्थः रविः सूर्य उग्रां अशीलां कोविदो बुधः कार्मणज्ञां कार्मणं क्षुद्रकर्मविशेषः तज्जानातीति तथा अत्र मालिनीति
तसुकृतश्रीमालिनी रचयतः सुकृतं च श्रीश्च सुकृतश्रियौ पुण्यलक्ष्म्यौ अविकृते पूर्णे च ते सुकृतश्रियौ च ताभ्यां मालते शोभते सा तथा अत्र मालिनीति

शनिरनियमशीलां कन्यकामन्यकार्यैर्विधुरतिविधुरांगीं शाकिनीं व्योम्नि वक्रः रचयति रविरुग्रां कोविदः कार्मणज्ञा
मविकृतसुकृतश्रीमालिनीमार्यशुक्रौ १० स्मरादशदशशतांशुमुखाः सुखानि रत्नांबरद्रविणभागभरोन्मुखाणि पाणि
ग्रहदद्रति दीर्घदृशां ग्रहेंद्राः सर्वेऽपि सर्वभवनेष्वबला न किंचित् ११

छंदसोपि नाम सूचितं १० वसंततिलका दीर्घदृग्लोचनं यासां ता
स्तासां स्त्रीणां पाणिग्रहे स्मरादशे स्थाने दशशतांशुमुखाः दशशतानि अंशवः किरणा यस्य सो तथा सन्मुखमादिर्येषां ते सूर्यादयो ग्रहेंद्राः रत्नांबरद्रविणभोगभरो
न्मुखानि सुखानि ददति रत्नानि च अंबराणि च द्रविणं च तेषां भोगः तस्य भरो भारः तस्मात् उन्मुखानि उदितानि अथ श्लोकावशेषे सति अत्रैव ग्रहाणां भावफलेषु व
लमाशस्य माह सर्वेपीति सर्वेपि ग्रहा अबलाः स्थानादिबलहीनाः संतः सर्वभवनेषु लग्नादिसर्वभावेष्वपि किंचित् शुभं नानदद्युः अर्थादेतत्फलमुक्तं तत्सब
लानामेवेति ११ अथ व्ययेऽरुचिगतं तं व्ययद्वादशस्थितान् शुभाः शुभयुक्त शुभाः स्निग्धं च ताद्य ता र्विताः व यंति कुर्वंति संस्थामौख्य यश्च तेन कर्षिता कुशलं प्र

श्रा तांशनिः सुगरुचिंसुरा यां रुचिर्यस्याः सा तथाविधुश्चंद्रः दुर्विधांविधानंविधातुर्विधांदृष्टकर्मीकुजोभौमः अदक्षिणावयवरुजं अदक्षिणश्चासावयवश्च
तस्यरुग्रोगो यस्याः सा तथा वामांगव्याधितां रविरतिरुचिरा अतिसुंदरामपिस्त्रियं विरूपयतिविरूपां करोति रुचिरेति छंदसोपिनाम १२ अथैषांभावफलादी
नां प्राशस्त्यमाह इत्यनंतरोक्तं इदं लग्नादिभावस्थितग्रहाणां फलमशेषं समस्तमनुज्झितरेखं भवेत् नउज्झिता अनुज्झितारेखायेनतत्तथा अत्यक्तमर्यादं यथा
वद्भवतीत्यर्थः कथंभूतंमुनिजनमतं मुनिजनानां संमतं अतनुः पृथुः वितर्कोयस्यतत्तथा यद्यप्युत्तानार्थमेवदृश्यते तथाग्रहबलादिविचारवशाद्बहुवि

व्ययेशुभाः सद्व्ययकर्षितां शनिः सुगरुचिंरचयतिदुर्विधांविधुश्च अदक्षिणावयवरुजं कुजोरविर्विरूपयत्यतिरुचिरा
मपिस्त्रियं १२ इतिमुनिजनमतमतनुवितर्कंप्रतिग्रहचरखचरोद्यदुदर्कं परिविगणय्य विशेषमशेषं फलमिदमशेष
मनुज्झितरेखं १३ इतिविवाहवृंदावनेग्रहाणां भावकुंडलिकाध्यायोद्वादशः १२ अथग्रहयोगादिबलाबलाध्या
यः षष्ठत्र्यायेषु शुभाः शुभायनिधनद्यूनास्तवर्जपरेत्र्यायार्थेषु शशी मृतौ शनिरवी भंगायतत्रापरे ॥ ॥ ॥ ॥

तर्कमित्यर्थः पुनः कथंभूतंप्रतिग्रहेतिग्रहंग्रहंप्रतिप्रतिग्रहं प्रतिग्रहंचरतितेप्रतिग्रहचराः तेचतेखचराश्चतेभ्यउद्देति उद्भवतीतिप्रतिग्रहचरोचरोद्य
न् स उदर्कः उत्तरकालीनंशुभाशुभं फलंयस्मिन् तत्तथा किंकृत्वा अशेषं परिविगणय्य प्रागुक्तंसमस्तं विशेषंबलाबलेरूपं विचार्येत्यर्थः १३ इतिश्रीस
कलागमाचार्यश्रीकेशवसांवत्सरात्मजगणेशविवाहवृंदावनटीकायांविवाहदीपिकायांग्रहाणांभावकुंडलिकाध्यायोद्वादशः १२ अथोक्तभावफला
नांव्यवहारार्थमुपसंहारादिकंतथान्यदपि शुभाशुभयोगादिकंबलादिकं चनिरूपयन् ग्रहबलाध्याय मारभ्यते तत्रादौभावफलोपसंहारादिशार्दू

लविक्रोडितं षट् षष्ठं त्रयस्तृतीयं आयएकादशं एषु शुभाः पाप ग्रहाः शुभाय भवंतां शेषेष्वशुभायनिधनमष्टमं द्यूनं सप्तमं अस्तंद्वादशं एतानि वर्जे
यित्वान्येषु नवसु स्थानेषु परे सौम्यग्रहा बुधगुरुशुक्राः शुभाय भवंति शेषेषु निधनद्यूनांत्येषु अशुभाय शशी चंद्रः त्र्यायार्थेषु तृतीयैकादशद्वितीये
षु शुभाय भवेत् शेषेष्वशुभाय तत्राष्टमे सर्वेषां विशेषमाह मृताविति मृतौ अष्टमे शनिरवी शुभाय भवतः न तु शुभाय अत्र रवेरुपलक्षणात् राहुरप्यष्टमे
शुभः तत्स्वरूपांतरं केतुश्च राहुफलस्य रवेरिति देशो केः तत्राष्टमस्थाने परेन्ये चंद्र भौम बुध गुरु शुक्रा भंगाय भवंति लग्नभंगकर्तार इत्यर्थः अन्यानपि ल
ग्न भंगानाह क्रूर द्यूनेति शशितनू क्रूर द्यून वृत्तान्विते भंगाय भवतः द्यूनं वृत्तमार्त्तं ययोस्ते द्यूनवृत्ते च अन्विते च द्यूनवृत्तान्विते क्रूरेण द्यूनवृत्तान्विते ते तेन शांचं

क्रूरद्यूनवृत्तान्विते शशितनू अस्ते सितज्ञौ विधुर्लग्ने सौम्यसिताधिपाद्विषसितः सैंदुर्विनष्टांशपः १ अत्र्यकायकेंद्रगः सु
हृत्स्वसौम्य वर्गयुक् सुहृच्छुभे सितः शुभः शशी मूर्त्वमासलः २

इस्य लग्नस्य वा सप्तम क्रूराक्रांतं भवेत् यद्वा चंद्रो लग्नं वा क्रूरान्वितं भवेत्त
दा लग्नभंगः स्यादित्यर्थः अस्ते सप्तमे लग्नाच्चंद्राद्वा सितज्ञौ शुक्रबुधौ वा सोपि भंगाय लग्ने विधुश्चंद्रः भंगाय द्विषि षष्ठे सौम्य सिताधिपाः भंगाय स्युः सौम्य
श्चंद्रः सितः शुक्र अधिपाः स्वामिनः लग्नांशद्रेष्कोणानां अत्र षष्ठं लग्नादेव न तु चंद्रात् सौम्यग्रहणात् सितः शुक्रः सैंदुः सचंद्रः भंगाय शुक्रयुक्तचंद्र इत्यर्थः
अंशपो नवांशाधीशो विनष्टोस्तंगतो भंगाय स्यात् १ अथ सप्तमदशम चंद्रस्य विशेषमाह प्रमाणिकात्र्यर्थ चतुर्थकायो लग्नं ताभ्यामन्यानि अत्र्यकानि तानि
चतानि केंद्राणि च तत्र गतः सप्तमदशमग इत्यर्थः शशी शुभः स्यात् कथंभूतः सुहृत्यादि सुहृच्च स्वश्च सौम्यश्च तेषां वर्गः तेन युनक्तीति तथा सुहृद्वर्गगः स्व
वर्गगः सौम्यवर्गगा वेत्यर्थः सुहृच्च शुभश्च ताभ्यामीक्षितः सुहृद्दृष्टः शुभांशदृष्टोऽपि नवदशमासमसो मांसलः सिध्यादिभ्यश्चेति मत्वर्थीयो लः मयूरवैः कि

रणौर्मांसलः रश्मिभिः पुष्ट इत्यर्थः सप्तमदशमोपि चंद्र एवंविधः शुभः स्यादिति भावः अत्रापि अकायकोणकेंद्रेति पाठः तत्र अकायकोणकेंद्राणि चतुर्थ
सप्तमदशमनवमपंचमानि तथा च शौनकः त्रिकोणसप्तमावर्व्ययोपगो विलग्नतः हिमद्युतिः शुभः खगः शुभे सितश्च शोभन इति अव्ययस्यापि गृहीतः सतुना
रदेन महादोषेषु पठितो अतोसौ ग्रंथकृता त्यक्तः २ अथ शुभयोगानाह मालिनी तनयात इति प्रत्येकं संबध्यते शशितनयो बुधः सितः शुक्रस्ताभ्यामनुगता
भ्यां क्रमेण नंदभद्रौ योगौ स्तः बुधेन लग्नगतेन नंदः शुक्रेण भद्र इति उभाभ्यां बुधशुक्राभ्यां लग्नगताभ्यां जय इति योगः जीवे गुरौ तनुयाते जीव इति योगः
असुरसुराणां गुरू शुक्रगुरू ताभ्यां तनुयाताभ्यां स्थावर इति योगः इज्यशुक्रे बुधगुरुशुक्रैस्तनुयातैर्विजय इति योगः तमेव योगं विशुक्रं शुक्रवर्जितं

शशितनयसिताभ्यां नंदभद्रावुभाभ्यां जय इति तनुयाते जीव इत्येष जीवे असुरसुरगुरुभ्यां स्थावरो इज्यशुक्रैर्विजय
इति विशुक्रं तं तु जीमूतमाहुः ३ इति शुभफलयोगाः सप्तसप्तर्षिमुख्यैर्मुनिभिरभिहितास्ते जन्मयात्रास्वपि स्युः भज
ति युवतिरेभिर्भूपसीमंतिनीत्वं ग्रहयुतिबलयोगादुत्तराधर्यमस्मिन् ४॥

बुधगुरुभ्यां लग्नगताभ्यामित्यर्थः जीमूतं नाम योगमाहु
र्मुनयः ३ अथैषां फलमाह मालिनी इति सप्त शुभफलयोगाः सप्तर्षिमुख्यैर्मुनीन्द्रैरभिहितास्ते योगाः जन्मयात्रास्वपि स्युः न केवलं विवाहे किंतु जन्मकाले या
त्राकाले च शुभफला इत्यर्थः तत्किं शुभफल इत्याह भजतीति एभिर्योगैर्युवतिः भूपसीमंतिनीत्वं भजति भूपस्य सीमंतिनी तस्या भावस्तथा नारी सीमं
तिनी वधूरित्यमरः राजपत्नी भवतीत्यर्थः अस्मिन् शुभफले ग्रहयुतिबलयोगादुत्तराधर्यं स्यात् ग्रहाणां युतिर्योगः तत्र बलयोगः सबलत्वं तस्मात् उ
त्तरं च अधरं च उत्तराधरे तयोर्भावः उत्तराधर्यं योगकर्तृग्रहाणां बलवशाच्छुभफलस्याधिक्यं न्यूनत्वं च कल्प्यमिति भावः ४॥ ६॥ ६॥

अथाशुभयोगानाह मालिनी तनोर्गृहं तनुगृहं तेनयुनक्तीति तनुगृहयुक् तस्मिन्लग्नगतइत्यर्थः एतत्प्रत्येकं संबध्यते दिनकररुधिराभ्यां लग्नगताभ्यां क्रमेण व्यालपातालवक्त्रौ योगौ स्तः रविणा लग्नगतेन व्यालो भौमेन पातालवक्त्र इति रविपुत्रे शनौ लग्नगते क्षयइति योगः सैंहिकेये राहौ लग्नगते तमस्कमिति योगः केतौ लग्नगते अंतकइतियोगः एवं पंच तेषुयोगेषु पंकजाक्षीनारी शोकव्यसननिधनताभिः तप्यते कर्मकर्तरिरूपं निधनताभिरितिकरणं यद्वा कर्मणिरूपं तदाविधनताभिरिति कर्ता एतत्प्रत्येकं फलं ५ अथान्यदुष्टयोगद्वयमाह मालिनी तनुर्लग्नं तुहिनमरीचिश्चंद्रः तयोर्लग्नचंद्रयोः चरगृहगतयोः चरराशिस्थितयोः आधारे सप्तमी अंगनाखेट शुक्रः तस्य दृष्टौ सत्यां चरराशिस्थौ लग्नचंद्रौ शुक्रेण दृष्टाविस्यर्थः नेद्यायिनो ग्रहा अविदिशिस्थिताः संतो बलिनः स्युः त

दिनकररुधिराभ्यांव्यालपातालवक्त्रौ क्षयइतिरविपुत्रेसैंहिकेये तमस्कं तनुगृहयुजिकेतावंतकस्तेषु शोकव्यसननिधनताभिस्तप्यते पंकजाक्षी ५ तनुतुहिनमरीच्योरंगनाखेटदृष्टौ चरगृहगतयोः स्यात्कांतयुग्मं कुमार्याः अविदिशिबलिनश्चेद्यायिनो युग्मइंदावशुभदृशमुपेते कन्यकात्वन्यकाम्या ६॥

दाकुमार्याः कांतयुग्मं भर्तृद्वयं स्यात् एतदुक्तं भवति ज्ञातके प्राच्यादिषु जीवबुधावित्यादिना दिग्बलार्थं न्यासे लग्नं प्राच्यां भवति चतुर्थमुदीच्यां सप्तमं प्रतीच्यां दशमं दक्षिण इति शिष्टान्यष्टौ तन्मध्यवर्तिषु चतसृषु विदिक्षु भवंति कोणगतादिग्विदिगित्युच्यते तस्या अन्या अविदिक् सा दिगेव प्राच्यादिका तत्स्थाः स्थिताः यायिनो ग्रहाः लग्ने चतुर्थे सप्तमे दशमे चेत्यर्थः यातुशीलं येषां ते यायिनः स्यातुशीलं येषां ते स्थायिनस्त एव पौराः उभयविलक्षणा आक्रंदः ते वराहेणोक्ताः रविराक्रांदो मध्ये पौराः पूर्वेपरे स्थितो यायी पौरा बुधगुरुरविजा नित्यं शीतांशुराक्रंदः केतुकुजराहुशुक्रा यायिन इति अयं योगः शौनकेन स्पष्टमुक्तः लग्नेंदू चरराशौ केंद्रस्थायाः

चे॰टी॰ ५३ पिनो यदा बलिनः योषिद्ग्रहसंदृष्ट्या पतिद्वयं गच्छते नारीति अथ द्वितीयं योगमाह युग्मइंदाविति युग्मे समराशौ स्थिते इंदौ चंद्रे अशुभदृशं पापदृशमुपेते
प्राप्ते पापग्रहदृष्ट इत्यर्थः तदा कन्यका अन्यकाम्या स्यात् काम्यते तत्काम्यं अन्यस्य काम्यं यस्याः सा तथा परपुरुषकांक्षिणीत्यर्थः तथा च शौनकः क्रूरग्रह
संदृष्टे समसर्गे शशिनि भजति पतिमन्यं स्त्रीणामन्यत्र गते सौम्यैर्दृष्टे शुभं भवतीति ६ अथ ग्रहविशेषेण फलविशात्फलांतराण्याह उपजातिका नरग्रहैः
पुरुषग्रहैः उत्कटकांतिवीर्यैः कांतिश्च वीर्यं च उत्कटे कांतिवीर्ये येषां तैस्तथा अतिशयितप्रकाशैरतिबलैरित्यर्थः तदा नीरजलोचनानां स्त्रीणां नरो भर्ता प्रि
यः स्यात् नारी न भोगैः स्त्रीग्रहैर्बलशालिभिः बलेन शालंते शोभंते ते बलशालिनः तदा नारी नृणां चित्तहरा प्रिया स्यात् कैः स्वभोगैः निजभोगकौशलैः

नरः प्रियो नीरजलोचनानां नरग्रहैरुत्कटकांतिवीर्यैः नारी नृणां चित्तहरा स्वभोगैर्नारीग्रहैर्बलशालिभिस्तु ७ पति
रस्तपतिर्विरोचनः श्वसुरस्तत्प्रमदामदग्रहः अबलाबलिनो दिशंत्यमी सुदृशां तेषु शुभं शुभक्रमात् ॥ ८ ॥

पुरुषस्य नारी प्रिया स्यादित्यर्थः बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषा इति स्त्रीग्रहद्वित्वे सति नारी न भोगैरिति बहुत्वं कथमुपप
द्यते उच्यते शौनकीयेपि योषिद्ग्रहैरिति बहुत्वमस्ति अतोस्य पूज्यार्थत्वादित्यादिगतिश्चिंत्या किंच ७ वैतालीयं सुष्टु दृग्यासां ताः सुदृशः तासां स्त्रीणा
पतिः अस्तपतिः सप्तमाधीशः स्यात् विरोचनः सूर्यः श्वसुरः मदग्रहः शुक्रस्तस्य श्वसुरस्य प्रमदा स्त्री श्वश्रूरित्यर्थः अमी पत्यादयः खचराः अबलानि
र्बलाः बलिनः सबलाः क्रमात्सुदृशां स्त्रीणां तेषु पत्यादिषु शुभं शुभदं दिशंति ददतीति किंच ८ वैतालीयं करग्रहे पाणिग्रहसमये शशिसूर्यसुतावनीसु राम
तैः चंद्रशनिभौमैः यथा तथा वस्थितैररिनीचास्तगैः अरिः शत्रुगृहं नीचगृहं अस्तमस्तमयः तत्रगतैः अपिः समुच्चये तन्वधिपेनापि अरिनीचास्त ५३

गतेनुएवंयोगेनितंबिनीस्त्रीनिरपत्या अपत्यरहितासतीनिपतंनिश्चितंतप्यंते तापंप्राप्नोति अत्रसप्तमभवनेनिर्बलेसतीतिप्रशेषव्यं तथा च शौनकः ल
ग्नपतौरिपुभवने नीचेवा रविसुतारजनीकरैः बलरहिते चद्यूने स्त्रीणां नभवंत्यपत्यानि अथ शास्त्रविरुद्धं किंचिल्लोकेस्ति तदुपहसति ९ उपजातिकाद्
तीयस्य कवेः शुक्रस्य रेखा शुभायभवेत् लग्नस्यग्रहबलाबलोकनेगणनार्थं प्रतिग्रहमेकैकारेखाक्रियतइति ज्योतिर्विदांसंप्रदायः तत्र तृतीयः शुक्रः शुभ
इतिकृत्वा रेखाक्रियत इत्येकारीतिः नभस्योदशमस्थोभौमः लग्नंनभनक्ति लग्नभंगकर्त्तानभवेदित्यन्यारीतिः तद्वद्व्ययेद्वादशेसौरिः शनिरपिलग्नंनभन
क्तीतितृतीयारीतिः इयंरीतिः पद्धतिर्जनेषुकुतस्त्याजागर्त्तितरां इयंरीतिः सर्वथानिर्मूलालोकेषुकस्माद्धेतोर्जाता अतिप्रसिद्धास्तीति अस्मानकुत्रापिमूलंदृ

शशिसूर्यसुतावनीसुतैररिनीचास्तगतैः क्रूरग्रहे अपितन्वधिपेनतप्यतेनिरपत्यानियतंनितंबिनी ९ कवेस्तृतीयस्यशु
भायरेखा लग्नंनभस्यो ——— नभनक्तिभौमः तद्वद्व्ययेसौरिरपीतिरेभिजनेषुजागर्तितराकुतस्त्या १० उशनागुरुरिं
दुनंदनः शशिजामित्रगपापतापहृत् नवपंचमकेंद्रमित्रभप्रणयीपुष्टदृशाविधुंस्पृशन् ११

श्यत इत्यर्थः कुतोजाता कुतस्त्या अतिश
यिताजागर्तीतिजागर्तितितरां आख्यातात्तरप्आम्चतदंतमव्ययं १० अथजामित्रदोषस्यभंगमाह वैतालीयं उशनाशुक्रः गुरुर्बृहस्पतिः इंदुनंदनोबु
धः अयमेकोपिशशिजामित्रगपापतापहृत्स्यात् शशिनः जामित्रं गच्छतीतितथा सचासौपापश्चतस्यतापः अशुभं तंहरतीतितथा चंद्रात्सप्तमपापस्यदो
षहर्ताभवतीत्यर्थः कथंभूतः नवपंचमेति नवपंचानांपूरणेनवपंचमेतेचकेंद्राणिचनवपंचमकेंद्रं तच्चतन्मित्रभंच तत्रप्रणयोस्यास्तीतितथा नव
पंचमकेंद्रगतः सन्मित्रगृहस्थितइत्यर्थः अपिच पुष्टदृशाविधुंस्पृशन् पूर्णदृष्ट्याचंद्रंपश्यन्नित्यर्थः अत्रकेंद्रसप्तमविरहितंज्ञेयं अशुभत्वात् तथाचो

कं हरिजदिवसचंद्रात्सप्तमक्रूरदोषस्य कुद्दमरपूज्यः सोमपुत्रः सितो वा उदयहिबुकधर्मव्योमपुत्रालयस्थो यदि च सकलदृष्ट्या लोकयेच्छीतरश्मिमिति ११
तत्र परिपूर्णजामित्रदोषे अभंगत्वमाह वैतालीयं यदि हिमरश्मिनवांशकाच्चंद्रस्थितनवांशकात्तवलखेटः शरसायकांशके पंचपंचाशत्तमेन वमांशे भवति
अयमुपसर्गडंबरः दोषाडंबरः निबिडैः परिपूर्णैरयन्यगुणैर्न हन्यते चेज्जामित्रगोपि पापः यदि षड्गांतरे भवति तदायं दोषः केनापि गुणेन न भज्यत इत्यर्थः १२
अथैषां योगानां विचारगम्यत्वमस्तीत्याह वैतालीयं केपि केचन शरीरधारिणः संपूर्णाप्रत्यक्षदूरवद्दृश्यमाना योगानिःफलाः स्युः किंवत् शिखिदग्धबीजव
त् शिखिना वन्हिना दग्धं यद्बीजं तद्वत् यथा वन्हिदग्धं बीजं प्रत्यक्षसंपूर्णाव यवमपि कार्यक्षमं न भवेत्तद्वत्केचिद्योगाः संपूर्णाः प्रत्यक्षं दृश्यमाना

हिमरश्मिनवांशकात्तवलो यदि खेटः शरसायकांशके अयमन्यगुणैर्न हन्यते निबिडैरप्युपसर्गडंबरः १२ मोघाः शि
खिदग्धबीजवद्योगाः केपि शरीरधारिणः हढगूढफलोदयाः परे पर्णाकीर्णहुताशराशिवत् १३ इति यः प्रतिकूलकार
कग्रहभावांशनिवेशदृष्टिभिः॥

अपि मोघाः स्युरित्यर्थः निर्वलानां ग्रहाणां संपूर्णा अपि योगाः मोघाः स्युरिति भावः परे केचन योगाः हृढगूढफ
लोदयाः संहृढगूढः आच्छन्नः फलोदयः फलप्राप्तिर्येषां ते तथा किंवत् पर्णाकीर्णहुताशराशिवत् पर्णैः आकीर्णः आच्छन्नश्चासौ हुताशराशिश्च तद्वत
यथा पर्णाच्छन्नो वन्हिः प्रत्यक्षमदृश्यमानोपि स्वकार्यक्षमोस्त्येव तथा केचन योगा अपीत्यर्थः सबलानां ग्रहाणां अल्पयोगोपि परिपूर्णफलः स्यादित्य
र्थः १३ एवंविधविचारवतो दैवज्ञस्य जगत्सु पूज्यत्वं स्यादित्याह वैतालीयं स दैववित् सतां विदुषां अवतंसतां प्राप्नोति अवतंसः कर्णपूरः तस्य भाव
स्तया सतामपि वद्यः किमुतान्येषामिति स कः यः इत्युक्तप्रकारेण प्रतिकूलकारकग्रहभावांशनिवेशदृष्टिभिः कृत्वा तत्वादिफलेषु दत्तदृक् प्रतिकूलं दुष्ट

कुर्वंतिते प्रतिकूलकारकाः तेचतेग्रहाश्चभावाश्च अंशाश्चप्रतिकूलकारकग्रहभावांशास्तेषांनिवेशःस्थानंतत्रदृश्यःताभिःतन्वादीनांफलानितेषुदत्ता
दृग्येनसतथा दुष्टकारकायेग्रहाभावाश्च अंशाश्चतेषांयानिस्थानानितेषु दृष्टिंदत्वातन्वादिफलेषुचदृष्टिंदत्वातद्बलाबलंविचार्ययदादिष्टंतदन्य
थानस्यादितिकुलासदैवविल्सतांवंद्यःस्यादित्यर्थः १४ इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशविरचितायांविवाहवृंदावन
टीकायांविवाहदीपिकायांग्रहयोगादिबलाबलाध्यायस्त्रयोदशः १३ अथस्त्रीपुंसयोःसामुद्रिकलक्षणपूर्वकोमिश्राध्याय आरभ्यतेतत्रादौतत्कारण
माह उपजातिका वरःकुमारींवृणुयात् कैर्निमित्तैःयल्लिंगिबालकेत्यादिनावक्ष्यमाणैःकिंकृत्वासामुद्रिकलक्षणानिउल्लिख्यप्रकटीकृत्यसमुद्र

तन्वादिफलेषुदत्तदृक्सप्राप्नोत्यवतंसतांसतां १४ इतिविवाहवृंदावनेग्रहयोगादिबलाबलाध्यायस्त्रयोद
शः १३ अथमिश्राध्यायः उल्लिख्यसामुद्रिकलक्षणानिवरःकुमारींवृणुयान्निमित्तैः एवंकुमारीवरमप्युद
र्कंतद्व्येकधारंतिरधारिधीरैः १

णप्रणीतानिलक्षणानिसामुद्रिकलक्षणानिसामुद्रिकानि स्त्रीपुंसयोःशुभाशुभलक्षणानांमुख्यप्र
वर्तकःसमुद्रएव यथाव्याकरणस्यपाणिनिः छंदसश्चपिंगलः अतस्तानिसामुद्रिकलक्षणानीत्युच्यंतेकुमार्याः सामुद्रिकलक्षणैःप्रश्नकालेनिमित्ता
दिभिश्चशुभंज्ञात्वातांवरयेदित्यर्थः एवंवरमपिकुमारीवरयेत् वरस्यापिशुभंज्ञात्वातांवरंकुमारीवृणुयादित्यर्थः एवंचेत्तर्हिप्रागुक्तेनफलसंदर्भेण
किमित्याशंकायामाह उदर्कइतिहियस्मात्कारणादुदर्कःउत्तरकालीनंफलंधीरैर्गर्गादिभिरेकधाएकप्रकारंअरंनिश्चितंननिर्धारिनंनिर्धारितंभाविफलम
नेनैवप्रकारेणज्ञेयमितिननिश्चितइतिभावःतदेवप्रपंचमाह॥ १॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इंद्रवज्रा एवं स्वप्नादिकः फलाद्याफलमार्गः विविधोनेकप्रकारोस्ति स्वप्नो निद्राविशेषजज्ञानं नु स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यभिधाने निद्रा
स्वप्नयोरभेदो सत्यं तथाप्यवांतरविशेषाद्भेदोस्त्येव वनगहनवत् तथाहि जाग्रतिस्वप्नसुषुप्तितुरीया इत्यवस्थाचतुष्टये योगशास्त्रे प्रसिद्धं तत्र जगतः प्र
सिद्धा मनसो निरिंद्रियप्रदेशावस्थानं निद्रा सा द्विधा स्वप्नः सुषुप्तिरिति यत्र दुष्टांतःकरणजं ज्ञानमस्ति सा स्वप्न इत्युच्यते यत्र तु एतन्नास्ति सा सुषुप्तिः एतत्त्रित
यं सर्वजनानुभवसिद्धं तिसृभ्योपि लक्षणा सा तुरीया सा च योगिनामेव स्वप्नावस्थायां तद्दृष्टं ज्ञानमपि स्वप्नशब्देनोपचर्यते यथा श्रीमद्भागवते स्वप्नो निद्रानु
गोयथेति नैषधकाव्येपि न सा निशि स्वप्नगतं ददर्श तमिति अतस्तल्लक्षणमाहुर्नैयायिकाः योगजधर्मानुगृहीतस्य मनसो निरिंद्रियप्रदेशावस्थानं
निद्रा तत्र दुष्टांतःकरणजं ज्ञानं स्वप्न इति एवमत्र स्वप्नशब्देन निद्राविशेषजं ज्ञानमुच्यते तस्मात्फलादेश अयमेको मार्गः निमित्तानि क्षुतदुर्वचनादीनि

स्वप्नो निमित्तं शकुनाः स्वकर्म शरीरमागंतुकमद्भुतानि दोषाचारग्रहचारकाल काम्यानि चैवं विविधः फलाध्वा ॥ २ ॥

शकुनाः पूर्णकुंभादयः स्वकर्म निजप्राचीनकर्मविपाकः शारीरं सामुद्रिकलक्षणादि आगंतुकं भविष्यत्क्षवकं जातकादि अद्भुतानि उत्पाताः दिव्यभौमांतरि
क्षाः दोषा वातपित्तश्लेष्मादयः स्वाभाविकाः शरीरस्थाः तेषामभिचारः प्रचारः स्वरविधानादि ग्रहचारा गोचरवक्रमार्गास्तो—दयः कालः संवत्सरमासल
ग्नादिः काम्यं कांक्षितं ऐहिकं पुरुषचेष्टादि तथा च शौनकः तिथिकरणर्क्षनिशाकरविलग्नपरिकल्पनामयं गर्गः पाणिग्रहणेषु फलं वदंति यवनाः वसिष्ठ
श्च ग्रहराशिगोचरभूयं जातकविहितं च देवलः प्राह शकुनरुतज्ञाः शकुनैर्निमित्तकुशला निमित्तैश्च कर्मसमुत्थं चान्ये कुलदेशशीलस्वभावमपरे तु इच्छंत्यन्ये
न यः कालविशेषाद्विशेषफलमिति एवं स्वप्नादिः फलमार्गो नानाविधोस्ति अतोवरवृद्धोः सामुद्रिकलक्षणस्यारिष्टादिकमप्यस्माभिरप्युच्यत इति भा

वृःतयाचाहः जातकनिमित्तशुद्धांशुभलक्षणान्वितांकुलोद्भूतांवरयेत्तुतत्सौख्यार्थीयवीयसींकन्यकामितिवीयसींन्यूनांवयसाप्रमाणतश्च २ एवंफलमा
गोषनेकेषुसत्सुतत्समाधानमाह उपजातिका एतत्प्रागेवव्याख्यातप्रायंपूर्वजन्मनियदुपार्जितंसदसत्कर्मतत्प्राक्कर्मेत्युच्यतेद्वैवंदैवंयदैहिकंकर्मतत्प्रयत्नः
पौरुषंचोच्यते यस्मात्कर्मतस्य शोषायसंशयपोषायपुष्ट्यैच अधुनाविधीयमानंक्रियमाणंकर्मभवतीत्यन्वयःकिंवत् बीजंसलिलानलोर्वीसंस्कारव
त् सलिलंजलमनलोग्निः उर्वीभूमिःआसांसंस्कारःतद्वत् यथासद्बीजसद्भिःसलिलादिसंस्कारैःसंकृतंसदुदेतिवर्धतेच अन्यथाक्षीयते। तद्वत्प्राक्कर्मऐहिके
नसत्प्रयत्नेनवर्द्धते अन्यथाक्षीयतइति तस्मात्कारणात्सदाचारवतांश्रुतिस्मृत्यादिषुयःविहितःसदाचारस्तद्वतांपुरुषाणांसदाकदाचिदपिनहानिः

प्राक्कर्मबीजंसलिलानलोर्वीसंस्कारवत्कर्मविधीयमानं शोषायपोषायचतस्यतस्मात्सदासदाचारवतांनहानिः ३॥
फलेद्यदिप्राक्तनमेवतत्किंकृष्याद्युपायेषुपरःप्रयत्नः श्रुतिःस्मृतिश्चापिनृणांनिषेधविध्यात्मकेकर्मणिकिंनिषण्णा॥४॥

स्यात् अशुभमपिकर्मफलंसत्प्रयत्नेननिवार्यतइत्यादिकंप्रपंचितंप्राक्तनस्मात्स्वप्ननिमित्तशाकुनसामुद्रिकलक्षणादयोपिप्रयत्नलक्षणाअवश्यंविलोक
नीयाइतिसिद्धं एतदस्माभिःसप्रपंचंप्रथममेवनिरूपितं अथकेचित्प्राक्कर्मैवफलतीति मन्यमानास्तन्मतंनिरस्यति ३ विपरीताख्यानकीप्राग्भवंप्रा
क्तनंकर्मयदिप्राक्तनंकर्मैवफलेत् ननुप्रयत्नस्तदाकृषिवाणिज्यादिषूपायेषु आगमप्रकारेषुपरःप्रयत्नःकिंकथमेतेषुकृष्यादिषुप्रयत्नःकर्तव्यःयद
वश्यंभावितद्भवत्येवेतिकृत्वासर्वजनेनकृष्यादिषुनप्रवर्तितव्यंसच्चप्रवर्तते अतःप्रत्यक्षविरुद्धंतदित्यर्थः नकेवलंप्रत्यक्षविरुद्धंकिंच आगमविरु
द्धमपीत्याह श्रुतिरिति नृणांनिषेधविध्यात्मकेनिषेधविधिरूपेकर्मणि श्रुतिःस्मृतिश्चकिंनिषण्णाकथंप्रवृत्ता आत्मानंसततंगोपायेत्यादिश्रुतिः

वि॰टी॰ ५६

नरूक्षमारोहेन्न कूपमवेक्षेत न बाहुभ्यां नदीं तरेन्न संशयमभ्यापद्येतेत्यादि आश्वलायनादिकल्पानां श्रीकामः पुष्टिकामो वा ग्रहयज्ञं समाचरेदित्यादियाज्ञव
ल्क्यादिस्मृतीनां चिकित्सादिशास्त्रस्य च वैयर्थ्यप्रसंगः स्यादित्यर्थः एतदपि सप्रपंचं प्रथममेव निरूपितं अतो यदुक्तं तत्सम्यक् अथ प्रकृतं तत्र ताव
त्स्वस्यारिष्टान्याह श्लोकसप्तकेन ४ उपजातिका अमुं वरं न वृणीरन्नित्युत्तरेण सर्वत्र संबंधः अमुकं यः विधोः छायां कलंकं न आलोकयेन्न च ध्रुवं नक्षत्रमा
लां नक्षत्रमंडलं न च मातृचक्रमालोकयेत् मातृसंज्ञाः ताराविशेषास्तारा चक्रमंडलं यस्य च कर्दमादौ खंडं पदं भवति कर्दमधूलिप्रभृतिषु क्षिप्तपदस्य प्रतिरू
पं खंडं भवतीत्यर्थः यस्य कफः श्लेष्मा उदके च्युतः निष्ठ्यूतः सन् अंबुचुंबी मज्जति अंबु चुंबतीत्यंबुचुंबी जलमाक्रम्य ब्रुडतीत्यर्थः ५ यस्य च उरः उरस्थलं उ

छायां विधोर्न ध्रुवमृक्षमालामालोकयेद्यो न च मातृचक्रं खंडं पदं यस्य च कर्दमादौ कफश्च्युतो मज्जति चांबुचुंबी ५
उरः पुरः शुष्यति यस्य चार्द्रं न मांति तिस्रोंगुलयश्च वक्त्रे स्नातस्य मूर्द्धन्यपि धूमवल्ली निलीयते रिक्तमुखः खगो वा ६
नाकीर्णकर्णः शृणुयाच्च घोषं नो वा सुभुक्तोपि धृतिं निधत्ते निश्रीरकस्मात्सुतरां च सुश्रीः कृशः स्थवीयानपि योप्यकस्मात् ७

दकसेचनादिना आर्द्रं क्लिन्नं सदन्यस्माच्छरीरस्थानात् उरः पूर्वमेव शुष्यति शुष्कं भवति यस्य च वक्त्रे मुखे कनिष्ठांगुष्ठौ विहाय मध्यमास्तिस्रोंगुलयः परस्परकु
क्षिसंलग्नाः न मांति न समाविशंति अपिः वार्थे यस्य या उदकेन स्नातस्य मूर्धनि मस्तके धूमवल्ली धूमशिखा स्यात् यस्य वा मूर्धनि फलधान्यादिना रिक्तमुखः
रिक्तचंचुः खगः पक्षी न लीयते निर्विशति ६ यश्चांगुल्यादिना आकीर्णकर्णः आवृतकर्णरंध्रः सन् अंतर्वर्तिनं स्वाभाविकं घोषं न शृणुयात् यो वा सुभुक्तोपि
अतिशयेन भुक्तोपि धृतिं तृप्तिं न धत्ते अतिभुक्तः सन्नपि [illegible] [illegible] सुतरां निश्रीर्भवति शश्वन्निश्रीरप्यकस्मात्सुतरां सुश्रीर्भ

वति अपिः वार्थे निर्गताश्रीः शोभायस्यासौतथा यश्चकृशोप्यकस्मात्स्थवीयान्भवति यश्चस्थवीयानकस्मात्कृशोभवति अतिशयितस्थूलास्थवीयान् दूरेतिस्थवारेशः७ यश्च अहेतोः ज्वरादिहेतुंविना अतीव अतिशयितंतुच्छमल्पं अत्तिभक्षयश्च भस्मकादिव्याध्यादिहेतुंविना अतीव बहुभूरि अत्तिय श्चसदसत्प्रवृत्तौविषये अतीतसात्म्यः सच्चअसच्चसदसतीतत्रप्रवृत्तिः तस्यां अतीतंत्यक्तंसात्म्यंस्वाभाविकंयेनसतथा यःस्वभावेनसत्प्रवृत्तिःसन्स देरसत्प्रवृत्तिरित्यर्थः अपिवार्थे योवाअंगुलिक्रांतविलोचनांतःसन्चंद्रकंमेचकंनेक्षते अंगुलीभिः क्रांतौ आक्रमितौ लोचनांतौ नेत्रप्रांतौ येनसतथा मे चकवर्णोमयूरपत्रनिभः चंद्रकंखद्योताइवद्योतमानंस्वानुभवसिद्धं८ मध्येललाटस्येतिमध्येललाटं पारेमध्येषष्ठ्यावेत्यव्ययीभावः मणिबंधंधारय

अतीवतुच्छं बहु चात्ति हेतोरतीतसात्म्यः सदसत्प्रवृत्तौ अप्यंगुलिक्रांतविलोचनांतो न मेचकं चांद्रकमीक्षते यः ८ म
ध्येललाटं मणिबंधधारी न चाल्पिकां पश्यति यः कलावीं अहेतुकं यः शवगंधिगात्रः सर्वत्र सीमंतितमूर्धजो वा ९ ॥
अपिस्रवद्रोमनखः शरीरात्सद्यः स्रवद्वामविलोचनो वा निरीक्षते सत्वममानुषं वा विस्रस्तनासानयनश्रुतिर्वा ॥ १० ॥

तीति मणिबंधधारी योललाटमध्येमणिबंधंधृत्वा अल्पिकांकृशांकलावींनपश्यति तलहस्ताधस्तात्संधिर्मणिबंधः तदधोहस्तभागः कलावीस्त्रीणांकरभूष णस्थानं यश्च अहेतुकं अकारणंशवगंधिगात्रः शवस्यगंधइवगंधोयेषांतानिशवगंधीनितानिगात्राणियस्यासौतथा योवासर्वत्रसीमंतितमूर्धजःसीम ताःसजातायेषांतेसीमंतिताः तेमूर्धजाःकेशायस्यासौतथासीमंतः स्त्रीणांललाटादूर्ध्वेकेशवेशविशेषःप्रसिद्धः९ अपिवार्थे योवाशरीरात्स्रवद्रोमनखः सरंतिगलंतिरोमाणिनखानिचयस्यासौतथा योवाअमानुषंमानुषादन्यंसत्वंप्राणिनंपिशाचादिकंनिरीक्षितो योवाविस्रस्तनासानयनश्रुतिःनासानासिका

नयने नेत्रे श्रुतिः कर्णौ विस्रस्ताः शिथिलीभूताः नासा नयनं श्रुतयो यस्याः सा तथा १० इंद्रवज्रा यो वा स्वप्नमध्ये खराद्यैः गर्दभाद्यैः यानेधिकृतः आरूढो दक्षिणस्यां
दिशि आक्षिप्यमाणः प्रेर्यमाणः सन् जागर्ति प्रबुध्यति अमुं वरं आर्याज्ञातारः कुमार्याः प्रदानाय न वृणीरन् नन्वत्र कारणमाह नेदिष्टेति नेदिष्टः अतिसमीपः दिष्टां
तः प्रलयो यस्यासौ तथा अतिशयेन अंतिकः नेदिष्टः अंतिकनारद्र्योर्नेदसाधाविति नेदादेशः दिष्टांतः प्रलयो त्यय इत्यमरः आसन्नमृत्युं स वरं न वरं वृणुरित्यर्थः अथा
देवंविधां कुमारीं वरोपि ११ अथ छायालक्षणेनारिष्टज्ञानमाह इंद्रवज्रा निश्चलः स्थिरः नेत्रयोः पातो यस्यासौ तथा यः निश्चलदृष्टिः सन् क्षणं स्वस्य छायां निरी
स्यात ततः क्षणामंतरिक्षं पश्यन् तथा स्वकायं स्वदेहं शुभ्राभ्रसच्छायां न पश्येत् स नश्येन्नाशं प्राप्नोति शुभ्राणि शुभ्रमेघाः तैः समाना छाया यस्यासौ तथा समानस्य

आक्षिप्यमाणो दिशि दक्षिणस्यां जागर्ति यानेधिकृतः खराद्यैः नेदिष्टदिष्टांतममुं कुमार्या नार्याः प्रदानाय वरं वृणीरन् ११
छायां निरीक्ष्य क्षणमंतरिक्षं पश्यन्नयो निश्चलनेत्रपातः शुभ्राभ्रसच्छायमिह स्वकायं पश्येत्स नश्येद्विकृतौ विकारः १२
प्रदक्षिणावर्तशरीररोमा वृषस्वनः फेनिलमूत्रपातः नात्यल्पपार्ष्णिर्मनसा गभीरो धीरोन्नतारं भक्तश्रियशः स्त्री १३॥

मादेशः इहास्मिन् स्वकाये विकृतौ दृष्टायां सत्यां विकारः स्यात् यस्मांगस्य विकारो दृष्टस्तदंगस्य तथा विकारः स्यादित्यर्थः १२ अथ श्लोकत्रयेण पुरुषलक्षणमाह उपजा
तिका प्रदक्षिणं सव्यमावर्तः परिभ्रमो येषां तानि प्रदक्षिणावर्तानि तानि शरीररोमाणि यस्यासौ तथा वृषस्य स्वन इव स्वनः शब्दो यस्यासौ तथा फेनोस्ति यस्मिन्नसौ
फेनिलः फेनादिलच्चेति इलच् फेनिलः मूत्रस्य पातो यस्यासौ तथा न अत्यल्पः अतिलघुः पार्ष्णिः यस्यासौ तथा नाकादित्वान्नलोपः पार्ष्णिर्गुल्फयोरधःप्रदेशः तदुक्तं
घी घुटिके गुल्फौ पुमान् पार्ष्णिरधस्तयोरित्यभिधानात् मनसा गभीरो गंभीरः प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया निम्नं गभीरं गंभीरमित्यमरः धीरा निःसंदेहा उन्नता व

र्धमाना आरंभेषु कार्यारंभेषु रुचिः प्रीतिर्यस्याः सा तथा प्रशस्तं यशोऽस्याः सा यशस्वी प्रशंसा यां मन्त्रस्थैर्यविनिः १३ आख्यानकीड्क्षणे नेत्रे स्निग्धाः स
स्नेहाः ईक्षणे त्वक्कुचनखाश्च दंताश्च केशाश्च यस्याः सा तया युवा मध्यमवयस्का सुष्टुवासो यस्याः सा तया अमलिनवस्त्रः परिवीता अति संवृता चेष्टा शरीरेंगित
यस्याः सा तया व्यंजसेन रणोऽस्ति याः मुखमिव मुखं यस्याः सा स्त्रीमुखः न च स्त्रीमुखः नितरां प्रभा यस्याः सा निप्रभा शांता मूर्तिर्यस्याः सा तथा अतिकृष्णो क्षणतार
का वा न भवति ईक्षणयोः नेत्रयोः तारके ईक्षणतारके अतिकृष्णे ईक्षणतारके यस्याः सा तथा १४ उपजातिका उचितयोग्यं तस्य भावः औचित्यं तत् चरति आ
चरतीति तथा शुचिर निंदिता चारुः इंगितं परस्पर चेष्टितं तत् ज्ञानातीति तथा विशालं विस्तीर्णं हस्तौ च आननं च बाहु च वक्षश्च यस्याः सा तथा मुख्य लक्षणान्या

स्निग्धेक्षणा त्वङ्नखदंतकेशा युवा सुवासाः परिवीतचेष्टः। ः न स्त्रीमुखो निष्प्रभशांतमूर्तिर्न चातिकृष्णेक्षणतारको वा १४
औचित्यचारी शुचिरिंगितज्ञा विशालहस्ताननबाहुवक्षाः सर्वोपि सत्वाकृतिमान्कुलीनः कन्याप्रदानाय वरो नरोगी १५
श्मश्रुश्यामोन्नतोष्ठौ पृथुकरचरणाद्ध्रस्वरुग्राग्रकेशा निःशौचारोमशागी कृशकुटिलचलक्रूरसच्छद्मदृष्टिः॥ ॥ ॥

ह सर्वोपीति सर्वोपि एभिः सर्वलक्षणैः संपन्नोपि नरः सत्वाकृतिमान् कुलीनः नरोगी स्यात् सत्वस्य आकृतिर्यस्याः सा तथा सात्विक प्रकृतिरित्यर्थः कुलीनो
विख्यातसत्कुलप्रसूतः नरोगी अव्याधितः किमर्थं कन्याप्रदानाय एवं वरलक्षणान्युक्त्वा वधूलक्षणान्याह १५ स्रग्धरा श्मश्रुभिः श्यामौ श्मश्रुश्यामौ तो
उन्नतौ उच्चौ ओष्ठौ यस्याः सा तथा कासिकोटरे तिडौष् करौ च चरणौ च करचरणं पृथुकरचरणं यस्याः सा तथा पृथुहस्ता पृथुचरणा चेति रुक्षाणि अस्नि
ग्धानि अग्राणि येषां ते रुक्षाग्राः ह्रस्वा रुक्षाग्रा केशा यस्याः सा तथा [illegible] भावः शौचं निःशौचा शौचहीना रोमाणि संतियेषु ता

निरोमशा निरोमा रेः शा इति मतुवर्थे शः रोमशानि अंगानि यस्याः सा तया अंगगात्रेति ङीप् कृशा लघुः कुटिला वक्रा चलती अस्थिरा क्रूरा उग्रा सछद्मा सकपटा उपधिः छद्म कैतवइत्यमरः एवंविधा दृष्टिर्यस्याः सा कृशकुटिलचलक्रूरसकुद्मदृष्टिः वामा अप्रदक्षिणा आवर्ता रोमा यस्याः सा तया विकटं वि सदृशं नटतः नृत्यतः ते विकटनटती ते भ्रुवौ यस्मिन् तद्विकटनटद्भ्रु विशालं विस्तीर्णं उन्नतमुच्चं विकटनटद्भ्रु ललाटं यस्याः सा तथा चद्भूचलान्नङीष् विशालोन्नतललाटा विकटनटद्भ्रूश्चेत्यर्थः अंसांगुलिभ्यां कनिष्ठिकोपकनिष्ठिकाभ्यां उर्वीं भूमिं न स्पृशंती अर्थाच्चरणस्य यस्याश्चरणगते कनिष्ठिकोपकनिष्ठके भूमिं न स्पृशत इत्यर्थः अनियतमसंख्यातं बहु भूरि भुनक्तीति अनियतबहुभुक् एवंविधा गेहिनी गृहिणी देहिनी रुक् स्यात् देहो स्ति यस्याः

वामावर्ता विशालोन्नतविकटनटद्भ्रूललाटास्पृशंती नोर्वीमंसांगुलिभ्यामनियतबहुभुग्गेहिनी देहिनी रुक् १६ यास्फि
ग्ललाटोदरलंबिनी सा स्यात्कांतकांतानुजतातहंत्री नितंबिनी स्वस्वनितंबगुह्याद्दुह्यात्पतिर्दीर्घगलाकुलघ्नी ॥ १७ ॥

सा देहिनी स्त्रीः रुग्रुजा चोपतापइत्यमरः सा स्त्री मूर्तिमान् रोग एवेत्यर्थः १६ उपजातिः या नितंबिनी स्त्री स्फिग्ललाटोदरलंबिनी सा क्रमेण कांतकांतानुजतातहंत्री सा तत्स्त्रिया स्फिजौ कटिप्रोथाविव्यमरः स्फिजौ च ललाटं च उदरं च तैर्लंबते सा तथा दीर्घस्फिक् दीर्घललाटा दीर्घोदरीत्यर्थः कांतश्च कांतानुजतातौ च ते तथा कांतो भर्त्ता कांतानुजो भर्त्तृकनीयान् कांततातः श्वसुरस्तेषां क्रमेण नाशयतीति या स्वस्वनितंबगुह्या सा पतिं द्रुह्यात् विरोधयतीपश्चान्नि तंबः स्त्रीकट्या इत्यमरः ————गुह्यं योनिः स्वस्वनितंबा स्वस्वगुह्या चेति या दीर्घगला सा कुलघ्नी भर्त्तृकुलनाशिनी १७ उपजातिः या स्त्री धमनीशिरा यां अतिहृस्वा अतिकृशा सा पुरंध्री निःस्वा निर्धना भवति यस्या अतिकृशाः शिरा इत्यर्थः नाडी तु धमनिः शिरेत्यमरः दाराः स्यात्तु कुटंबिनी पुरंध्रीत्यमरः तत्र

तस्यां धमनौ या अतिशिशुः सा प्रचंडा अत्युग्रा स्यात् यस्याः शिरा अतिस्थूला दृश्यत इत्यर्थः या हसिते हास्ये सति कपोलकूपा कपोलयोर्गंडयोः कूपौ गर्तौ यस्याः सा
तथा सा अशीला दुराचारा भवति या कूर्मोदरी कूर्मसदृशजठरा सा दुःखदरी दुरात्मा भवति दुःखसदृशी बदरी दुःखदरी दुःखगुहा दुरात्मा दुष्टस्वभावा द्वाव
भान्यामन्यतरस्यामिति डाप् एवं वरवध्वोः सर्वशरीरलक्षणमुक्त्वा विशिष्टं हस्तचरणगतरेखालक्षणमाह श्लोकसप्तकेन १८ इंद्रवज्रा अंगुष्ठतले
हस्तांगुष्ठमूलाधःस्थिताभिरेखाभिः विपुलाल्पिकाभिः क्रमेण पुंस्त्रीप्रसूतिर्वाच्या यावंत्यो विपुलरेखास्तावंतः पुत्रा यावंत्यः कृशास्तावंत्यः कन्या इत्य
र्थः अमूभिः रेखाभिः अछिन्नभिन्नाभिः अछिन्नाभिः अभिन्नाभिश्च अस्याः पुंस्त्रीप्रसूतेः आयुरायुष्यं अखंडं परिपूर्णं वाच्यं तदन्याभिस्तद्विपरीताभिः

निःस्वातिह्रस्वा धमनौ पुरंध्री प्रायेण तत्रापि शिशुः प्रचंडा कपोलकूपा हसितेप्यशीला कूर्मोदरी दुःखदरी दुरात्मा १८ रे
खाभिरंगुष्ठतलेंगनानां पुंस्त्रीप्रसूतिर्विपुलाल्पिकाभिः अछिन्नभिन्नाभिरखंडमायुः खंडं तदन्याभिरमूभिरस्याः १९ ए
कातिर्यक्तर्जनीं यातिरेखा तर्जन्यंगुष्ठांतराले तदन्या ते द्वे स्यातामायुरैश्वर्यरेखे तत्सौंदर्यसुंदरत्वं तयोः स्यात् ॥२०॥

छिन्नभिन्नाभिः खंडमल्पमायुर्वाच्यं तासु रेखासु या या रेखा अछिन्नाभिन्ना तदपसंपूर्णायुः या छिन्नभिन्ना तदल्पायुरित्यर्थः १९ शालिनी एका रेखा त
र्जनीं प्रदेशिनीं प्रतितिर्यग्याति तदन्या रेखा तर्जन्यंगुष्ठयोरंतराले स्थिता द्वे क्रमेण आयुरैश्वर्यरेखे स्यातां प्रथमा आयुष्यरेखा द्वितीया सैश्वर्यरेखेत्यर्थः
तयोरेखयोः सौंदर्ये सति अरुसगंभीरेति वक्ष्यमाणसौंदर्ये सति तयोः आयुरैश्वर्यरेखयोः सुंदरत्वं चारुत्वं स्यात् २० उपजातिः या रेखा मूलात्पाणिमूला
न्निर्गता मध्यैश्वर्यरेखायाः शिखरं अग्रं तेन सार्द्धं युनक्ति योगं प्राप्नोति सा पितृवंशरेखा भवति तादृशः पितृवंशोज्ञेय इत्यर्थः सा रेखा नीरंध्रबंधा निःछिद्रा

वंधःरहिता च गृहबंधनाय भवति गृहं गृहिणी तस्या वंधनमतिप्रीतिः सा चरेखा वंहीयसी अतिशयेन वहुला वंहीयसी वंशविवर्धनाय भवति प्रियस्थिरे
स्त्यादिना बहुलस्य वंहादेशः २१ उपजातिः जीवितरेखा आयुष्यरेखा कनिष्ठिका जीवितयोर्मध्ये करभप्रदेशे स्थिताः मिथः परस्परं कांतकलत्ररेखाः स्युः पुरु
षहस्ते तावंतस्तस्य भार्याः स्त्रीहस्ते तावंतस्तस्याः कांता इत्यर्थः मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः परे उर्वरिते अस्मिन्करभे स्थिताः सा मातुर
वर्गस्य रेखाः अपत्यरीत्या तेषां संमातुरपत्यानि सांमातुराः सोदराः मातुरुत्संख्यासंभद्रपूर्वाया इत्यण् उच्चयथागुरुतत्पुत्राः कन्याश्च लक्षितास्तेषामायु
ष्य तद्वदस्मिन्जीवितरेखाया अधस्थिते करभे भ्रातरो भगिन्यश्च तेषामायुश्च लक्षणीयमितिभावः २१ अनामिकाया मूलं तस्य विभूषणमेव विभूषणं या

ऐश्वर्यरेखा शिखरेण मूलाद्धुनक्ति यासौ पितृवंशरेखा नीरंध्रबंधा गृहबंधनाय वंहीयसी वंशविवर्धनाय २१ कनिष्ठि
काजीवितरेखयोः स्यान्मध्ये मिथः कांतकलत्ररेखा अपत्यरीत्या करभे परस्मिन्भवंति सा मातुरवर्गरेखाः २२ अनामि
कामूलविभूषणाया पुण्यस्य रेखा तदवाप्तिहेतुः निःसीमसीमंतितपंचशाखा करोर्ध्वरेखा न करोति राज्यं ॥ २३॥ ॥

रेखा नित्यनपुंसकत्वात्स्त्रीविशेषणत्वेपि क्लीबत्वं अनामिकामूले उर्ध्वस्थिते इत्यर्थः सा रेखा पुण्यस्य रेखा कथंभूता तदवाप्तिहेतुः तस्य पुण्यस्य अवाप्तिः
प्राप्तिः तस्य हेतुः नित्यपुल्लिंगत्वात्स्त्रीविशेषणेपि पुल्लिंगत्वं तस्यां सत्यां पुण्यप्राप्तिरस्तीत्यर्थः निर्गता सीमा यस्याः सौ निःसीमः सीमंतितः पंचशाखो यस्मिन्नि
ति सीमंतितः पंचशाखा यस्मात्सौ पंचशाखः पाणिः निःसीमः सीमंतितः पंचशाखो यया सा तथा सा ऊर्ध्वरेखा कस्य राज्यं न करोति अपितु सर्वस्यापि राज्यं करो
तीत्यर्थः पंचशाखः शयः पाणिरित्यमरः ययोर्ध्वरेखया द्विधाकृतमिव पाणितलं भवति सा वश्यं राज्यप्रदेत्यर्थः इत्यादीनां सर्वासामपि शुभाणां रेखा साधारण्ये

न अतिशायितत्वमाह २३ विपरीताख्यानकी अरूक्षाः स्निग्धाः गंभीराः निम्ना मनोहराः सुंदराः अंतः अभ्यंतरे मधुवत्पिंगलाः न च अतिबह्व्यः न अतिसंकीर्णाः
एताहशाभिरुक्ताभीरेखाभिः पुंस्त्री फलयोः स्फुटत्वं शुभफलाधिक्यं स्यात् केषु अवाम वामेषु अंगेषु पुरुषस्य दक्षिणहस्तचरणादिषु स्त्रियां वामेष्वित्यर्थः
अथ करे चरणे वा राज्यचिन्हान्याह २४ शिखरिणी सरोजं कमलं श्रीवृक्षो बिल्ववृक्षः ध्वज केतुर्गजो हस्ती तिमिर्मत्स्यः स्तंभ कलशौ प्रसिद्धौ स्रक् माला आ
दर्शो मुकुरः छत्रमातपत्रं अंकुशः प्रसिद्धः कुलिशं वज्रं भृंगारः करकः गिरिः पर्वतः रथः प्रसिद्धः अश्वस्तुरगः श्रीवत्सो विष्णुवक्षसि रोम्णां प्रदक्षिणा

अरूक्षगंभीरमनोहराभीरेखाभिरंतर्मधुपिंगलाभिः नचातिबह्वीभिरवामवामेष्वंगेषु पुंस्त्रीफलयोः स्फुटत्वं २४ स
रोजश्रीवृक्षध्वजगजतिमिस्तंभकलशस्रजादर्शछत्राकुंशकुलिशभृंगारगिरिभिः रथाश्वश्रीवत्सव्यजनयवयूप
प्रभृतिभिर्नरा नार्यो राज्यं दधतिपदपाणिप्रणयिभिः २५ अर्चितवचनमुन्नतं मनो निर्विशेषसुखदं वपुर्दृशां अस्ति
चेदघपराङ्मुखा मतिर्लक्षणैः किमपरैर्नृयोषितां २६

वर्त्तः नदुपचारात्म दक्षिणावर्तमात्रं गृह्यते व्यजनं तालं यवो धान्यविशेषः यू
पो यज्ञस्तंभः प्रभृतिभिरित्यादिभिश्चिन्हैः पदपाणिप्रणयिभिः चरणगतैः पाणिगतैर्वा नराः पुरुषाः नार्यः स्त्रियः राज्यं दधति धारयंति एभिर्लक्षणै राज्य
प्राप्तिरित्यर्थः २५ अथ मुख्यलक्षणान्याह २ योद्धतं यदि वचनं भाषणं अर्चितं पूजितं स्यात् मनो हरमित्यर्थः मनः मानसं उन्नतं पृथुलं नाल्पविषयेमनः
प्रवृत्तिरित्यर्थः वपुः शरीरं दृशां नेत्राणां निर्विशेषसुखदं निर्विशेष अधिकं सुखं तत्प्रददातीत्यर्थः मतिर्बुद्धिः अघपराङ्मुखी पातकात्पराङ्वृत्ता तदा नृयो
षितां पुरुषाणां स्त्रियाणां वा परैर्लक्षणैः किं एषु नां किमपि न प्रयोजनमिति भावः इति सामुद्रिकलक्षणानि २६

अथनिमित्तानि तत्र वरणकाले पक्षिचेष्टितमाह उपजातिः वरस्य कन्यावरणसमये यदा वरः कन्यां वरीतुमिच्छति तस्मिन्काले यः कश्चन पुल्लिंगः पक्षी दक्षिणाचेष्टितः दक्षिणांगे कंडूयनकंपनादिभिश्चेष्टितो भवति स वरेण्यः अतिशुभः स्यात् काइव दुर्गाइव दुर्गा कृष्णचीटिका स्त्रीलिंगपक्षिषु मध्ये दुर्गापि दक्षिणचेष्टिताशुभेत्यर्थः अर्थादनयोर्वामचेष्टितमशुभमिति कुमारी नरं चेद्वृणुयात्तस्मिन्काले तयोः पुल्लिंगपक्षिदुर्गयो अदक्षिणं वामांगचेष्टितं इष्टं शुभमाहुः २७ अथ शुनश्चेष्टितमाह अनुष्टुप् यत्र कुमारी कांक्षिणी वरं वरीतुमिच्छति तत्र शुनः शुनकस्य दक्षिणांसकायदक्षिणभागे गतिरिष्टा शुभा यत्र वरः स तां कुमारीं तु वृषति वरीतुमिच्छति तत्र शुनो गतिर्दक्षिणा स्वस्य वामभागे चेत्तदा शुभा २८ अथो पश्रुतिशकुनमाह शार्दूलविक्रीडितं अक्षतैस्तंदुलैः परिपूरिते प्रस्थादि

वरस्य कन्यावरणे वरेण्यो दुर्गेव योर्दक्षिणचेष्टितश्च अदक्षिणं चेष्टितमिष्टमाहुस्तयोः कुमारी वृणुयाद्वरं चेत् २७ ॥
शुनो गतिर्दक्षिणेष्टा कुमारी यत्र कांक्षिणी अदक्षिणा यत्र तेन्त्र वरस्तां तु वृषति २८ आरोप्याक्षतपूरिते गणपतिं प्रस्था
दिपात्रे शनैः संमार्जन्यव वेष्टिते युवतयस्तिस्रः सकन्या निशि निर्यान्ति रजकादिवेश्मसु करे कृत्वा तमभ्यर्चितं यां वाचं
शृणुयुस्तद्दर्थसदृशी सिद्धिः किलोपश्रुतौ २९॥

पात्रे प्रस्थकुटपाढीनां मानपात्रे संमार्जन्या अवदेष्टिते आच्छादिते गणेशप्रतिमामारोप्य प्रक्षिप्य सकन्याः एकया कुमार्या सहितास्तिस्रो युवतयः सुवासिन्यः निशि रात्रौ रजकादीनां वस्त्रनिजकरे मद्यकारादीनां वेश्म सुगृहसमीपे शनैर्निर्याताः किंभूता एवंविधगणपतिं गंधपुष्पादिभिरर्चितं पूजितं करे हस्ते कृत्वा तस्मिन्गृहे स्थितानां मनुजानां यां वाचं यद्वचनं शृणुयुः आकर्णयेयुः तस्यार्थः अभिप्रायः तेन सदृशी सिद्धिः चिंतितकार्यस्य सिद्धिर्ज्ञेया किलेति निश्चये अत्राधिवासनमंत्रादिकं विधानमालाद्युक्तं ज्ञेयं इत्यादिलक्षणैः परीक्षितां कन्यां व

रोवरयेत्कन्यापि वरमित्युक्तं तत्र कन्यावरणनक्षत्राणि कुलधर्मानतिक्रमणं चाह २९ उपजातिः श्रुतिः श्रवणः त्रिपूर्वाः पूर्वात्रितयं वसवो धनिष्ठा व
ह्निः कृत्तिका मित्रोऽनुराधा विश्वे उत्तराषाढा अनिलः स्वाती एषु नक्षत्रेषु कुमार्या वरणं स्यात् अथ कुलधर्मः एतत् आर्याः वृद्धतमाः स्वकुलोक्तं स्वकुलपरंपराग
तानां आचरेयुः तच्चेत् सापि नावमन्येत तस्यावज्ञा मनसापि न कार्या किं पुनः साक्षात् अतस्ते कुलधर्मा अवश्यं कर्तव्या इत्यर्थः तत्राप्यागमविरुद्धाः न कार्या दे
शाचाराः कुलाचारा ये तु विध्यविरोधिन इति स्मरणात् ३० अथ वेदिकानिर्माणं तत्प्रभृतीनां कालं चाह रथोद्धता ३ वेदिकां तथा रचयेत् तथा कुर्यात् यथा इ
यं वेदिका गृहं प्रविशतः पुरुषस्य दक्षिणे भागे भवति तस्याः लक्षणभूषणादिकं नारदादिभिरुक्तं ज्ञेयं इत्यादीनां विवाहकृत्यानामारंभकालमाह स्तुरिति

श्रुतित्रिपूर्वावसुवह्निमित्रविश्वानिलर्क्षे वरणं कुमार्याः तच्चावमन्येत न चेत्तु सापि यदाचरेयुः स्वकुलोक्तमार्याः ३० वेदि
कां विरचयेद्यथा तथा यास्या दिशि यं प्रविशतश्च दक्षिणे स्रुजेनाश्रययवापि वर्णिकाः षण्णवत्रिदिवसेषु नाग्रतः ३१ कन्यको
क्तविधिवत्पुलोमजापूजनं सयुवतिः समाचरेत्

जनाश्रयो मंडपः मंडपोऽस्त्री जनाश्रय इत्यमरः यवोप्तिर्यवापः अंकुरार्पणमिति याव
त् तत्प्रकारः शौनकस्मृत्यादिषूक्तः वर्णिका लोकप्रसिद्धाः अपूपविशेषाः पद्धावर्णीकारंगवल्ल्यादयः एतदुपलक्षणं नद्दलनकंडनवारकादि गृह्यते स
तानि अग्रतः पूर्वलग्नदिनमारभ्य षण्णवत्रिषु षष्ठतृतीयनवमेषु दिवसेषु न स्युः पश्चादपि तदुद्वासनादिकं च ज्ञेयं केचित्तु नवमदिनं शुभमाहुः देशाचा
रतो व्यवस्था ३१ अथैंद्राणीपूजनादिकमाह युवतिभिः सुवासिनीभिः सहिता सा युवतिः कन्यका कन्यकोक्तविधिवत् सुभगामथैंद्रपत्नीं घरकारमृद्धां सुलक्षणा

वयवामित्यादिना शौनकाद्युक्तविधिना पुलोमजा तां पुलोमजा इंद्राणी तस्याः पूजनं समाचरेत् अयमात्रकादिपूजाद्युपलक्षणमिति मातरो द्विविधा रेव्यो

मातृपूजेति तत्र देव्यो गौरीपद्मेत्यादयो ब्राह्मी माहेश्वरीत्यादयश्च मातरः मातृमातामह्यादयश्चतुर्विंशतिमतोक्ताः तासां यत्नतः पूजादिकं कुलकर्म
शांतयः कुलोक्ताचारवशतो याः शांतयः कुलदेवताराधनादयः ता अविघ्नमातरः तनुविस्तारे निर्विघ्ननिष्पादिताः अशुभं घ्नंति नाशयंति चः समुच्चये
पुलोमजापूजनं च अशुभं हंतीत्यर्थः अतः शचीमातृकापूजादिकमवश्यं कर्तव्यमितिभावः ३२ इति श्रीसकलागमाचार्यवर्य श्रीकेशवसांवत्सरात्मज
गणेशविरचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां मिश्राध्यायश्चतुर्दशः १४ अथ वधूवरप्रश्नाध्याय आरभ्यते तत्रादौ वधूप्रश्नमाह वसंत
तिलका अस्माकमस्याः कन्याया लाभो भविष्यति न वेत्यस्मिन् प्रश्नकाले यल्लग्नं तस्माल्लग्नादिकर्माय सूत्र सहज स्मरगः दशमैकादशपंचमतृतीयसप्त

घ्नंति चाशुभमविघ्नमातरो मातृयत्नकुलकर्म शांतयेत् ३२ इति विवाहवृंदावने मिश्राध्यायश्चतुर्दशः १४ अथ
वधूवरप्रश्नाध्यायः कर्माय सूनु सहज स्मरगो मृगांकः स्त्रीपुंससंगमयिता यदि जीवदृष्टः स्वर्क्षाणि शुक्रशशि दृ
ष्टयुतानि कन्यालब्धौ वधूगृह दृक्काणनवांशका वा १

मो मृगांकश्चंद्रो जीवेन गुरुणा दृष्टस्तदा स्त्रीपुंससंगमयिता स्यात् स्त्रीपुंसेति चतुरा
दिलात्साधुः तयोः संगमं सामागमं करोतीति स्त्रीपुंससंगमयिता कन्यालाभं करोतीत्यर्थः अयं योगः कन्याया वरलाभप्रश्नेपि अविशेषात् योगांतरमाह स्व
र्क्षाणीति शुक्रशशिभ्यां दृष्टानि युतानि वा स्वर्क्षाणि लग्नं गतानि स्वराशयश्चंद्रशुक्रराशयः कर्किवृषभाः कन्यालब्ध्यै कन्यालाभाय भवंति योगां
तरमाह वधूगृहेति वधूसंज्ञाः समराशयो वृषकर्कटादयस्तेषां दृक्काणा वा नवांशका वा लग्नगताः शुक्रशशिदृष्टयुताः कन्यालब्ध्यै भवंति योगां
तरमाह १ युग्मर्क्षगो समराशिस्थितौ शशिसितौ द्विपदसंज्ञकराशि स च कन्या राशिरेव तत्रस्थितौ तनुलग्नं दृक्काणो यश्यंतौ

तदा तौ तदाप्तिपिशुनौ स्तः तस्याः कन्यायाः आप्तिः तस्याः पिशुनौ सूचकौ कन्यालाभसूचकाविसर्थः अत्र बलिनाविति शौनकीये विशेषोऽस्ति योगांतरमाह ना
रीति उदितमुदयं प्राप्तं लग्नगतमित्यर्थः उदितं नारीनवांशं स्त्रीनवांशं वृषकर्कादिकं शशिसितावीक्षमाणौ तदाप्तिपिशुनावित्यनुवृत्तिः योगांतरमाह खच
रा इति परेऽपि शुक्रशनैश्चरव्यतिरिक्ता अपि खचराः स्त्रैणर्क्षगाः समराशिस्थिताः स्त्रीणामिमानि स्त्रैणानि स्त्रीपुंसाभ्यां नञ्स्नञाविति नञ् विलसंतः स्निग्धाः
उज्वलाः प्रकाशमानाः वीर्यभाजः सबलाः उदितं नारीनवांशमीक्षमाणाः कन्याप्राप्तिसूचका इत्यनुवृत्तिः २ अथ कन्याया वरोपलब्धिप्रश्नमाह एवमनेनख
र्क्षाणि शुक्रशशीत्यादिविधिना नराः पुरुषानितंविनीनां स्त्रीणामुपनमंति समागच्छंति लब्धा भवंतीति यावत् कैः नरदृक्काणनवांशदृग्भिः पुंस्त्वे चरैः

युग्मर्क्षगौ शशिसितौ हि पदांगनांशे स्यातां तदाप्तिपिशुनौ तनुमीक्षमाणौ नारीनवांशमुदितं खचराः परेऽपि स्त्रैणर्क्षगा वि
लसदुज्वलवीर्यभाजः २ एवं नरा नरदृक्काणनवांशदृग्भिः पुंस्त्वचरैरुपनमंति नितंविनीनां यल्लिंगिबालकपशुप्रभृतीगि
तं स्यात्प्रश्नक्षणे तदुत तथैव वधूवरस्य २

नराविषमराशयो मेषमिथुनादयस्ते च ते दृक्काणनवांशाश्च नरदृक्काणाः नरनवांशा इति तान्पश्यं
तीति नरदृक्काणनवांशदृशः तैः पुंस्त्वे चरैः पुरुषग्रहैः रविभौमगुरुभिः एतदुक्तं भवति स्त्रीग्रहौ किल शशिसितौ यत्र शशिसितावुक्तौ तत्र पुंग्रहा ग्राह्याः यत्र स्त्री
दृक्काणस्तत्र नरदृक्काणः यत्र स्त्रीनवांशस्तत्र नरनवांशः यत्र स्त्रीराशिस्तत्र नरराशिरिति एवमनेन विधिना उक्तयोगैरेव कन्याया वरोपलब्धिर्ज्ञेयेति अथ नि
मित्तानि यल्लिंगीति प्रश्नक्षणे प्रश्नकाले लिंगिनः कापालिकाः बालकाः प्रसिद्धाः पशवः छागवृषतुरगादयः प्रभृतिग्रहणाद्धिमुक्तोन्मत्तादीनां ग्रहणं तेषां य
दिंगितं चेष्टितं तद्वधूवरस्य तथैव भवति उरित्यव्ययं निश्चये तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे इत्यत्र इतरेतरयोगद्वंद्वेऽप्येकत्वज्ञापकात्सर्वोऽपि द्वंद्वो विभाषयाए

कवत्स्यात् अनेोवधुवरस्येत्येकत्वं ३ अथ वधूवरप्रश्नकाले शुभाशुभयोगानाह प्रश्नेकाले उदयः प्रश्नोदयः प्रश्नोदयः प्रश्नलग्नं तस्मात्प्रश्नोदयाद्मृतरो चिषिवं इमसिषणमति स्थेषष्ठे अष्टमस्थेवासति अयमेकश्चंद्रकृतो योगः तत्रतस्मिन् चंद्रमसि मूर्तौ लग्नस्येसति अवन्याअपत्यमावनेयः भौमः कुदिकारान्निति डौषिकृते स्त्रीव्योद्कृ तास्मिन्भौमे मदनस्थराशि सप्तमस्थेवसति चः समुच्चये अयं चंद्रभौमकृतो द्वितीयो योगः तन्वस्तयोर्लग्नं सप्तमयोः अशुभसंगतयोः पापग्रहयुक्तयोः सतोः अयं पापद्वयंकृतस्तृतीयो योगः एषु योगेषु क्रमाद्सुमहीमुनिसंमितव्दे वरस्य नाशः स्यात् प्रथमेयोगे अष्टमेवर्षे द्वितीयेसकवर्षे तृतीयेसप्तमेवर्षे इत्यर्थः ४ जामित्रगौ सप्तमस्थौ विधुसितौ चंद्रशुक्रौ वधुं विधवां कुरुतः सौरिः शनिः कुजो भौमः जामित्रगः असाध्वींदुराचारां क

प्रश्नोदयाद्मृतरो चिषिषण्मृतिस्थे मूर्तौ च तत्र मदनस्थराशिचावनेये तन्वस्तयोरशुभसंगतयोर्वरस्य नाशः क्रमा
द्सुमहीमुनिसंमितव्दे ४ जामित्रगौ विधुसितौ विधवामसाध्वीं सौरिः कुजोसुरमहेज्यबुधौ धनाढ्यदीर्घायुषं वपु
षिसुप्रसवा प्रसूतौ स्त्रीजातकोक्तमखिलं खलु चिंत्यमत्र ५

रोति शौनकीये तु शनिर्मृतप्रजां भौमो मरणयुक्तामिति तथापि फलं दृष्ट मेव महाश्चासौ इज्यश्च महेज्यः असुराणां महेज्यः शुक्रः बुधः प्रसिद्धः तौ जामित्रगौ धनाढ्यां कुरुतः वपुषि लग्ने स्थितौ दीर्घायुषं कुरुतः प्रसूतौ पंचमेस्थि तौ सुप्रसवां शुभसंततिं कुरुतः कुत्रचित्सुरमहेज्येति पाठः तद्सत् यत् आह शौनकः पदिष्टकुलग्नस्थौ भृगुसौम्यौ जीविनीं कुरुतः पंचमसंस्थौ पुत्रान् जामित्रगतौ विपुलं धनमिति अस्मिन् वधूवरप्रश्नकाले स्त्रीजातकोक्तमखिलं शुभाशुभं चिंत्यं एवं कन्यावरोपलब्धिमुक्त्वा तल्लाभे सति द्लनकं नादिविवाहकृत्येषु शुभकालमाह ॥ ५ ॥ ॥ ॥ ॥

द्रुतविलंबितं दलनकंडनादिषु सकलकर्मशुभतिथिवारफलानि नक्षत्रादिफलानि परैरन्यैः पदे पदे विरचितानि पदे पदे इति लौकिकाभिप्रायेणोक्तं अल्प
कृत्येषु अपि पृथक्फलानि विशेषाभावे प्युक्तानीत्यर्थः तानि पृथक्फलानीति कारणाद्स्माभिर्नोक्तानि केचित्पराशराभावेपि भूतमात्रे लिट् मिकं तितथा च
मुग्धबोधे भवद्भूतभव्येषु क्यादयस्त्रयस्त्रिंशद् इति अत एव वराहादिप्रयोगाः होरां वराहमिहिरो रुचिरां चकारेति दृष्ट्य न सापि व्याते नेकिरणाव
लीमिति इतीति कथं हि यस्मात्कारणात् दुपक्रमस्तेषां सकलकर्मणां दलनकंडनादीनामेउपक्रमः आरंभः सविवाहभे विवाहनक्षत्रे एव शुभे दिने स्या
त्शुभे व्यतिपातविष्ट्यादि महादोषरहिते षण्णवत्रिदिवसेषु नाग्रत इति निषिद्धादन्यदिने च तथा च श्रीपतिः विवाहकृत्यं निखिलं विवाहभे विलोक्

भतिथिवारफलानि पदे पदे विरचितानि परैरिति नोचिरे सकलकर्म सुयस्तदुपक्रमः सहि विवाहभ एव शुभे दिने ६ प्रा
यो विवाहपटलं तटलंबमानस्तंबोपमं न सहते नयचालनानि वृंदावने परमतातपपीड्यमानवृंदावनेनुरमतामिह
सन्मतिश्रीः ७ इति विवाहवृंदावने वधूवरप्रश्नाध्यायः पंचदशः १५

येन्नात्र वलं हि मद्युतेः न च त्रिषष्ठोपि च वारकः शुभ इति अथ नि
जकृतस्यास्य विवाहपटलस्य पूर्वेभ्यो वैशिष्ट्यमाह ६ वसंततिलका प्रायो बाहुल्येन विवाहपटलं विवाहफलसमूहः नयेन तर्केण चालनानि न सहते
हेत्वादिना चालयितुं न शक्यते आगमसिद्धत्वादिति भावः अत्र विशेषणाद्वारेण दृष्टांतः तटेति तटे नदीनटे लंबमानः प्रशिथिलमूलो यस्तंबः स्तणस्तंबः
तेनोपमीयते तत्तथा यथा तटस्थो लंबमानस्तृणस्तंबो न चालनं सहते चारितेत्वधःपतनमेव तद्वद्विवाहपटलमपीत्यर्थः अत इदं मयोक्ते वृंदावनेनाम्नि वि
वाहपटले सन्मतिश्रीः संतां विदुषां मतिः बुद्धि तस्याः श्रीः संपद् मतां सुखेन क्रीडतां अत्र हेतुः कथंभूते परमतेति परेषां मतानि तदेवातपउष्णं तेन पीड्य

मानास्तेषां वृंदं तद्ववतिप्रीणयतीतितथा अयंभावः यथा कश्चन आतपेपीड्यमानोवनेगत्वासुखेनरमतेतद्वत्स्मरमतैः पीड्यमानोस्मिन् वृंदावनेसुखेनरमतामिति अथांतेश्रीप्रयोगः समाप्तलंकारे यथात्रग्रंथारंभे ७ इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशविरचितायांविवाहवृंदावनटीकायां वधूवरप्रस्थाध्यायः पंचदशः १५ अथस्ववंशवर्णनपूर्वकंग्रंथालंकारमाह उपजातिः भरद्वाजश्चासौमहर्षिश्चतस्य वंशेभरद्वाजगोत्रेविश्वावतंसे अवतंसः कर्णपूरः विश्वस्य अवतंसइवावतंसः तस्मिन् विश्ववंद्य इत्यर्थः जनार्दनोनामाभूत् कथंभूतः श्रुतीति श्रुतीनांवेदानांतत्वंपायार्थ्यंतद्वेत्तीतितथा औदीच्या औदीच्यजातीयजनाः तस्मिन्देशेजातयोनेकविधाः प्रसिद्धाः तेषांचारित्रंप्रचारस्तस्यपंथाः मार्गस्तंप्रवर्तयतीतितथा औदीच्या

अथविवाहवृंदावनेस्ववंशवर्णनः अभूद्भरद्वाजमहर्षिवंशेविश्वावतंसेश्रुतितत्ववेदी औदीच्यचारित्रपथप्रवर्ती
जनार्दनोयाज्ञिकचक्रवर्ती १ अस्तिश्रियादित्य इतिस्मतस्यसूनुः श्रियादित्य इतिद्वितीयः त्रिस्कंधपारंगतरंगमल्ल
स्तदात्मजोराणगइत्युदीर्यं २ श्रीकेशवः सुकविरध्ययनाध्वनीनव्यूहान् प्रतर्पयितुमर्थपयः प्रवाहैः ॥ ॥ ॥

चारमार्गप्रवर्तकइत्यर्थः अनेनस्वधर्मोपासकइतिसूचितं याज्ञिकेषुचक्रवर्तीवचक्रवर्ती श्रेष्ठतमइत्यर्थः तस्यजनार्दनस्यद्वितीयः सूनुः श्रियादित्य इत्यस्तिस्म आसीत् इति असूर्यनामेत्याह कइव श्रियादीप्त्या आदित्यइवतस्यश्रियादित्यस्य आत्मजः उदीर्यंराणगतइत्यासीत् उदीर्यते तदुदीर्यं कथनीयंतस्मिन्नाम्नीति यावत् राणगनामेत्यर्थः कथंभूतः त्रिस्कंधेतित्रिस्कंधाः होरागणितसंहिताख्याः तेषांपारंगताअशेषज्ञातारः तेषांरंगेयुद्धभूमौमल्ल इवमल्लः मल्लोबाहुयुद्धकुशलः त्रिस्कंधज्योतिःशास्त्रविदांपराभवकृदित्यर्थः ३ वसंततिलका अस्यदैवज्ञस्यराणगस्यसुतः श्रीकेशवः सुकविः शोभ

नकविरस्मिन्वृंदावनेसुतपः श्रयेमुनिगवीनिवहंदुदोहमुनयोगावइवमुनिगव्यः उपमितंव्याघ्रेतितत्पुरुषःगोरतद्धितलुकीतिदुचट्टिलात्ङीप्तासां
निवहः समूहस्तंदुदोहदुग्धवान् किमर्थं अध्ययनाध्वनीनव्यूहान् अर्थपयः प्रवाहैः प्रतर्पयितुं अध्ययनस्य अध्वा अध्ययनाध्वातमलंगामिनइत्यस्य
ध्ययनाध्वनीनाः अध्ययनमार्गज्ञानशीलाः यध्वनोयत्वावित्यलंगामीत्यर्थः खगआत्माध्वानौखेइतिअवःप्रकृतित्वंतेषांव्यूहाः समूहाःतान् अर्थ
पयइव अर्थपयः तस्य प्रवाहा ओघाः तैः सुष्ठुतपोयेषांतेसुतपसः सुपुण्याः तैः श्रीयतेसेव्यतेततया अत्रायंश्लेषः सुतपोभिःसेव्यमानेवनेअध्वगम
नेनखिन्नात्पयः प्रवाहैस्तर्पयितुंगावोदुह्यंतेतद्वत्सुपुण्यैः सेव्यमानेस्मिन्वृंदावननाम्निग्रंथेअन्यग्रंथाध्ययनेनखिन्नानर्थप्रवाहैस्तर्पयितुंमुनयो

देवज्ञगणगसुतःश्रुतपःश्रयेस्मिन्वृंदावनेमुनिगवीनिवहंदुदोह ३ अबहुदृष्टिधियः किंयदप्यदःपदगभीरमधीरभि
रंस्यते विशदशास्त्रधियात्विदमेकदाश्रुतिगतरसनासुविवृत्स्यति ४

मयादुग्धाइति तद्वचनेभ्यः सारंसंगृहीतमित्यर्थः अतएत
त्सुतेभ्यएववरोचयिष्यतिकथमत्तेभ्यइत्याशंकायामाह ३ कृतविलंबितं नबहुदृष्टंयया सा अबहुदृष्टासाधीर्यस्यासौ अबहुदृष्टधीः तस्य अल्पदृष्टशा
स्त्रस्य अदःएतदपिकियत् किंपरिमाणमस्येतिकियत् विशिष्टगुणमप्येतत्तस्य नकिंचिदितिभावः अधीरबुद्धिः ——— अभिरंस्यते अभिरामंप्रा
स्यति अत्रविशेषणद्वाराहेतुः पदेतिपदैःगभीरंगंभीरपदं अतिमंदबुद्धिस्तु अर्थंजानातुनवापदगंभीरत्वादेवाह्लादपिष्यतीत्यर्थः विशदशास्त्रधियांतु
तुर्विशेषेविशदा अत्याधिकाशास्त्रेधीर्येषांतेतथातेषांतुइदमेकवारमेवश्रुतिगतंकर्णप्राप्तंसत् रसनासुजिह्वाविवृत्स्यतेविवृद्धिंप्राप्स्यतिगौण्यरसनागतं
सद्वासकस्य कस्यापिनोच्यतेइदंकर्णपथेगतंसत्रसनासुविवृत्स्यतइतिरुच्यतिशयोक्तिः उक्तंहिभर्तृहरिणा अज्ञःसुखमाराध्यः सुखतरमाराध्यतेवि

दोषघ्नः ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रंजयति इति ४ इति ग्रंथालंकारः अत्र ग्रंथकृदुक्तयुक्तिममलां व्याख्यापसम्यक्कृतस्तत्कुत्रापि मह्यहिरोधिकृद्धविद्य
यैवृथैवोक्तितं सद्युक्त्या तु निरस्य सारमुदितं तत्सम्मतां सज्जनास्तद्धि स्यासवतां प्रतीतिरिह न स्यात्तन्निरासं विना १ पश्चात्सागरपूर्ववर्तितटगे ग्रामेऽत्र नं
द्यादि मेरभापूगरसालशीर्षनितुलच्छायावितानेवसत् नानाशास्त्रकलाकलापचतुरः श्रीकेशवोस्यात्मजष्टीकांयुक्तिमतीं गणेशविबुधो वृंदावनस्याक
रोत् ररसनगमनु १४७६ तुल्ये शाक आनंद वर्षे विवृत्तिमकृत शस्तां दीपिकाख्यां गणेशः यदिह लिखितमत्यानल्पकं वा सदोषं नदतिविमलधीभिः शो
ध्यमित्यर्थयेतान् ३ इति श्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशदैवज्ञविरचितायां विवाहवृंदावनटीकायां विवाहदीपिकायां स्ववंशवर्णनः

ध्रुवानुराधामृगमूलरेवतीकरं मघास्वातिरदूषणो गणः रवेर मीनामकरादिषड्गृही करग्रहे मंगलकृन्मृगीदृशां १ क्रूरोज्झितं द्विः
शशिभोगतोर्वाक्कृतदाप्यमाद्यं च शुभं न भं स्यात् त्र्यष्टार्कविंशं च कुजार्किभानुस्वर्भानुतः सत्रिविधाद्भुतं च २॥

षोडशोध्यायः १६ विवा
होपपदं वृंदावनं व्याख्याय कैशवं तत्कृतां लग्नशुद्धिं च गणेशो व्याचिकीर्षति १ तत्रादौ विहितनक्षत्रादिकमाह ध्रुवादिः करांतोयमेकादशानक्षत्रात्म
कोगणश्चेददूषणः वक्ष्यमाणपादवेधादिदोषरहितस्तदा मृगीदृशां स्त्रीणां करग्रहे मंगलकृत्स्यात् १ अथ श्लोकत्रयेण नक्षत्रशुद्धिमाह क्रूरेण
पापग्रहेणोज्झितं त्यक्तं भं नक्षत्रं न शुभं स्यात् तदाप्यं तेन क्रूरग्रहेण आप्यं प्राप्यं भोग्यं आद्यं युक्तं च अथ लत्ताख्य इति कुजो भौमः अर्किः शनिः भानुर
विः स्वर्भानुराहुः तेभ्यः सकाशात्क्रमेण त्र्यष्टार्कविंशं तृतीयमष्टमं द्वादशं विंशं च सत्रिविधाद्भुतं त्रिविधैर्दिव्यभौमांतरिक्षैरद्भुतैरुत्पातैः सहितं च द्विः शा
शिभोगतोर्वाक्कृतं न शुभं स्यादिति प्रत्येकं संबध्यते द्विवारं द्विः शशिभिर्दोषस्त्वत्रमपि नक्षत्रं द्विधा चंद्रभोगादर्वाक्कृतं न शुभं द्वितीये चंद्रभोगे शुभं भवतीत्यर्थः

नशुभमित्यग्रेप्यनुवर्तनीयम् २ अथ चंडायुधादिवैवैधृतः सासाध्यः हहर्षणः गंगंडः शूशूलः व्यव्यतीपातः तेषांसमाप्तिरवसानं तत्रसायंसशेषं यत
पिंषायोगानामंतेवर्तमानमिरायेः यच्च संक्रांतिसाम्यं चंद्रार्कयोस्तेनसहितं यस्मिन्नक्षत्रेमहापातइत्यर्थः यच्च खलवेधवत् पापग्रहवेधयुक्तं तमेव वेध
माहस्वाग्रेतिसवेधः स्वाशाद्येराद्यक्षरैरुपलक्षितनक्षत्राणांक्रमेणद्वयोर्मिथः स्यात् सयथा स्वास्वाती शशततारका अनयोर्मिथोवेधः स्वातिस्थेनग्रहेणश
ततारकाविद्धा शततारकास्थेनस्वातीति एवमुत्तरत्रापिश्रश्रवणः मःमघा अनयोर्मिथोवेधः भभरणी अनुअनुराधा अनयोर्मिथोवेधः अभिअभिजित्
रोरोहिणी अनयोर्मिथोवेधः पुनःपुनर्वसुः मूमूलं अनयोर्मिथोवेधः रेमृहाणां वेधः क्रमेणत्रिभिरुत्तरैः स्यात् रेवत्युत्तरफल्गुन्योः मृगोत्तराषाढयोः हस्तो

वैसाहगंशूव्यसमाप्तिसायंसंक्रांतिसाम्यं खलवेधवज्ज्ञस्वाशाश्रमोभान्वभिरोपुनर्मूरवरेमृहाणांत्रिभिरुत्तरैः स्यात् ३ ए
कार्गलः साभिजितोडुतोर्कः समस्तियोगएष्वशुभाव्हयेषु चतुर्दशं चेंदुभमर्कधिष्ण्याद्द्वितीयमुक्तोद्वहनर्क्षशुद्धिः ४
षट्त्र्यायेष्वशुभाः शुभायनिधनद्यूनान्त्यवर्ज्येपरे त्र्यायार्थेषुशशीमृतौशनितमः सूर्याः परेभंगदाः

तराभाद्रपदयोरित्यर्थः ३ अत्रैका
र्गलादिकमाह अशुभाव्हयेषु दुष्टनामसुयोगेषु सत्सु इंदुतः इंदुनक्षत्रात् अर्कः सूर्यः साभिजिति समेऋक्षेभवति तदा एकार्गलोस्ति एतदुक्तं भवति व्या
घातशूलपरिघव्यतिपातविष्कंभगंडातिगंडवज्रवैधृताः अशुभनामयोगाः एषन्यतमेयोगेसति चंद्रनक्षमारभ्य अभिजितासह अर्कनक्षत्रं गणयि
त्वायदियुग्मासंख्याभवति तदैकार्गलः स्यात् तद्वर्ज्यं नशुभमित्यनुवृत्तिः अथसंध्योदितं अर्कधिष्ण्याच्चतुर्दशमिंदुभं चंद्रनक्षत्रं च अशुद्धमशुभं स्यात् इती
यं उद्वहनर्क्षस्यविवाहनक्षत्रस्यशुद्धिरुक्ता ४ अथलग्नशुद्धिमाह षट्षष्ठं त्रयस्तृतीयं आय एकादशं एषु अशुभाः पापग्रहाः शुभायभवंति शेष

षु शुभा यः निधनमष्टमं द्यूनं सप्तमं अंत्यं द्वादशं एतानि वर्जयित्वा अन्येषु नवसु स्थानेषु परे सौम्यग्रहा बुधगुरुशुक्राः शुभायस्युः शेषेषु निधनद्यू
नांत्येषु शुभाय शशी चंद्रस्त्र्यायार्थेषु तृतीयेकादशद्वितीयेषु शुभाय भवेत् शेषेष्वशुभायतत्राष्टमेसर्वेषां विशेषमाह मृताविति मृतावष्टमेशनित
मःसूर्याः शुभायस्युः नतु शुभाय अत्रराहुग्रहणात्तत्स्वरूपांतरं केतुश्चपरेस्मेचंद्रभौमबुधगुरुशुक्राः मृतौस्थिताभंगदाः लग्नभंगायस्युः अन्यानपि लग्नभं
गानाह क्रूरद्यूनेति शशिनितनूक्रूरद्यूनवृतान्विते भंगायभवतः द्यूनंवृत्तमावृतं ययोस्ते द्यूनवृते तेचते अन्वितेच द्यूनवृतान्वितौ क्रमेणद्यूनवृतान्वितेतेतथाल
ग्नस्य चंद्रस्यवा सप्तमंक्रूरान्वितं भवेत् यद्वाचंद्रोलग्नंवाक्रूरान्वितंभवेत्तदालग्नभंगः स्यादित्यर्थः अस्तेसप्तमे लग्नाच्चंद्राद्वासितस्तौ शुक्रौ बुधोवासोपिभं

क्रूरद्यूनवृतान्वितौ शशितनू अस्तेसितज्ञौविधुर्लग्नेसोमसिताधिपाद्विषिसितः सेंदुर्विनष्टांशयः ५ अंशाः षड्विनवाद्रय
स्तदधिपे लग्नांशयोर्द्वादशद्वित्र्यष्टासुनलग्नमस्तलवपेतत्सप्तमाभ्यां तथागंडांतेषुचवैधृताबुभयतः संक्रांतियामद्वये
यामार्धेव्यतिपातविष्टिकुलिकेमासेन्हि चोनाधिके ६

गाय लग्नेविधुश्चंद्रोभंगाय द्विषिषष्ठेसोमसुताधिपाः भंगायस्युः सोमश्चंद्रः सितः शु
क्रः अधिपाः स्वामिनः लग्नांशद्रेष्काणानां अत्रषष्ठं लग्नादेवनचंद्रात् सोमग्रहणात् सितः शुक्रः सेंदुः सचंद्रः भंगाय शुक्रयुक्तश्चंद्र इतिभावः अंशपो
नवांशाधीशो विनष्टोस्तंगतः भंगायस्यात् अथनवांशशुद्ध्यादिकमाह अंशालग्ननवांशाः षड्विनवाद्रयः कन्यामिथुनधनुस्तुलाः शुभाः तस्यनवां
शस्याधिपे स्वामिनि लग्ननवांशयोर्लग्नान्नवांशाद्वाद्वादशद्वित्र्यष्टासु द्वादशद्वितीयतृतीयाष्टमेषु स्थितेसति नलग्नंकार्यं अस्तलवपे अस्तांशाधिपे
तत्सप्तमाभ्यांलग्नाद्द्वंशाच्चसप्तमाभ्यांसकाशात याद्वादशद्वित्र्यष्टासुस्थितेसतिलग्नंनकार्यं एषुस्थानेतस्यदृष्टिर्नास्तीत्यभिप्रायः अथान्येमहादोषाः

गंडांते ष्विति त्रिविधेषु गंडांतेषु शूलवैधृतवरीयसामित्युक्तेषु वैधृतौ सप्तविंशयोगे च संक्रांतेः सकाशादुभयतः पूर्वं पश्चाच्च यामद्वये षोडशघटीषु च
यामार्धमर्धयामः शास्त्रांतरोक्तः व्यतिपातः सप्तदशो योगः विष्टिर्भद्रा सप्तमं करणं कुलिकः द्विघ्नं नामनवइत्यादिनोक्तः तस्मिन् ऊनाधिके मासि क्षयमासे धि
मासे चेति ऊनाधिके न्हि दिनक्षये दिनवृद्धौ चेति न लग्नं कार्यमिति प्रत्येकं संबंधः ६ अथाष्टमलग्नादिदोषानाह जन्मर्क्षाज्जन्मलग्नाच्च अष्टमद्वादशाभ्यां लग्ने स्थि
ताभ्यां क्रमेण निधनविधनेस्तः जन्मराशेर्जन्मलग्नाद्वाष्टमे राशौ लग्नगते सति निधनं द्वादशे विधनं स्यादित्यर्थः तत्स्वामितत्स्थैः तयोरष्टमद्वादशराश्योः स्वामिनौ
तत्स्वामिनौ योरष्टमद्वादशराश्योः स्थिता तत्स्थाः तैः खगैरपि वपुषि लग्ने स्थितैः क्रमेण निधनविधने स्तः अष्टमस्थानाधीशेष्टमस्थे वा ग्रहे लग्नगते सति निधनं

जन्मर्क्षाज्जन्मलग्नान्निधनविधनते अष्टमद्वादशाभ्यां लग्ने तत्स्वामितत्स्थैरपि वपुषि खगैस्तद्गृहांशेश्वतेस्तः अस्तेशारेर्न
वांशे व्यसनमसुभयं नाडिवेधे षडष्टसे त्रेशानामसख्येद्नुजनरगणेवार्कजीवेंदुशुद्धौ ७

द्वादशस्थानाधीशे द्वादशस्थे वा ग्रहे लग्नगते स
ति विधनता स्यादित्यर्थः तद्गृहांशेः तेषां ग्रहाणां यानि गृहाणि तेषामंशा नवांशास्तैश्च वपुषि गतैः ते निधनविधने क्रमेणास्तः अष्टमराशेरष्टमस्थग्रहस्य
राशेर्वा नवांशे लग्नगते सति निधनं द्वादशराशेर्द्वादशस्थग्रहस्य राशेर्वा नवांशे लग्नगते विधनता स्यादित्यर्थः अस्तेशारेः अंशाद्स्तं सप्तमं तस्येशः स्वामी
तस्यारिः शत्रुस्तस्य नवांशे लग्नगते सति व्यसनं स्यात् अयमेलकः असुभयं इति रुद्रार्थमेद्व्त्यादिना नारीनरनक्षत्रयोर्नाडीवेधे सति असुभयं मरणं स्यात् ष
ट्ष्टसे त्रेशानां स्त्रीनरराश्योर्मिथः षडष्टकराश्यधिपानां असख्ये वैरे सति असुभयं स्यात् त्रियुग्मीत्यादिना द्नुजनरगणे राक्षसमनुष्यगणे च असुभयं स्यात् अ
र्कजीवेंदुशुद्धौ च गोचरमार्गेण दंपत्योः सुर्यगुरुचंद्राणां बलालाभे सति मरणं स्यादित्यर्थः ७ एवं लग्नांशशुद्धिं ज्ञात्वा तस्मात्काल ज्ञानार्थं पलभाचरोदयादीनाह

वेदाश्चत्वारोंगुलानि इह भावभ्यपोश्चत्वारिंशद्व्यंगुलानि इयं किल सर्वत्र नर्मदातीरे पलभास्यात् तस्माद्याम्योत्तरे पथि एकयोजनेन व्यंगुलं तस्याः पलभायाः
ह्रसति पुष्यति च स्वदेशनर्मदयोर्याम्योत्तरांतरे यावंति योजनानि तत्तुल्यव्यंगुलैः सा नार्मदी पलभा ४।४८ याम्यदेशे रहिता उत्तरे सहिता स्वदेशफलभा भवेदि
त्यर्थः सा त्रिविधा दशनागदिग्भिर्हता अंत्या पुनः अंतिमा तु दहनहृत् त्रि ३ हता चरखंडकानि स्युः अ यो द या ८ कृष्णागतयो वन्हयः शेषाः प्रसिद्धाः एते त्रयो लंको
दयाः स्युः ते स्वैश्चरखंडकैः स्त्रिभिः क्रमेण हीनाः विलोमविहिता उत्क्रमस्थाः विलोमैश्चरखंडकैः क्रमेण सहिताः एवं मेषादीनां षण्णां जाताः ते पुनर्व्यस्ताः एवं द्वाद

वेदाः ४ भोब्ध्ययः ४ इयं किल नार्मदी भा तद्व्यंगुलं ह्रसति पुष्यति योजनेन याम्योत्तरे पथि हता दशनागदिग्भिरंत्या पुनर्दहनहृच्च
रखंडकानि ८ लंकोदया भुजगभानि नवा करदस्रा वह्निहृत् कृष्णागतयः स्वचरखंडकैः स्वैः हीना विलोमविहिताः सहिता वि
लोमैर्व्यस्ताः पुनः स्वविषयोदयजा विनाड्यः ९ वेदात्यष्टिगुणाग्निधूर्जटिगजत्यत्यष्टिदृग्विश्वभूमूर्छाभिर्धनुषो निहत्य ति
भजेल्लग्नेष्टवारांस्त्रिभिः मीनादिषु धनं तुलादिषु धनं लिप्ताः स्फुटो भास्करः १० ॥

शस्वदेशोदयजा विनाड्यः स्युः ९ अथ संक्रांतेरर्क
ज्ञानमाह अत्यष्टिः सप्तदश धूर्जटयो रुद्राः मूर्छा एकविंशतिः अर्थाः पंचकामांकुशाः नखाः शेषा गुणाहराश्च प्रसिद्धाः लग्नेष्टवारान् लग्नकालपर्यंतं
संक्रांतिमारभ्येष्टदिवसान् धनुषः धनुः संक्रांतिमारभ्य वेदादिभिर्द्वादशगुणकैर्यथाप्राप्तैः क्रमेण निहत्य तिथ्यादिभिर्द्वादशभिर्विभजेत् फलं लिप्ताः मीनादि
षु कन्यांतासु गतेऽर्के अधनं तुलादिकुंभांतासु धनं कृत्वा स्फुटो भास्करः स्यात् एतदुक्तं भवति संक्रमवशादर्कराशीन् ज्ञात्वा संक्रममारभ्य इष्टदिनपर्यंतं वे
दादिदिवसास्ते तद्धांशाः स्युः ते दिवसाः पृथक् पृथक् [illegible] गुणकैर्गुणयित्वा शहरेण विभज्य कलादि यल्लब्धं तत्तस्मिन् रवौ मीना

रिपुसप्तसु गतेऋणं तुलादिषंचसु गतेधनं कार्यं तद्दृष्टदिने स्फुटः सूर्यः स्यादिति १० अथ कालज्ञानं स्पष्टार्थं ११ अथेष्टकालाल्लग्नज्ञानमाह रवेर्भोग्य
कालमुदयैः सह इष्टघटीपलेभ्यस्त्यक्त्वा भोग्यं तदग्रोदयांश्च त्यक्त्वेत्यर्थः तदुद्धृतानि तदुर्वरितानि यानि पलानि तानि त्रिंशद्गुणितानि अगलितोदयेन
भाजितानि भागादियल्लब्धं तदजादिगृहशेखरितनुर्लग्नं स्यात् शेखरो मुकुटः शेखरो जातास्मिन् तच्छेखरितं अजादिगृहैः शेखरितं अजादिगृहशेख
रितं मूर्धनि मेषादिराशिसहितमित्यर्थः १२ अथ षड्वर्गहोरादिकमाह कलानां द्विशतीनवांशमानं स्यात् इष्टांशात्पूर्वांशाद्विशतगुणा लग्नकलाः स्युरिति

रात्रौ भानुर्भार्धयुक्तः सायनांशस्तन्वर्कांशाः स्वोदयघ्नाः पृथक्के त्रिंशद्भक्ता भुक्तभोग्याः पलादिस्तादृक्कालो मध्यगः स्वोदयाढ्यः
११ भोग्यं रवेः समयमिष्टघटीपलेभ्यस्त्यक्त्वोदयैः सह फलानि तदुद्धृतानि त्रिंशद्गुणान्यगलितोदयभाजितानि भागाद्यजा
दिगृहशेखरितं तनुः स्यात् १२ नवांशमानं द्विशती कलानां सूर्योनलग्नस्य शरेंदुभागे वारादिहोरा विगता शरघ्ने षड्वर्गचिं
तात्र विनायनांशैः १३ अवंतिपूर्वापरयोजनानि स्वपादहीनानि ऋणान्यृणे स्तः ॥

भावः तस्मात् लग्नात् षड्वर्गचिंता अयनांशैर्विनास्या
त् षड्वर्गचिंतायां अयनांशान् देयादित्यर्थः षड्वर्गान्वस्यति अथ होरा वारादिनिवारादेर्वारमारभ्य विगता होरा स्यात् कस्मिन् सति सूर्योनलग्नस्य शरेंदु
भागे शरघ्ने सति सूर्योनलग्नस्यांशानां पंचदशांशांशेषं विरहितं पंचघ्नं कलातं वारमारभ्य वारक्रमेण गणयित्वा गता होरा स्यात्तत्परस्य वर्त्तमाना स्यादि
त्यर्थः अथ होरायाः प्रकारांतरार्थे देशांतरचरे आह १३ अवंतिरुज्जयिनी सा मध्यरेखा पलक्षणं तस्याः सकाशात्पूर्वापरे पूर्वपश्चिमे वा स्वदेशपर्यंतं
यानि योजनानि तानि स्वपादहीनानि स्वचतुर्थांशोनितानि देशांतरयोः पलानि स्युः तानि क्रमेणर्णान् णेस्तः पूर्वे ऋणसंज्ञानि पश्चिमे धनसंज्ञानीत्य

र्थः अथच राधैमिति त्रिंशद्युमानांतर मर्धितं चरार्धस्यात् अर्थात्त द्धटिकात्मकमतः षष्टिगुणं पलानित्सुरिति अथ वार प्रवृत्तिमाह नरार्ध देशोत्तर युविं
योगौ कार्यौ याम्य गोले योग उत्तर गोल वियोग इत्यर्थः योगे जाते सति तत्तुल्य प देरखुद यात्पुरा पूर्वं वियोगे पश्चाद नंतरं दिनवार कर्तुः दिनाधीशस्य प्रवृ
त्तिः स्यात् वार प्रवृत्तिरिति यावत् इयं वार प्रवृत्तिः अर्कोदयादूर्ध्व मधश्चताभिः इत्यादि यो गोलवासनया संहितावचनैश्च क्वचिद्विरुध्यते अतोत्रेत्थं गति
श्चिंतनीया यग्र यकारस्तु अवंत्याः पश्चिमदेशे आसीत् अतस्तेन स्व देशाभिप्रायेणेद मुक्तं तथाप्युत्तर गोले देशांतर पले भ्योल्प चरार्धे सति वियोगे पश्चाद
न्यथात्वं भवति तत्र वियोगेपि पूर्वमिति द्रष्टव्यं एवं व्यभिचारः परिहर्तव्यः १४ अथ प्रकारांतरेण कालहोरामाह दिनप प्रवेशाद्विघ्नेष्टनाडी शर लब्धितः

पलानि देशांतर योश्चरार्ध त्रिंशद्युमानांतर मर्धितस्यात् १४ द्विघ्नेष्टनाडी शर लब्धितो वासुः कालहोरा दिनप प्रवे
शात् प्राग्वक्रुरघ्नागण येदनिंद्या क्रूरापि लग्ने शुभ वेद वर्गे १५ राश्यंशाः शशि भूगुणेक्षण हतास्तिथ्यभ्र भूदिक्शरै
र्भक्ता भार्ध दृकाण नंद दिनकृद्भागा ग्रहस्यस्यत् ॥

कालहोरासुः वार प्रवेशमारभ्य इष्ट घटिका द्विघ्नाः शर भक्ताः लब्धं कालहोराः
सुरित्यर्थः ताः शरघ्नाः प्राग्वद्गणयेत् तद्यथा तत्प्रमाणं निरवयवं वारादितो गणयित्वागतानालहोरास्यात्तत्स्यरस्य वर्तमाना इत्यर्थः एवं प्रकार द्वयेनापि
क्रूरापापहोरापि अनिंद्या अदुष्टा स्यात् कस्मिन्सति लग्ने शुभ वेद वर्गे सति शुभानी वेदाश्चत्वारो वर्गा यस्मिंस्तत्तथा सौम्य वर्गाधिकत्वे सतीति भावः १५ अथ
ड्वर्गानाह राश्यंशाः राशि भुक्ताभक्ताः राशि भुक्ताः भक्ताः राशीन्संत्यज्य अंशा ग्राह्या इत्यर्थः ते चतुर्षु स्थानेषु क्रमेण शशि भूगुणेक्षण १।१।३।२ हतास्तिथ्य
भ्र भूदिक्शरै १५।१०।१०।५ र्भक्ता अभ्रभुवोदशशेषा सिद्धाः लब्धानि भार्धादयो वर्गाः स्युः भार्ध होरा दृकाणो द्रेष्काणः नंद दिनकृद्भागौ नवांश द्वादशां

शौ एवं चत्वारो वर्गाः यस्य ग्रहस्य यद्गृहं तत्तस्यैव अयमेको गृहाख्यः अथ त्रिंशांशा इति समराशौ सितादीनां पंचादयस्त्रिंशांशाः स्युः त्रिंशतः पूरणास्त्रिं
शा तेच ते अंशाश्च त्रिंशांशाः तद्यथा समराशौ आद्याः पंच भागाः शुक्रस्य ततः सप्त बुधस्येत्यादि ओजर्क्षेषु विषमराशिषु व्युत्क्रमात् भागानामधिपतीनां
च तद्यथा आद्याः पंच भौमस्य ततः पंच शनेरित्यादि इतीयं षड्वर्गिका स्यात् षण्णां वर्गाणां समाहारः षड्वर्गी सैव षड्वर्गिका अथ ग्रहगणितोक्तमपि द्यु
मानानयनं सुगमोक्त्या हि १६ सायनसूर्यस्य यल्लाग्यं भोग्यं सायनसूर्यस्य स षड्गुणस्य यच्च भुक्तं तत् मध्यांदयेतदंतर्वर्तिषु मध्योदयेषु युक्तं द्युमानं स्या
त् अथालंकारः इतीयं विलग्नस्य विवाहलग्नस्य शुद्धिः शिशुबोधनाय बालावबोधाय श्रीकेशवार्केण स्मृता संक्षिप्य कथिता १७ इति श्रीसकलाग

त्रिंशांशाः शनिसौम्यजीववरविज्ञस्याजन्मनां व्युत्क्रमादोजर्क्षेषु शरेषु सर्पमरुतः पंचेति षड्वर्गिका १६ महोदयेसाय
नसूर्यभोग्यं सषड्गभुक्तं च युतं द्युमानम् इति स्मृतेयं शिशुबोधनाय श्रीकेशवार्केण विलग्नशुद्धिः १७ इति विवाहवृं
दावने लग्नशुद्धिः सप्तदशोध्यायः ॥ १७ ॥ ॥

माचार्यवर्यश्रीकेशव— सांवत्सरात्मजगणेशविरचिता— —केशवार्कोदित
लग्नशुद्धेर्विवृत्तिः समाप्ता अत्र समूलाग्रंथसंख्या १७५ पादोन द्विशती समस्तग्रंथसंख्या ३३७५ हायनार्कलवतुल्यमायनं तद्युतो रसयुता यु
तिर्भवेत् सापि सागरयुतोडुपोडुकं तत्त्रिनेत्रलवसंयवपस्कः पक्षः सपक्षो यदि वासरः स्यात्तदीयरामांशसमस्तिथिः स्यात् यच्चाखिलैक्यं कुयमाहतं
तन्नंदादिकं मकरकवत्सराः स्युः तदयनतिथिपक्षास्तुल्यतां यांति यस्मिन्गुरुवरणाब्जालंबरोलंबकृष्णः गणकवरगणेशप्राक्तटीकामशेषामखिल
दक्षिलसारै मालिनीं वाग्विशेषैः ॥ ॥

वि॰ टी॰
६८

॥ श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपिअरीपरबाबूकौलेश्वरसिंहकेमकानमेंबाबूकिशुनदयाल
सिंहकेगनेशप्रभाकरछापाखानेमे सटीकविवाहवृंदावन छापागया जिसकोलेनाहोयसोनईसडकपरबाबूकौले
श्वरसिंहकेदुकानपरमिलेगी सोधावालशास्त्रीप्रभुणेने बहुतशुद्धतापूर्वक संवत् १९४३ ज्येष्ठ शुक्ल १० ॥

रामः
६८